पाराशरोपपुराणम्

(समीक्षात्मकं सम्पादनम्)

सम्पादकः
डॉ. कपिलदेवत्रिपाठी
उपाचार्यचरः,
पुराणेतिहास-संस्कृतिविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

सरस्वतीभवन-अध्ययनमाला
[४०]

पाराशरोपपुराणम्

(समीक्षात्मकं सम्पादनम्)

सम्पादकः
डॉ० कपिलदेवत्रिपाठी
प्राध्यापकः,
पुराणेतिहाससंस्कृतिविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

SARASVATĪBHAVANA-STUDIES

[Vol. 40]

PĀRĀŚAROPAPURĀṆAM

(SAMĪKṢĀTMAKAM SAMPĀDANAM)

EDITED BY

DR. KAPILADEVA TRIPĀṬHĪ

Ex-Reader

Department of 'Purāṇetihāsa'

Sampurnanand Sanskrit University

Varanasi

VARANASI

1990

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

•

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

•

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

•

First Edition- 1000 Copies
Price Rs. 66.00

•

Printed by—
DR. RĀMAMANOHARA MIŚRA
O. S. D.
Sampurnanand Sanskrit University Press
Varanasi.

सरस्वतीभवन-अध्ययनमाला
[४०]

पाराशरोपपुराणम्

(समीक्षात्मकं सम्पादनम्)

सम्पादकः
डॉ० कपिलदेवत्रिपाठी
उपाचार्यचरः,
पुराणेतिहास-संस्कृतिविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

वाराणस्याम्

२०४६ तमे वैक्रमाब्दे   १९११ तमे शकाब्दे   १९९० तमे ख्रैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः —
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी ।

प्रकाशकः —
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

प्राप्तिस्थानम्—
विक्रयविभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्—६६-०० रूप्यकाणि

मुद्रकः—
डॉ० राममनोहरमिश्रः
विशेषाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयमुद्रणालयस्य
वाराणसी ।

पुरोवाक्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयपुराणविभागे उपाचार्यपदमलङ्कृतवता व्याकरणसाहित्याद्यनेकशास्त्रेषु पारङ्गतेन पुराणविद्यानिष्णातेन पण्डितप्रवरेण **श्रीमता कपिलदेवत्रिपाठिना** पाराशरोपपुराणमधिकृत्य सम्पादितं गवेषणापूर्णं कार्यं विषयदृष्ट्या गभीरं भावेन सरसं भाषया च स्पृहणीयं यत्र तत्रावलोक्य मम मनसि महान् प्रमोदः समजायत; यदिदं ग्रन्थात्मना संस्कृतविश्वविद्यालयात् प्रकाश्यतां नीतम् ।

श्रीमद्भागवते महापुराणे दशलक्षणलक्षितत्त्वं महापुराणमुद्दिश्य प्रत्यपादि । तथा हि—सर्गः (सृष्टिः), विसर्गः (विविधा सृष्टिः), स्थानम् (वैकुण्ठविजयः) पोषणम् (भगवदनुग्रहः), ऊतयः (कर्मवासनाः), मन्वन्तराणि (मनुकालविभागः), ईशानुकथा (भगवदवतारकथा), निरोधः (प्रलयः), मुक्तिः (जीवस्य स्वरूपेऽवस्थानम्), आश्रयः (परमात्मा), इत्येवं दश लक्षणानि । एवमेव श्रीमद्भागवतेऽन्यत्र च पुराणानां संख्याऽपि निर्दिष्टाऽस्ति ।

महापुराणपरम्परानुसारेण उपपुराणान्यपि अष्टादशैव कथितानि सन्ति । तानि चात्र ग्रन्थे पञ्चदशपृष्ठत आरभ्य चतुर्विंशतिपृष्ठं यावद् विस्तरेण द्रष्टव्यानि । पुराणशब्दस्य समीचीना निरुक्तयः, पुराणैः सहेतिहासस्य सम्बन्धः, पुराणानां नित्यता, पुराणेषु कथितानि पापकर्माणि, प्रायश्चित्तविधिः, सृष्टिप्रक्रिया वाराणसीवैभवम्, शिवपूजाविधिः इत्यादयो विषया अत्र साधु वर्णिताः सन्ति ।

भगवता श्रीकृष्णद्वैपायनेन लोककल्याणाय प्रतिपादिता एव विषयाः प्रायेण लोकभाषया स्मारं स्मारं संग्रथिताः । उक्तञ्च—**"वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः"** । (नारदीये-२।२४।१७) इति ।

वस्तुतो विमर्शे कृते सति पुराणानां वेदत्वमेव सिद्ध्यति । तथा हि—**"अस्य महतो भूतस्य निःश्वसितमेवैतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः"** इति (बृ०आ०श्रुतिः । **"ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासं पुराणं च पञ्चमं वेदानां वेदमिति"** (छा० सप्तमाध्याये) । अपि च—**"इतिहासपुराणानि पञ्चमो वेद उच्यते"** इत्यादि । अस्यां स्थितौ स्कान्द वैयासिकीत्यादिसमाख्याः, तत्तत्स्थले कर्तृस्मरणानि च तैत्तिरीयादिवत् प्रवचनापेक्षाणि बोध्यानि, तेन तेनाचार्येण प्रवचनं कृतम्, न तु निर्माणमिति भावः । **"चक्रे सात्वतसंहितायाम्"** इत्यादौ श्रीव्यासादिकर्तृस्मरणमपि

एवमेव पूर्वसिद्धविस्तृतपुराणस्य सुखेन बोधाय संक्षेपपूर्वकप्रवचनपरमेव मन्तव्यम् । उक्तञ्च मात्स्ये--

कालेनाग्रहणं मत्वा पुराणस्य द्विजोत्तमाः ।
व्यासरूपमहं कृत्वा संहरामि युगे युगे ॥
अद्याप्यमर्त्यलोके तच्छतकोटिप्रविस्तरम् ।
तदर्थोऽत्र चतुर्लक्षः संक्षेपेण निवेशितः ॥ इति ।

वेदः पुराणमिति भेदेन व्यवहारस्तु गोबलीवर्दन्यायेन त्रैस्वर्यादिभावाभावकृतः । पुराणानां वेदत्वेऽपि लौकिकशब्दबाहुल्येन या प्रवृत्तिः, सा तु त्रैस्वर्यादिभावस्याभावकृतैव मन्तव्या, उदात्तादिस्वराभावेन ऐतरेयब्राह्मणवत् । टीकाकृतां तत्र तत्र छान्दसमार्षमित्यादिव्याख्यानं तु वैदिक्यैव प्रक्रिययाऽत्र प्रवृत्तम्, न तु प्रक्रान्तलोकसाधारणया इत्यर्थकम् ।

न च "**इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्**" इत्युक्त्या वेदार्थव्याख्यानभूतत्वं पुराणानाम्, न तु साक्षाद् वेदत्वमिति वाच्यम् । मन्त्रब्राह्मणादयोर्वेदनामधेयमिति वचनेन ब्राह्मणग्रन्थानां साक्षाद् वेदत्वेऽपि मन्त्रभागस्य व्याख्याभूतत्वं यथा स्वीकृतमस्ति, तथैव पुराणानां कृतेऽपि मन्तव्यम्, का क्षतिः ? इत्येवं समाधानस्य जागरूकत्वात् । यत्तु श्रुतिमूलकतया पुराणानां प्रामाण्यं न तु स्वत इति केनचिदुक्तम्, तदपि न युक्तिसहम् । पुराणेषु स्मृतित्वमारोप्य तस्य कथनस्य संगमनात् । अतश्च ऋगादिवेदस्य सम्प्रति दुष्पारत्वाद् दुरधिगमार्थत्वाच्च तदर्थनिर्णायकः पुराणेतिहासात्मको वेद एवेति विचारणीयं सुधीभिः । किं बहुना, भारतस्य सामाजिकं सांस्कृतिकं धार्मिकञ्च जीवनं पुराणेष्वेव प्रतिबिम्बितमस्ति । क्रमबद्धकथापद्धत्या सरलया सरसया च भाषया गहनातिगहना अपि विषयाः पुराणेषु स्फुटीकृताः सन्ति, इति महनीयं महत्त्वं पुराणानामित्यत्र नास्ति मनागपि संशयः ।

ईदृशप्रतिष्ठास्पदपुराणेषु यदन्वेषणादि कार्यं केनचिद् विद्वद्वरेण विधीयते, तन्महते लोकोपकाराय फलिष्यति । अस्मत्संस्कृतविश्वविद्यालय एतादृशकार्यसम्पादने संलग्नाय श्रीकपिलदेवत्रिपाठिमहोदयाय भगवान् सदाशिवः दीर्घायुष्यं सामर्थ्यञ्च प्रदेयादिति कामयते--

वाराणस्याम्,
वसन्तपञ्चम्याम्
२०४६ वैक्रमाब्दे
३१-१-१९९० खैस्ताब्दे

डॉ० राजदेवमिश्रः
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम्

प्रास्ताविकम्

भारतीयवाङ्मये वेदानामनन्तरं पुराणानि एव गौरवभाञ्जि, इत्यत्र नास्ति कोऽपि सन्देहः। पुराणेषु प्राचीनभारतस्य समग्रं चित्रं चित्रितमिवास्ति। तेषां कथोपकथनरूपा शैली सरला प्रवाहमयी च भाषा कस्य सचेतसो मनो न मोदयति? पुराणानां प्रतिपाद्यं तु मुख्यतया सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितानि एव, किन्तु तत्र व्रततीर्थपूजास्तुतिसदाचारव्यवहारादयो विषया अपि मध्ये मध्ये संयोजिताः, येन तेषां भूयान् प्रभावः प्रसारश्च लोके संबभूव।

इदानीमस्माकं धार्मिकसांस्कृतिकसरणिः पुराणमेवानुसरति, अतस्तस्याध्ययनमध्यापनमनुशीलनञ्चातीवावश्यकमिति कृत्वा मनीषिणस्तत्र मनो ददते। विलसन-पार्जिटर-क्रिफेल-प्रभृतयो वैदेशिका विद्वांसो हाजरा-पुसालकर-बलदेवोपाध्याय-वासुदेवशरणाग्रवाल-माधवाचार्य-मधुसूदनओझा-गिरिधरशर्मचतुर्वेद-प्रभृतयो भारतीया विद्वांसोऽत्र विषये शोधपूर्णं कार्यं कृतवन्तः। तदाधारेणाद्यत्वे शोधच्छात्राः स्वकीयशोधं कुर्वन्तः सामग्रीसङ्कलने महत्सौकर्यमनुभवन्ति।

तत्रोपपुराणानां विस्तृतं वाङ्मयं वर्तते। विषयेऽस्मिन् डॉ० आर० सी० हाजरामहोदयेन महत्त्वपूर्णं कार्यं कृतम्[1]। महापुराणवदेतेषामपि प्रामाण्यं प्राचीनत्वञ्चाकामेनापि स्वीकर्तव्यम्। महापुराणमतानुसारेण उपपुराणानि यद्यपि तेषामुपभेदा एव सन्ति, तथापि स्वतन्त्ररूपेणैषां स्थितिः सर्वैरेव स्वीक्रियते। नैके निबन्धकारा एतेभ्यो विभिन्नानंशान् समुद्धृत्य निजनिबन्धकलेवरमलञ्चक्रुः। बहुषुस्थानेषु पाण्डुलिपिरूपेण रक्षितानामेषां स्वातन्त्र्यस्थितिं महत्त्वञ्च प्रमाणयन्ति उपपुराणानि। महापुराणानां नामविषये संख्याविषये च प्रायः सर्वेषामैकमत्यमस्ति। किन्तु न तथोपपुराणानां विषये दृश्यते। यतो हि उपपुराणानि अष्टादशतोऽधिकानि (शताधिकानि) प्राप्यन्ते। यथा शैवब्राह्मशाक्तवैष्णवेत्यादिभिः महापुराणानि भिद्यन्ते तथा उपपुराणेष्वप्ययं भेदः संभवति। तत्र पाराशरोपपुराणमिदं शैवं पुराणम्। अत्र अष्टादशाध्याया अष्टोत्तरसहस्रश्लोकाश्च सन्ति[2]। लघुकायमपीदं विषयदृष्टया महत्प्रतिष्ठाकरं वर्तते। अत्र देवदेव उमापतिरुद्गीयते सर्वत्र। अथ चेदं वेदमार्गप्रतिष्ठाया अपूर्वं रसभरं वस्तु विद्यते।

---

१. स्टडीज इन दि उपपुराणाज, (प्रका० ग० सं० का० कलकत्ता)

२. पारा० १८/१३५

अद्यप्रभृति अप्रकाशितमिदं पाराशरोपपुराणं विभिन्नग्रन्थागारेषु पाण्डुलिपिरूपेण सुरक्षितम्। अस्य समालोचनात्मकं सम्पादनं कृतवता मया सम्पूर्णानन्दसंस्कृतविश्वविद्यालयसरस्वतीभवनग्रन्थागारतो देवनागरीलिपिलिखिताः षट् हस्तलिखितपुस्तिका आलोचिताः। तत्र चतस्रः पूर्णा द्वे चापूर्णे सन्ति। ता आलोच्य पाठभेदान् संकलय्य च यथाविधि सम्पादनं कृतम्। तत्र सम्पादनानन्तरमहं तदीयमहत्त्वपूर्णविषयाणां यथासंभवं यथाशक्ति पर्यालोचनञ्चाकार्षम्। अत्र सृष्टिक्रमविमर्शः, वाराणसीवैभवं, प्रायश्चित्तविचारः, अह्निककृत्यविमर्शः, शिवपूजाविधिः, भस्मत्रिपुण्ड्ररुद्राक्षमाहात्म्यं, शास्त्रविमर्शः, मुक्तिस्वरूपं, शिवस्वरूपमित्यादयो विषयाः पर्यालोचिताः। विषयाणां स्पष्टीकरणाय मयात्र प्रारम्भ एव पुराणस्यास्य 'अध्यायानुसारि विवरणम्' अपि प्रदत्तम्। आदौ पुराणोपपुराणपरिचयपुरस्सरं पाराशरोपपुराणस्य वैशिष्ट्यमपि यथासंभवं प्रतिपादितम्। अन्ते चास्य रचनाकालविवेचनमपि दिङ्मात्रं प्रदर्शितम्। अन्तर्बहिः साक्ष्यानुसारेणास्य पुराणस्य कालः ई॰ उ॰ ८५०-१००० पर्यन्तः प्रतीयते। हस्तलिखितपुस्तिकानां परिचयः, पाराशरोपपुराणोद्धृतवचनानां संग्रहश्च यथास्थानं सङ्कलितौ।

भगवतः साम्बसदाशिवस्यानुकम्पया सम्पादितमालोचितमिदं पुराणं, मन्ये विदुषां प्रमोदाय भविष्यति।

कार्येऽस्मिन् विश्वविद्यालयानुदानायोगतः सहस्ररूप्यकात्मकमार्थिकसाहाय्यमवाप्तमिति हेतोस्तदधिकारिणः साधुवादार्हाः। येषां सत्परामर्शप्रदानेन निपुणनिर्देशनेन चायं शोधप्रबन्धः परिपूर्णतां गतस्तेषां मनीषिमूर्धन्यानामत्र पद्यमयः कश्चन कृतज्ञताप्रकाशः प्रस्तूयते।

कृतज्ञताप्रकाशः

वेदैः पुराणैरनुगीतकीर्तिं सद्भस्मना भासितदिव्यमूर्त्तिम्।
देवाधिदेवं करुणावतारं विश्वेशमीडे सहितं भवान्या ॥१॥

व्यधाद्यः श्रीदुर्गाशतकमथ रुद्राष्टकमहो,
महाकाव्यं चोषाहरणमिह टीकामपि पराम्।
प्रतिष्ठा भूयिष्ठा सदसि च यदीयास्ति सुधिया-
मनन्तानन्दं तं यतिवरगुरुं नौमि सदयम् ॥२॥

करुणया कलया च समन्वितः सुरगिरासुधियामभिनन्दितः।
जयति कोऽपि विपश्चिदपश्चिमः कुलपतिः सुमतिः करुणापतिः ॥३॥

विद्वत्सु विख्यात उदारमानसः प्रभाववान् नीतिविदां वरः शुचिः ।
आचार्यभूपेन्द्रपतिर्द्विजाग्रणीः सभाजनीयः सकलैः सभाज्यते ।।४।।

ललितनवनिबन्धे यस्य काव्यप्रबन्धे
स्फुरति मतिरनिन्द्याऽध्यापने भाषणे च ।
बहुविदतिगभीरः शोधनिर्देशको मे
जयति विदितकीर्त्तिः कोऽपि विद्यानिवासः ।।५।।

निर्देशने यस्य मनस्विनो मया शोधप्रबन्धः परिपूरितो मुदा ।
अन्वर्थनाम्नः सुजनस्य हार्दिकीं विज्ञापये तस्य कृते कृतज्ञताम् ।।६।।

शाब्दे नदोष्णं कविवर्यकालिकाप्रसादशुक्लं निपुणं च पाठने ।
श्रीराधिकाचारुचरित्रचित्रकं कृतोपकारं हि सभाजये हृदा ।।७।।

निष्कामभावेन सहायतां सदा करोति यः काममधीतिनां मुदा ।
श्रीरामनारायणमाप्तपण्डितं त्रिपाठिनं साधुगिरा सभाजये ।।८।।

अध्यापने लब्धयशा मनस्वी प्रभाववान् राष्ट्रियतानुरागी ।
प्रसन्नचेताः श्रुतिशास्त्रवेत्ता विश्वम्भरः कोऽपि जयत्युदारः ।।९।।

प्राच्यप्रतीच्योभयविद्ययान्वितः पुराणआचार्यचरो गुणाकरः ।
अशोकशास्त्री मृदुलस्वभाववान् संभाव्यते साधुवचोभिरादृतः ।।१०।।

सन्दर्भाश्च विचाराश्च येषां सुकृतिनामिह ।
गृहीताः, ज्ञापये तेभ्यः कृतिभ्योऽपि कृतज्ञताम् ।।११।।

पुराणस्यास्य सम्पादनादि समग्रं कार्यजातं २०३३ तमे वैक्रमाब्दे परिपूर्णतामगमत् । तस्य प्रकाशनमैषमः २०४६ तमे वैक्रमाब्दे सम्पद्यते । अतस्तत्र प्रकाशनकर्मणि ये खलु विद्वांसः साहाय्यमाचरितवन्तस्तेऽपि भूयो भूयः सभाज्यन्ते साधुवादैश्च संयोज्यन्ते ।

तत्र द्वितीयवारं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिपदमलङ्कृतवतां न्यायव्याकरणाद्यनेकशास्त्रपरिशीलनशैलीशीलानामवदातचरितानामुदारहृदयानां डॉ० गौरीनाथशास्त्रीत्यभिधेयानां कृते कृतज्ञतां ज्ञापयामि, यैरस्य ग्रन्थस्य प्रकाशनाय स्वीकृतिं प्रदाय प्रकाशनपन्थाः सरलीकृतः ।

ततः प्राच्यविद्याऽनुसन्धानकलाकोविदाः, व्याकरणसाहित्यपुराणेतिहासशास्त्रमर्मज्ञाः, विश्वविद्यालयस्यानुसन्धानसंस्थाननिदेशकाः डॉ० भागीरथप्रसाद-

त्रिपाठिनः 'वागीशशास्त्रिणः' अपि धन्यवादार्हाः, यैर्यथासमयमुचितपरामर्शप्रदानेनात्र साहाय्यं विहितम् ।

अथ चास्य विश्वविद्यालयस्य प्रकाशनाधिकारी विद्याविनयसम्पन्नो विद्वद्वल्लभः प्रकाशनकर्मणि प्राप्तनैपुणीकः डॉ० हरिश्चन्द्रमणित्रिपाठी अपि पुष्कलसाधुवादैः संयोज्यते, यस्य सौजन्येन पुस्तकस्यास्य प्रकाशनमैषमः समपद्यत ।

अन्ते चात्र मुद्रणकार्यव्यवस्थापकः (कार्यकारी) व्याकरणशास्त्रे विहितातिशयश्रमो व्याकरणप्राध्यापकः डॉ० राममनोहरमिश्रोऽपि साधुवादार्हः, यस्य प्रेरणया मनोयोगेन चायं ग्रन्थः समीचीनतया यथाशीघ्रं प्रकाशितोऽभवत् । अत्रैव कार्यालयपण्डितपदे विराजमानः पुराणविद्यारसिकः श्रीहरिवंशत्रिपाठी अपि साधुवादैः संयोज्यते, यः प्राग्रूप (प्रूफ) शोधने मम साहाय्यं कृतवानिति शम् ।

'किमपि सांसारिकं वस्तु सम्पूर्णरूपेण निर्दोषं सन्तोषप्रदं च न भवितुं शक्नोति' इति महामनीषिणां श्रीरामावतारशर्मणामुक्तिः । अतस्त्रुटिविषये सुधियां पुरतः—

'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।'

इति विनिवेद्य विरमामि ।

विदुषां वशंवदः
कपिलदेवत्रिपाठी
अध्यापकनिवासः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

कार्त्तिकपूर्णिमा
वि० सं० २०४६

विषयानुक्रमणिका

विषयाः	पृष्ठ संख्या

भूमिका

अतिविस्तृते संस्कृतवाङ्मये पुराणानां महत्त्वं सर्वैरेव समालोचकैः स्वीकृतं वर्तते। तत्र महापुराणवदुपपुराणानामपि प्रामाण्यं प्राचीनत्वञ्च सर्वैरेव स्वीक्रियते। उपपुराणानि विषयदृष्टया संख्यादृष्टया च नूनं सुसम्पन्नानि सन्ति। उपपुराणेषु वर्णिता बहवोंऽशाः महापुराणेभ्योऽपि प्राचीनतमाः सन्ति भारतीयधर्मदर्शनसंस्कृतीतिहासविषयकसामग्री अत्र प्राचुर्येण प्राप्यते।

महापुराणानां संख्याविषये नामविषये च यथा सर्वेषामैकमत्यमस्ति उपपुराणविषये न तथैकमत्यं दृश्यते। यद्यपि कूर्मस्कन्दपद्मगरुडब्रह्मवैवर्त्तादिमहापुराणेषु अन्येषु च निबन्धग्रन्थेषु उपपुराणानामपि महापुराणवदष्टादशैव संख्या स्वीकृता वर्तते तथापि,

अन्याश्च संहिताः सर्वा मारीचकापिलादयः।
सर्वत्र धर्मकथने तुल्यसामर्थ्यमुच्यते[1]॥

इत्याद्युक्तिभिरष्टादशातिरिक्तानामुपपुराणानां प्रामाण्यमप्यभ्युपगम्यते। उपपुराणानां नामानि सर्वत्र भिन्नरूपाणि प्राप्यन्ते। वस्तुतस्तु तान्यसंख्येयान्येव इति मन्तव्यम्।

महापुराणानीवोपपुराणान्यपि शैवशाक्तवैष्णवादिभिर्भिद्यन्ते। तन्मध्ये पाराशरोपपुराणमिदं शैवम्। लघुकायमपीदं धार्मिकदृष्टया त्वतुलनीयमेव। शिवमाहात्म्यसंबलितं धर्मशास्त्रीयविविधविषयविशिष्टं वाराणसीवैभवसमन्वितमिदम् पुराणं वेदधर्मदर्शननिदर्शकं किमपि प्राचीनं पुराणं वर्तते।

पुराणेऽस्मिन्नष्टादशाध्यायाः सन्ति। अस्य वक्ता पराशरः श्रोता च शुकः। तत्र प्रथमेऽध्याये पराशरो मुनिरष्टादशोपपुराणानां नामानि निर्दिशन् तेषां रचना शिवाज्ञया मुनिभिः कृतेति प्रतिपादितवान्। द्वितीयेऽध्याये समासेन सृष्टिक्रम उपवर्णितः। तृतीये प्राणिनां श्रेष्ठताक्रमं प्रदर्शयता पराशरेण मानवेषु ब्राह्मणाः (श्रोत्रियाः) देवेषु च साम्बः शिवोऽधिको मतः, तत्पराण्येव श्रुतिस्मृतिपुराणादीनि शास्त्राणीति प्रतिपादितम्। चतुर्थे श्रौताश्रौतभेदेन देवानां द्वैविध्यं प्रतिपाद्य भस्मत्रिपुण्ड्रं श्रौतमूर्ध्वपुण्ड्रादिकञ्चाश्रौतमिति स्पष्टमुद्घोषितम्। पञ्चमे श्रुत्यर्थविचारं कृतवता पराशरेण-ब्राह्मणेन शिवस्य, क्षत्रियेण विष्णोः, वैश्येन ब्रह्मणः,

---

बृहद् धर्म० पु० १–२५–२७।

वृषलेन पुरन्दरस्य सम्बन्धः स्पष्टीकृतः, तथा ब्राह्मणो ब्राह्मणमेवोपधावति, इति न्यायेन वेदविद्भिर्ब्राह्मणैर्ब्राह्मणः शिव एवोपगन्तव्य इति निरूपितम्। षष्ठे वेद-गूढार्थं दर्शयता मुनिना वेदोक्तधर्मे त्रिपुण्ड्र-भस्मगुण्ठनरुद्रलिङ्गानि मुख्यतया प्रति-पादितानि। सप्तमे ब्राह्मणवैभवं वर्णयता मुनिना जन्मब्राह्मण-वेदब्राह्मण-ब्रह्म-ब्राह्मणेति त्रिविधा ब्राह्मणा निर्दिष्टाः। तत्र महादेवप्रसादाद् ब्राह्मणो लोके जायते। मनुष्याणां ब्राह्मणः श्रेष्ठः। सर्वदेवमयो ब्राह्मणः सर्वैः पूज्यः। अष्टमेऽध्याये विस्तरेण वेदरहस्यं वर्णयन् पराशर उक्तवान्-ज्ञानं द्विधा-एकं साक्षात्परं तत्त्वम् द्वितीयञ्च कारणाज्जन्यम्। तत्र कारणोत्पन्नं ज्ञानं द्विधा-एकं तत्वावेदकं- द्वितीयं मृषार्थ विषयकमिति। तत्वावेदकं ज्ञानं वेदान्तमात्रजन्यं ब्रह्मापरनामधेयम्। द्वितीयं मृषार्थविषयकं ज्ञानं मिथ्याज्ञानमिति। वेदादन्यत्र विज्ञानं नास्ति। नवमे- आह्नि-ककृत्यविचारः समासेन कृतः। दशमे निषेधमुखेन ब्रह्मचारिगृहस्थानामाचाराः सम्यक् प्रतिपादिताः। एकादशे पापकर्मिणां गणनाप्रसङ्गेन वैधकर्माणि परित्यज्य निषिद्ध-कर्माणि कुर्वतां, वेदवेदाङ्गादिकं विहाय पाञ्चरात्रकापा-लादिषु दीक्षितानां गणना तत्रैव कृता। द्वादशे अभक्ष्यविवेचनं त्रयोदशे ब्रह्महत्यादिपापानां प्रायश्चित्तं च संक्षेपेण वर्णितम्। पञ्चदशे वाराणसीवैभवं वर्णयता मुनिना वरणाया नास्याश्च आध्यात्मिकं स्वरूपं स्पष्टीकृतम्। षोडशे शिवपूजाविधिं संक्षेपेण प्रतिपाद्य सप्तदशे आत्मतत्त्वविवेचनं कृतवता पराशरेण कथितं यद् इदं सर्वं पुरोदृश्यमानं जगत् कस्मिंश्चिदधिष्ठाने अज्ञानेन शुक्तिकारजतवत् कल्पितं न तु वास्तविकमिति विस्तरेण प्रतिपादितम्। अष्टादशाध्याये शास्त्रलक्षणं कृत्वा सूत्र-भाष्यव्याख्यान-वार्तिकप्रकरणादीनां लक्षणं विधाय तैरात्मज्ञानसाधनता निरूपिता। अत्रैव मुक्तिस्वरूपमपि विस्तरेण प्रति-पादितम्। सा च विश्वमायानिवृत्तिरेव। विश्वमायानिवृत्तिर्विद्यया भवति, विद्या च वेदान्तवाक्याज्जायते। सा विद्या मुमुक्षोरेव भवति। मुमुक्षुत्वञ्च तीव्र-तीव्रतरोत्तरादिभेदेने बहुविधं प्रतिपादितम्।

एतेषां विवरणम् "अध्यायानुसारि विवरणम्" इति शीर्षकेण पृथक् प्रदत्तम्। अत्रत्यानां केषाञ्चिद् विषयाणां पर्यालोचनमपि "विषयपर्यालोचनम्" शीर्षकेण अन्यत्र प्रकरणे कृतम्। तत्र सृष्टिक्रमविचारो विस्तरेण पर्यालोचितः। यतो हि पुराणानामयं मुख्यो विषयः। तत्र पुराणसृष्टिं निदर्शयता मयाऽन्ये-षामपि दर्शनानां सृष्टिप्रक्रियाऽत्र संक्षेपेण प्रदर्शिता। अन्ते च पाराशरपुराणस्य सृष्टेः किं वैशिष्ट्यम्? इत्यपि प्रदर्शितम्। वाराणस्या माहात्म्यमपि यथा-यथमुपवर्णयताऽन्यत्र वर्णनैः सह यथाशक्यं तुलनाऽपि कृता। शिवपूजाविधिरपि अत्र दिङ्मात्रमन्यैः पुराणैः सह तुलनां कृत्वा उपवर्णितः। भस्मत्रिपुण्ड्ररुद्राक्ष-

महिमा तद्धारणप्रकारो मन्त्रादिकञ्च सर्वमत्र साङ्गोपाङ्गम् निरूपितम्। प्रायश्चित्तविचार आह्निककृत्यविचारोऽभक्ष्य-विचारश्चात्र यथायथं पर्यालोचिताः। अन्ते शास्त्र विमर्शः, मुक्तिस्वरूपं शिवस्वरूपञ्चास्य पुराणस्य सम्यक् पर्यालोचितम्।

आदौ पुराणपरिचयप्रसङ्गेन पुराणप्राचीनता, पुराणनित्यता, वेद पुराणयोः सम्बन्धः पार्थक्यञ्च, पुराणेतिहासयोः सम्बन्धः, पुराणोत्पत्तिः, पुराण-शब्दनिरुक्तिः, लक्षणं, संख्यादिकञ्च संक्षेपेणालोचितम्। ततः उपपुराणानां महत्त्वं प्रतिपाद्य तेषां संख्या-नामसंबन्धे विस्तृतं विवरणमुपस्थापितम्। तत्र कूर्मस्कन्दपद्मपुराणादिषु निबन्धग्रन्थेषु चोपपुराणानां यास्तालिकाः प्राप्यन्ते तासां सर्वासां विवरणमालोचनापूर्वकं निर्दिष्टम्। उपपुराणानामुत्पत्तिरपि अत्र पर्यालोचिता। तत्र पाराशरोपपुराणस्य स्थानमपि निर्धारितम्। त्रयोविंशति-स्थलेषु निर्दिष्टासु उपपुराणसूचीषु सर्वत्रास्य पुराणस्यादरेणोल्लेखः कृतः। क्वचित्प्रवरत्वेन, क्वचित्प्रथमत्वेन, क्वचिदपरत्वेन, क्वचित्परमत्वेन चास्य स्थानं निर्दिष्टम्। यथा-पराशरोक्तं 'प्रवरम्'[1] पराशरोक्तं प्रथमम्',[2] 'पराश-रोक्तमपरम्',[3] 'पराशरोक्तं परमम्'[4] इति। एतेनास्य पुराणस्य समाजे महानादरो व्यज्यते। अन्ते चास्य कालविवेचनं प्रस्तुतम्। तत्र डा० आर० सी० हाजरामहोदयस्य सरणिमनुसृत्यास्य कालो मया ईसवीयाब्दसार्धाष्टशतोत्तरमेक-सहस्रपर्यन्तो (ई०उ० ८५०-१०००) निर्धारितः।

पाराशरोपपुराणादन्यविशिष्टनिबन्धादिषु यानि वचनानि समुद्धृतानि तानि सर्वाणि अन्विष्य मया अत्र संकलितानि। तत्र प्राचीनतमो ग्रन्थः 'पाराशर-माधवीयः'। अनेनास्य पुराणस्य प्राचीनतोपादेयता च सिध्यति।

इदमुपपुराणं नाद्यावधि प्रकाशितम्। अस्य महत्त्वं प्राचीनत्वञ्च विज्ञाय मया स्वकीयः शोधविषयः—'पाराशरोपपुराणस्य समीक्षात्मकं सम्पादनम्' इत्यङ्गी-कृतः। अस्य सम्पादने मया सम्पूर्णानन्दसंस्कृतविश्वविद्यालय-सरस्वतीभवन ग्रन्थागारतो देवनागरीलिपिलिखिताः षट् हस्तलिखितपुस्तिकाः समालोचिताः। तत्र चतस्रः पूर्णाः सन्ति, याः क ख ग घ इति सङ्केतैः सङ्केतिताः। अन्ययोर्द्वयोरेका चतुर्भिः पत्रैः (४६, ४७, ४८, ४९) रहिताऽपूर्णा, अन्या च केवलमष्टादशाध्याया-त्मिका। इमे द्वे पुस्तिके क्रमशः ङ च इति संकेतद्वयेन संकेतिते। सर्वासामासां

१. चतु० चिन्ता० १ पृ० ५३–२–३, २. चतु० चिन्ता० २, १ पृ० २१

३. शब्दकल्प० उपपुराणशब्दे गरुड० १/२२३/१७–२०, ४. स्क० पु०प्र० ख० १/२/११-१५

हस्तलिखितपुस्तिकानां परिचयः पृथक् क ख ग घ ङ च शीर्षकैर्यथायथं प्रस्तुतो वर्तते ।

एवमत्र शोधप्रबन्धे पाठालोचनपूर्वकं पाराशरोपपुराणं यथाविधि सम्पादितं, संपाद्य च तन्निहितविषयाणां विश्लेषणपूर्वकं महत्त्वं प्रतिपादितम् । विषयविवेचने यथासंभवं श्रुतिस्मृतिपुराणादीनां प्राचीनानां, प्रामाणिकाधुनिकग्रन्थनिबन्धानां च प्रमाणानि समुद्धृतानि । उद्धरणसङ्केतश्चान्ते प्रकाशितः ।

———

पुराणपरिचयः

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

भारतीयवाङ्मये पुराणानामनुत्तमं स्थानमस्ति । पुराणवाङ्मयं वेदतोऽन्यूनं वेदभाष्यरूपं वेदवत्पूजितं भारतीयसमग्रजीवनधाराया बिम्बभूतं किमपि अपूर्वं वाङ्मयं लोके जागर्तितराम् । धार्मिकक्षेत्रे वेदादनन्तरं पुराणस्यैवाधिमान्यताऽस्ति । भारतीयेतिहासराजनीतिधर्मदर्शनसमाजसंस्कृतिज्ञानसाधनानि पुराणानि वेदेभ्योऽप्यधिकमादरभाञ्जि इति सडिण्डिमघोषः अस्माकं परम्परायाः । यथा—

'वेदार्थादधिकं मन्ये पुराणार्थं वरानने[१] ।
यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चेत्पुराणं संविद्यान्नैव स स्याद् विचक्षणः ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति[२] ॥'

पुराणेषु भारतस्य सामाजिकं सांस्कृतिकं धार्मिकञ्च जीवनं प्रतिबिम्बितमिवास्ति । सरलया भाषया क्रमबद्धकथाशैल्या च अत्र जटिला अपि विषयाः सुस्फुटीकृता इति महद् वैशिष्ट्यं पुराणानाम् । वेदानामध्ययनाध्यापनमुच्चवर्णेष्वेव (द्विजातिष्वेव) प्रचलति स्म, इतरेषां (शूद्रादीनां) कृते स (वेदः) न श्रुतिगोचरीभवतिस्म[३] । किन्तु पुराणानामवतारः सर्वजनहितायाभवत् । अर्थात् वेदस्यैव विषयाः लोककल्याणाय लौकिकभाषायां भगवता कृष्णद्वैपायनव्यासेन व्यासपद्धत्या पुराणेषु संग्रथिताः । अत्र प्रमाणानि—

'वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः[४] ।'
'पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम्[५] ।'
'आत्मा पुराणं वेदानाम्'[६]

---

१. नारदीय० २/२४/१७, २. वायु० १/२०१, ३. भागवत९ १/४/२३
४. नारदीय २/२४/१७, ५. स्कन्द रेवा० १/१८, ६. रेवा १/२२

पुराणप्राचीनता

वैदिकं वाङ्मयं संसारस्य प्राचीनतमं वाङ्मयमिति विदुषां निर्विवादं मतमस्ति। आभ्यन्तरप्रमाणानुसारेण वेदोत्पत्तिः सृष्टिसमकालिकी एव सिध्यति[१]। वेदानां भाष्यरूपं विपुलं पुराणवाङ्मयमति प्राचीनमेवेति पुराणनाम्नैव प्रतिभाति। पुराणशब्दस्यार्थ एवास्ति--

प्राचीनकालतो यद् जीवितं तत्पुराणम्[२]।

ऋग्वेदे पुराणशब्दस्य बहुश उल्लेखो वरीवर्ति[३]। किन्तु तत्र पुराणशब्दः प्राचीनता-बोधकः। अन्यत्र (९/९९/४) 'पुराणी' इति शब्दः प्रयुक्तः, स च गाथा-शब्दस्य विशेषरूपोऽस्ति। अनेन इदं प्रतिभाति यद् ऋग्वेदकाले काश्चिद् गाथा विद्यमाना आसन्, यासामुदयः प्राचीनकालिकः—ऋग्वेदकालिक। अथर्ववेदे पुराणशब्दो विशिष्टविद्यारूपेण प्रयुक्तोऽस्ति। तत्र ऋग्यजुःसामाथर्ववेदैः सह पुराणमपि तस्मादुच्छिष्टात् (यज्ञावशेषात्, जगच्छासकयज्ञमयात् परमात्मनो वा) उत्पन्ना बभूवुरिति समुद्‌दोषः कृतः[४]। तदनन्तरं ब्राह्मणारण्यकोपनिषत्सूत्रग्रन्थेषु[५] पुराणशब्दस्य बहुलः प्रयोगो दरीदृश्यते। अनेन इदं निश्चेतुं शक्यते यत् पुराणमपि वाङ्मयं वैदिककालिकम् उत्तरवैदिककालिकं वा।

पुराणनित्यता

पुराणमपि वेदवत् नित्यमित्यत्र नास्ति सन्देहलवः। यथा सृष्टेः प्रारम्भावस्थायां तत्कल्पीयो ज्ञानराशिः श्रुतिरूपेण ऋषीणां पवित्रान्तःकरणे प्रकटीभवति। तथैव पूर्वकल्पान्तरीया घटनावली पुराणरूपेण भावमयस्वरूपमादाय ऋषीणामन्तःकरणे प्रकाशीभवति। अत एव पुराणानां नित्यत्वं वेदवत् सर्वत्र प्रख्याप्यते।

---

१. तस्माद् यज्ञात् सर्वहुत. सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥
(ऋ० म० १० सू० ९० म० ७)

२. यस्मात्पुरा ह्यनितीदं पुराणं तेन तत्स्मृतम्। (वायु० १/२०३)

३. ऋ० ३/५४/९, ३/५८/६, १०/१३०/६

४. ऋचः सामानि छन्दांसि पुराणं यजुषा सह।
उच्छिष्टाद् जज्ञिरे सर्वे दिविदेवा दिवि श्रिताः ॥ (अथर्व० ११/७/२४)

५. गोपथ० पूर्व० १/१०, २/१०, शत० ११/५/६/८, ११/५।७।९, १४।६।१०।६, १३।४।३।१२-१३, तै० आ० २।९, बृह० उ० २।४।११, छा० उप० ७।२।२, ७।८।४, ७।२।१।

भेदस्तु ह्यानेव यद् वेदानां नित्यत्वं शब्दरुपेण आनुपूर्वीक्रमे भावरूपेण चोभयथापि, किन्तु पुराणानां नित्यत्वं तु केवलं भावद्वारेणैव। अत एव पुराण-प्रामाण्यमपि सर्वैरङ्गीक्रियते।

वेदपुराणयोः सम्बन्धः

वेदपुराणयोः घनिष्ठः सम्बन्धः। एतत्संबन्धिनी चर्चा महाभारते पुराणेषु च बहुत्र दृश्यते। यथा—

१. आत्मा पुराणं वेदानाम्[१]।
२. इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्[२]।
३. पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः[३]।
४. वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र[४] संशयः।
५. वेदार्थादधिकं मन्ये पुराणार्थम् ....[५]।
६. इतिहासपुराणञ्च पञ्चमो वेद उच्यते[६]।
७. श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्[७]।
८. सर्ववेदार्थसाराणि पुराणानि[८]।

वेदपुराणयोः पार्थक्यम्

विषयदृष्टया पुराणविद्या वेदविद्यातो भिन्ना इति निश्चप्रचम्। आरम्भत एव वेदविद्या यज्ञमयी (कर्मकाण्डमयी) वर्तते, ततो भिन्ना पुराणविद्या लोकवृत्तात्मिका च गीयते[९]। पुराणप्रामाण्यादपि अनयोर्भेदोऽभ्युपगम्यते। यथा—

उत्पन्नमात्रस्य पुरा ब्रह्मणोऽव्यक्तजन्मनः।
पुराणमेतद् वेदाश्च मुखेभ्योऽनुविनिःसृताः[१०]॥

× × ×

वेदान् सप्तर्षयस्तस्माज्जगृहुस्तस्य मानसाः।
पुराणं जगृहुस्तस्य मुनयस्तस्य मानसाः[११]॥

---

१. रेवा० १।२२, २. महा० आदि० १।२६७, ३. महा० आदि० १।८६, ४. प्रभा० २।९०, ५. तत्वसन्दर्भे पृ० ३८ (नारदपुराणतः), ६. भाग० १।४।२०, ७. काशी० २।९६, ८. नारदीय० १।९।९७ ९. 'लोकवृत्तमितिहासपुराणस्य विषयः' (न्यायभाष्ये ४।१।६१) 'इतिहासपुराणानि भिद्यन्ते लोकगौरवात्।' (कुमारिकाखण्डे ४०।१९८)

१०, मार्कण्डेय० ५४।२०, ११. मार्कण्डेय ५४।२३,

अत्रेदं तात्पर्यम्—ब्रह्मणो मुखेभ्यो विनिर्गतं पुराणं मुनिभिर्गृहीतं वेदाश्च ऋषिभिर्गृहीताः। अत्र ऋषिमुन्योर्भेदः कृतः। वायुपुराणे ऋषिशब्दस्यानेकेऽर्थाः कथिताः—

अपीत्येव गतौ धातुः श्रुतौ सत्ये तपस्यथ।
एतत्संनियतस्तस्मिन् ब्रह्मणा स कविः स्मृतः[१] ॥

'ऋषयो मन्त्रद्रष्टार-' इत्युक्त्यापि ऋषयः एव वेदमन्त्राणां द्रष्टारः कथिताः। ऋषेरपेक्षया मुनिः विशिष्टो भवति। यथा शङ्खस्मृतौ—

शून्यागारनिकेतः स्याद् यत्र सायंगृहो मुनिः[२]।

गीतायाम्—

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते[३] ॥

पुराणेतिहासयोः सम्बन्धः

पुराणमितिहासश्च भिन्नार्थकावपि अभिन्नार्थकौ। पुराणस्य व्युत्पत्तिलभ्योऽर्थः—पुराभवमिति 'पुराणम्'[४]। अर्थात्—प्राचीन कालिकी घटनावली। इतिहासस्य व्युत्पत्तिलभ्योऽर्थः—इतिह (पारम्पर्योपदेशेऽव्ययम्) तदस्मिन्नास्ते इति 'इतिहासः'[५]। अर्थात्—परम्पराप्राप्तवास्तविकघटनाचक्रम्। महाभारतं स्वीयवचनैरेव न केवलमितिहासः अपि तु इतिहासोत्तमः[६], सहैव पुराणमपि[७]। तथा च पुराणमपि स्वीयवचसा इतिहासः पुराणमुभयमेवास्ति[८]।

---

१. वायु० ५९।७९ २. शङ्ख ७/६। ३. गीता० २/५६।

४. पुरा भवमित्यर्थे 'सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युटुलौ तुट् च' इति पाणिनिसूत्रेण (४/३/२३) 'ट्यु' प्रत्यये कृते निपातनात् तुडभावे जाते पुराणमिति सिध्यति।

५. 'हलश्च' इति पाणिनिसूत्रेण (३/३/१२१) घञ्।

६. जयोनामेतिहासोऽयम्—(उद्योग० १३६/१८), 'इतिहासोत्तमादस्मात्'।

७. द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा (आदि० १/१७)।

८. इमं यो ब्राह्मणो विद्वानितिहासं पुरातनम्।
श्रृणुयात् श्रावयेद् वापि तथाऽध्यापयतेऽपि च ॥
धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च संमतम्।
कृष्णद्वैपायनेनोक्तं पुराणं ब्रह्मवादिना ॥ (वायु० १०३/४८, ५१)

अमरकोशे यल्लक्षणमितिहासस्य कृतं, तदेव महाभारतस्य नीलकण्ठीटीकायां पुराणस्यापि कृतम् । यथा—

इतिहासः पुरावृत्तम् (अमर० १/५/४)

पुराणं पुरावृत्तम् (नील० १/ /१)

शङ्कराचार्येण बृहदारण्यकोपनिषद्भाष्ये इतिहासपुराणयोर्भेदः कृतः । यथा–

इतिहास इति--उर्वशीपुरूरवसोः संवादादिः ।
पुराणम्—असद् वा इदमग्र आसीदित्यादि ।।

एवं प्राचीनतरग्रन्थेषु इतिहासपुराणयोर्विभाजनरेखा अतीव सूक्ष्मा आसीत् । पञ्चमशताब्द्याममरकोशकारः 'पुराणं पञ्चलक्षणम्' तथा 'इतिहासः पुरावृत्तम्' इति कथयामास । ततोऽनयोर्भेदः पूर्णरूपेण परिस्फुटीबभूव । अर्थात् सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितानि दानतीर्थव्रतावताराश्च यत्र सन्ति तत्पुराणम्, ततो भिन्नः प्राचीनाख्यानात्मको नानाविषयसंवलितो लोकव्यवहारयुक्तश्च इतिहासः।

पुराणोत्पत्तिः

पुराणानामुत्पत्तिविषये विभिन्ना विचारधाराः सन्ति । पुराणेषु तदुत्पत्तिविषये मतद्वयं प्रतिपादितम् । एकं मतमस्ति यत्-ब्रह्मणैव सर्वशास्त्राणां निर्माणात् पूर्वं पुराणं स्मृतम्, ततस्तस्य मुखेभ्यो वेदा विनिर्गता इति[२] । द्वितीयं मतमस्ति यत्-पुराणार्थविशारदो वेदव्यासो वेदविभागानन्तरं प्राचीनाख्यानोपाख्यानगाथाकल्पशुद्धिभिः सह पुराणसंहितां निर्ममे[३] । निर्माय च स्वशिष्याय लोमहर्षणसूताय तां शिक्षितवान् । तस्य सूतस्य षट् शिष्या आसन्—१-सुमतिः, २-अग्निवर्चाः, ३-मित्रयुः, ४-शांसपायनः, ५-अकृतव्रणः, ६-सार्वणिः । तेषु अकृतव्रणः, सार्वणिः, शांसपायनश्चेति त्रयः शिष्या लौमहर्षिणीं मूलसंहितामाधारीकृत्य तिस्रोऽन्याः पुराणसंहिता निरमाशिषुः । एवं चतस्रो मूलसंहिता निर्मिताः ।

---

१. वायु० ५९/७९

२. पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
तदन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ।।
(वायु० १/२०३, ब्रह्माण्ड १/५८, मत्स्य० ५३।३)

३. आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ।।
(विष्णु. ३/६/१५)

अथर्ववेद उक्तम्—ऋग्वेदः, सामवेदः, यजुर्वेदः, छन्दांसि, पुराणं, दिव्यलोकाश्रिता देवाश्च यज्ञोच्छिष्टादुत्पन्ना बभूवुः[१]। ब्राह्मणग्रन्थेषु पुराणं वेदाभिन्नं प्रतिपादितम्[२]। उपनिषत्सु प्रतिपादितं यत् –वेदचतुष्टयेन सह पुराणमपि महतो भूतस्य निःश्वासरूपम्[३]।

आचार्यबलदेवोपाध्यायेन पुराणोत्पत्तिविषये पुराणविमर्शनामके ग्रन्थे इत्थं मतमुपन्यस्तम्—

पुराणविकासे स्पष्टतो द्वे धारे परिलक्षिते भवतः। तत्र एका व्यासपूर्वधारा, अपरा च—व्यासोत्तरधारा। व्यासस्य मुख्यं कार्यं पुराणसंहिताया निर्माणमासीत्। तेन पुराणानां सुव्यवस्थितं रूपं विधाय महत्त्वपूर्णं कार्यं कृतम्। किन्तु ततोऽपि पूर्वं (वैदिकयुगे) किमपि पुराणसाहित्यमासीत्, यल्लोकप्रचलितं सदपि अव्यवस्थितमितस्ततो विकीर्णं लोकवृत्तात्मकं विद्याविशेषमासीत्। यतो हि प्राचीनग्रन्थेषु पुराणशब्द एव प्रयुक्तो न तु पुराणसंहिताशब्दः। तथा च पुराणाविर्भावनिर्देशो मत्स्यपुराणे (३/३४), वायुपुराणे (१/५४) च वेदाविर्भावतः प्राक् कृतः। यथा—

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम्।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः॥

(मत्स्य० ३/३४)

अत्रोक्तं 'शतकोटिप्रविस्तरम्' इति पदं पुराणस्यानिश्चितं विप्रकीर्णं च किञ्चन रूपं द्योतयति। न तु निश्चितं रूपम्। अत्र पुराणशब्दस्य पौराणिकी व्युत्पत्तिरपि सहायिकाऽस्ति। यथा –

पुरा परम्परां वष्टि पुराणं तेन तत्स्मृतम्।

(पद्म० ५/२/५३)

अस्मात्पुरा ह्यनतीदं पुराणं तेन तत्स्मृतम्।

(वायु० १/१०३, १०३/५५)

फलतः प्राचीनतमं पुराणं कस्यचिद्ग्रन्थविशेषस्य बोधकं नासीत्, अपि तु विद्याविशेषस्य।

उपाध्यायमहोदयेनात्रैवान्याप्येका पुराणावतरणकल्पना स्कन्दमत्स्यपद्मपुराणप्रमाणैः कृता। सा चेत्थम्—

१. अथर्व. ११/७/२४, २. शत० १३/४/३/११, ३. बृहदारण्यक. २/४/१०

कल्पान्तरे त्रिवर्गसाधनं पुराणमेकमेवासीत्, तच्च शतकोटिप्रविस्तरं विशालं वाङ्मयम् आसीत्। समयपरिवर्तनेन लोकैस्तस्याग्रह्यतां मत्वा भगवान् विष्णुर्व्यासरूपेणावतीर्य लोककल्याणाय चतुर्लक्षश्लोकपरिमाणं कृत्वा तदेव अष्टादशधा विभज्य ब्रह्मपद्मविष्णुभागवतादिनामभिः प्रचारितवान्[1]।

पुराणोत्पत्तिविषये प्रो० शिवदत्तज्ञानी कथयति यत्–आदौ पुराणमेकमासीत्, तस्य स्वरूपमपि आख्या नात्मकमासीत्। ततस्तत्स्वरूपे वृद्धिरभूत्। तदा तस्य भागद्वयमभवत्। तत्र प्रथमे भागे महाभारतात्पूर्ववर्त्तिराज्ञां जीवनचरितं प्राचीनाख्यानानाञ्च सङ्कलनमासीत्, द्वितीये च भागे महाभारतोत्तरवर्त्तिराज्ञां वंशावल्या जीवनवृत्तस्य चसंग्रह आसीत्। तदनन्तरं यदा पुराणसाहित्ये मन्वन्तरादिविषयाः संयोजितास्तदा तदेव पुराणसाहित्यं सर्गादिपञ्चलक्षणस्वरूपं बभूव। पुनश्च गुप्तकाले यदा पुराणानां विष्णु-मार्कण्डेयाग्निभागवताद्यष्टादशभागेषु पृथक्-पृथक् विभाजनं जातं तथा तत्र साम्प्रदायिकानां देवानां स्तोत्रादिकं काव्यशास्त्रव्याकरणादिविषयाणां समावेशो जातस्तदा तदेव दशलक्षणात्मकं विश्वकोशरूपात्मकं वा बभूव[2]। एवं तेन पुराणसाहित्यस्य चतसृषु अवस्थासु क्रमिको विकासः प्रदर्शितः। यथा—

(१) वैदिककालादारभ्य महाभारतकालं यावदाख्यानावस्था।

(२) महाभारतकालतः ईसवीयपूर्वपञ्चमशताब्दींयावत् पुराणविभाजनावस्था भविष्यवंशावल्यवस्था वा।

(३) ईसवीयपूर्वपञ्चशताब्दीतः ईसवीयप्रथमशताब्दीं यावत् पञ्चलक्षणावस्था।

(४) ईसवीयप्रथमशताब्दीतः सप्तमशताब्दीं यावत् साम्प्रदायिकी विश्वकोशरूपात्मिका वा अवस्था।

पूर्वोक्तमतानां समालोचनेनायं निष्कर्षो जायतेयत् पुराणोत्पत्तिः वेदसमकालिकी अस्ति, ततस्तस्य पुराणवाङ्मयस्य ईसवीयसप्तमशताब्दीं यावत् क्रमशो विकासोऽभवत्। एवञ्च तस्य पञ्चलक्षणात्मकं दशलक्षणात्मकञ्च विस्तृतस्वरूपमाख्यानोपाख्यानादिसमन्वितं संबभूव।

पुराणशब्दस्य निरुक्तिः—

पुराणशब्दस्य अनेका निरुक्तयः पुराणेषु वर्तन्ते।

---

१. स्कन्द० (रेवा० १/२३/३०), पद्म० सृष्टि० अ० १, मत्स्य० अ० ५३

२. 'पुराणम्' (पत्रिका). भागः–२, अंकः–१, २)

(१) वायुपुराणे-पुरा अनति = जीवति यत् तत्पुराणम्[१] ।

(२) पद्मपुराणे-पुरा परम्परां वष्टि = कामयते यत्तत्पुराणम्[२] ।

(३) ब्रह्माण्डपुराणे-पुरा एतद् अभूत् इति पुराणम्[३] ।

(४) निरुक्ते-पुरा नवं भवति = प्राचीनमपि यन्नवं भवति तत्पुराणम्[४] ।

(५) मत्स्यपुराणे-पुरातनकालस्य यद्विवरणं तत्पुराणम्[५] ।

(६) पाणिनिव्याकरणे-पुरा भवमिति पुराणम्[६] ।

आद्यां पाणिनीयां च व्युत्पत्तिं विहायान्याः सर्वा निरुक्तय एव न तु व्युत्पत्तयः ।

पुराणलक्षणम् –

श्रीमद्भागवतातिरिक्तपुराणेषु-सर्गः (सृष्टिः), प्रतिसर्गः (लयः पुनः सृष्टिश्च), वंशः (देवानामृषीणाञ्च वंशावली) मन्वन्तराणि (मनुकालविभागः), वंशानुचरितम् (राज्ञां वंशवृत्तम्) इति पञ्चलक्षणलक्षितं पुराणं प्रतिपादितम्[७] ।

श्रीमद्भागवते (१२/७/९)-सर्गः (सृष्टिः), विसर्गः (विविधा सृष्टिः), वृत्तिः (जीवननिर्वाहसामग्री), रक्षा (भगवदवताराः) मन्वन्तराणि (मनुकालविभागः),

---

१. यस्मात्पुरा ह्यनतीदं पुराणं तेन तत्स्मृतम् ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते (वायु० १/२०३)

१. पुरा परम्परां वष्टि पुराणं तेन तत्स्मृतम् । (पद्म० ९/२/५३)

३. यस्मात्पुरा ह्यभूच्चैतत्पुराणं तेन तत्स्मृतम् (ब्रह्माण्ड० १/१/१७३)

४. पुरा नवं भवति 'निरुक्त० ३/१९'

५. पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः । (मत्स्य० ५३/७२)

६. पुरा भवमित्यर्थे 'सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यस्त्युट्युलौ तुट् च' (पा० सू० ४/३/२३) इति सूत्रेण ट्युप्रत्यये कृते 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' (पा० सू० २/१/४९) इति सूत्रेण निपातनात् तुडभावे जाते योरनादेशे कृते पुराणशब्दो निष्पद्यते ।

७. सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥
(विष्णु० ३/६/२४, मार्कण्डेय० १३४/१३, अग्नि० १/१४, भविष्य० २/५, ब्रह्मवैवर्त्त० १३३/६, वाराह० २/४, स्कन्द०प्रभास० २/८४, कूर्म० १/१२, मत्स्य० ५३/६४, गरुड० (आचार०) २/२८, ब्रह्माण्ड० (प्रक्रिया०) १/३८, शिव० (वायवीय०) १/४१ ।

वंशः (ऋषिदेववंशावली), वंशानुचरितम् (राज्ञां वंशविवरणम्), संस्था (प्रलयः), हेतुः (जीवः), अपाश्रयः (भगवान्) इति दशलक्षणलक्षितं पुराणं प्रतिपादितम्[१]।

श्रीमद्भागवते अन्यत्र (२/१०/१)-सर्गः (सृष्टिः), विसर्गः (विविधा-सृष्टिः), स्थानम् (वैकुण्ठविजयः), पोषणम् (भगवदनुग्रहः), ऊतयः (कर्मवासनाः), मन्वन्तराणि (कालगणना) ईशानुकथा (भगदवतारकथाः), निरोधः (प्रलयः), मुक्तिः (जीवस्य स्वरुपेऽवस्थितिः), आश्रयः (भगवान्) इति दशलक्षणलक्षितं पुराणं कथितम्[२]। अत्र नामभेदेन पूर्वोक्तानि लक्षणान्येव कथितानि।

पुराणानां संख्या नामानि च-

प्राचीनकालत एव पुराणानां संख्या अष्टादश (१८) एव। एवमष्टादश-पुराणानां नामानि प्रायः सर्वेषु पुराणेषु उपलभ्यन्ते। देवीभागवते आद्यक्षर-निर्देशेन अष्टादशपुराणानां नामानि एकेनैव श्लोकेन निर्दिष्टानि सन्ति। यथा—

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापद् लिङ्गकूष्कानि पुराणानि पृथक् पृथक्॥

(देवीभागवत० १/३/२)

अर्थात्–मद्वयम् = मत्स्यमार्कण्डेयपुराणे, भद्वयम् = भागवतभविष्यपुराणे, ब्रत्रयम् = ब्रह्मब्रह्मवैवर्त्तब्रह्माण्डपुराणानि, वचतुष्टयम् = विष्णुवायुवामनवाराह-पुराणानि, अनापद्लिङ्गकूष्कानि = अग्निनारदपद्मलिङ्गगरुडकूर्मस्कन्दपुराणानि। मत्स्यपुराणेऽपि[३] इमानि एव अष्टादश पुराणानि कथितानि।

विष्णुभागवतादिषुराणेषु[४] अष्टादशपुराणानां नामनिर्देशो भिन्नरूपेण दृश्यते। यथा—

---

१. सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः॥ (भाग० १२/७/९)

२. अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः॥ (भाग० २/१०/१)

३. मत्स्य० ५३/१३/५६

४. ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा।
तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्॥
आग्नेयमष्टमञ्चैव भविष्यं नवमं स्मृतम्।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम्॥

१. ब्रह्मपुराणम्, २. पद्मपुराणम्, ३. विष्णुपुराणम्, ४. शिवपुराणम्, ५. भागवतपुराणम्, ६. नारदीयपुराणम्, ७. मार्कण्डेयपुराणम्, ८. अग्निपुराणम्, ९. भविष्यपुराणम्, १०. ब्रह्मवैवर्त्तपुराणम्, ११. लिङ्गपुराणम्, १२. वाराहपुराणम्, १३. स्कन्दपुराणम्, १४. वामनपुराणम्, १५. कूर्मपुराणम्, १६. मत्स्यपुराणम्, १७. गरुडपुराणम्, १८. ब्रह्माण्डपुराणम्।

अत्र सूच्यां वायुपुराणस्य स्थाने शिवपुराणस्योल्लेखः कृतः। एवं शिवपुराणं वायुपुराणमित्युभयमपि पुराणं महापुराणत्वेन निर्दिष्टम्। तथैव भागवतमिति पदेन श्रीमद्भागवतं देवीभागवतं चेति पुराणद्वयं महापुराणत्वेन परिगण्यते। इत्थं महापुराणानां संख्याः विंशतिः सन्ति। वस्तुतस्तु १८ महापुराणानि सन्ति। अस्मिन् विषये 'पुराणविमर्श' नामकग्रन्थो द्रष्टव्यः[१]।

उपपुराणानां महत्त्वम्—

सर्वेषु एव आस्तिकदर्शनेषु दार्शनिकनिबन्धेषु महाकवीनां काव्यादिषु च वेदादनन्तरं यस्य शास्त्रस्य प्रकृष्टप्रमाणतया अभ्युपगतं मतं स्वीकृतञ्च, तस्य पुराण-नाम्ना प्रसिद्धिः।

'पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्[२]' उताहो 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्[३]' यद्वा 'यस्य निःश्वसितं वेदाः पुराणानि पृथक् पृथक्'[४] इत्यादिषु सर्वत्रैव पुराणपदेन महापुराणस्यैव बोधो जागर्त्ति। किन्तु हन्त? उपपुराणेषु अनादरः असम्मानश्च पण्डितानां परम्पराशीलितबुद्धिं न प्रकाशयतः। वस्तुतस्तु उपपुराणपदस्य 'उप' इत्युपसर्गो न कदापि न्यूनतां बोधयति, नापि 'उप' इत्युपसर्गः सामीप्यार्थकः, किन्तु अस्माकं मते 'उपोऽधिके च[५]' इति पाणिनीयेन सूत्रेण अत्र अधिके च द्योत्ये उप इत्यव्ययपदस्य कर्मप्रवचनीयसंज्ञा। यथा—'उप परार्धे हरेर्गुणाः' इत्यत्र परार्धाद् अधिका हरेर्गुणा भवन्ति। (यस्मादधिके यस्य चेश्वरवचनं तत्र सप्तमी[६]) तथा अत्रापि इमानि यानि पुराणेषु उप=पुराणेभ्योऽधिकानि

वाराहं द्वादशं चैव स्कान्दं चात्र त्रयोदशम्।
चतुर्दशं वामनञ्च कौर्मं पञ्चदशं तथा॥
मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम्।
महापुराणान्येतानि ह्यष्टादश महामुने॥
(विष्णु० ३/६/२०–२४, भाग० १२/७/२३–२४)

१. लेखकः–पण्डितबलदेवोपाध्यायः, प्रका० चौखम्भा विद्याभवन, वाराणसी।

२. वायु० १/२०३, ब्रह्माण्ड० १/५८, मत्स्य० ५३/३

३. वायु० १/२००–१, ४. १/४/८७ (पा०), ५. पा० १/४/८७, ६. २/३/९ (पा०)

तान्येव उपपुराणसंज्ञकानि शास्त्राणि । अनया दृष्टया नवीनेन केनचिद् व्याख्यानेन उपपुराणानां महत्त्वं गौरवञ्च पुराणेभ्योऽधिकं, न कदापि न्यूनम् ।

स्वतन्त्ररूपेण उपपुराणानां स्थितिरवश्यमेव स्वीकरणीया । निबन्धकारा यथा पुराणेभ्यः स्थलविशेषानुद्धृत्य स्वमतानि स्थापयामासुः तथा उपपुराणेभ्योऽपि कानिचन स्थलानि कञ्चन अंशं यथायथं स्वमतपोषणाय उद्धृत्य उपपुराणानां स्वातन्त्र्यं स्वीचक्रुः । भुवि बहुत्र यथा पुराणानि मातृकामग्नानि सन्ति तथैव पृथिव्यां सर्वत्र पाठशालायां ग्रन्थागारेषु चतुष्पाठिषु विश्वविद्यालयेषु प्राच्यविद्यासंस्थानेषु च बहवो मातृकामग्नानामुपपुराणानामपि विवरणं स्वतन्त्ररूपेण उपलभ्यते । उपपुराणानि आकारेण संख्यया वर्णनात्मकविवरणप्रदानेन न केवलं पुराणानि अतिक्रमन्ते, अपि तु विषयमाहात्म्यात् दार्शनिकतत्त्वविश्लेषणात् सृष्टिस्थितिसंहारादिपरिचयात्मकविवरणप्रदानगाम्भीर्यात् सौर-शाक्त-शैववैष्णवगाणपत्यानां पञ्चायतनानां तथा अन्येषामपि पूजाप्रकारबीजरहस्यविकासक्रमोन्नयनपद्धतिस्वीकरणात् भूगोल-खगोलेत्याद्यनुशीलनात् सर्वेषां पण्डितधुरन्धराणामादरणीयानि, नात्र विद्यते कश्चित्सन्देहलवः । महापुराणानां संख्या तु प्रायशोऽष्टादश एव किन्तु उपपुराणाानि तु शताधिकानि सन्ति । तथा चोच्यते—

अन्याश्च संहिताः सर्वाः मारीचकापिलादयः ।
सर्वत्र धर्मकथने तुल्यसामर्थ्यमुच्यते[१] ॥

रामायणमहाभारतादिग्रन्थानां सारांशः महापुराणेषु विद्यते, अत एव महापुराणानि उपपुराणेभ्यो वैशिष्टयमवगाहन्ते, इदमपि न समीचीनम्, यतो हि कुत्रचिद् उपपुराणेषु अपि रामायणस्य महाभारतस्य चापि कथांशो यथायथरूपेण विद्यते । महापुराणानां मतानुसारेण यद्यपि उपपुराणानि तेषामुपभेदा एव, अतएव तानि न स्वातन्त्र्यमर्हन्ति, तथापि अयं महापुराणानां ढक्कानिनादः कर्णकुहरे न मधुधारां वमति, नापि वस्तुस्थितिरेतादृशी । यतो हि एतेषां स्वतन्त्ररूपेण स्थितिः सर्वैरेव स्वीक्रियते ।

उपपुराणानां संख्या नामानि च–

महापुराणपरम्परानुसारेण[२] उपपुराणानि अपि अष्टादशैव कथितानि ।

---

१. बृहद्धर्म० १/२५/२७

२. महापुराणशब्देन अष्टादशमुख्यपुराणानि एव कथ्यन्ते भागवते–१२/७/१० तथा २२ ।

किन्तु तेषां नामानि पुराणेषु[१] उपपुराणेषु[२] निबन्धग्रन्थेषु[३] अन्यत्र[४] च विभिन्नानि कथितानि। डा० आर० सी० हाजरा महोदयेन महता परिश्रमेण उपपुराणानामेका तालिकानेकग्रन्थेभ्य उद्धृत्य प्रकाशिता[५]। तत्र परस्परं महान् भेदो दरीदृश्यते। तदवलोकनेन इदं स्पष्टं प्रतिभाति यत् उपपुराणानि न केवलमष्टादशैव, अपि तु ततोऽधिकानि-महाधिकानि-सन्ति। उद्धृतसूचीतः पृथङ्नामान्यपि उपपुराणानि कानिचित् पाण्डुलिपिरूपेण उद्धरणसङ्केतरूपेण च प्राप्यन्ते। सा च तालिका ज्ञान-सौकर्याय अधो निर्दिश्यते—

१) कूर्मपुराणे–(१/१/१७-२०)–

(१) आद्यं–सनत्कुमारोक्तम्, (२) नारसिंहम्, (३) स्कान्दम् (कुमारोक्तम्), (४) शिवधर्मम् (साधान्नन्दीशभाषितम्), (५) दुर्वाससोक्तम् (आश्चर्यम्), (६) नारदोक्तम्, (७) कापिलम्, (८) वामनम्, (९) उशनसेरितम्, (१०) ब्रह्माण्डम्, (११) वारुणम्, (१२) कालिका, (१३) माहेश्वरम्, (१४) साम्बम्, (१५) सौरम् (सर्वार्थसञ्चयम्), (१६) पराशरोक्तम्, (१७) मारीचम्, (१८) भार्गवम्[६]।

---

१. कूर्म० १/१/१७-२०, स्कन्द० सौर०, स्कन्द० रेवा० १/४६-५२, स्कन्द० प्रभास० १/२/११-१५, स्कन्द० सूत० शिवमाहात्म्य० १/१३-१८, गरुड० १/२२३/१७-२०, पद्म० पाताल० ११९/९४-९८, देवीभाग० १/३/१३-१६, ब्रह्मवैवर्त०।

२. बृहद्धर्म० १/२५-/२३-२६, पाराशर० १/२८-३१, बृहद्औशनस० (विन्ध्यमाहात्म्य०) अ० ४, वारुण. अ० १, एकाम्र० १/२० २३।

३. नित्याचारप्रदीपे, सलमासतत्त्वे, परिभाषाप्रकाशे, चतुर्वर्गचिन्तामणौ।

४. भक्तिरत्नाकरे, प्रस्थानभेदे, शब्दकल्पद्रुमे।

५. 'स्टडीज् इन् दि उपपुराणाज्' नामकग्रन्थे पृष्ठे ४-११।

६. आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्॥
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम्॥
कापिलं वामनं चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणं चैव कालिकाह्वयमेव च॥
माहेश्वरं तथा साम्बं सौरं सर्वार्थसञ्चयम्।
पराशरोक्तं मारीचं तथैव भार्गवाह्वयम्॥
(कूर्म० १/१/१७-२०)

(२) नित्याचारप्रदीपे[1] (कूर्मपुराणानुसारेण) (१ पृ० १९)–

१. सनत्कुमारीयम्, २. नारसिंहम्, ३. नन्दिपुराणम्, ४. शिवधर्मम्, ५. दुर्वासस्पुराणम्, ६. नारदीयपुराणम्, ७. कापिलम्, ८. वामनम्, ९. औशनसम्, १०. ब्रह्माण्डम्, ११. वारुणम्, १२. कालिका, १३. माहेश्वरम्, १४. साम्बम्, १५. सौरम्, १६. पराशरोक्तम्, १७. मारीचम्, १८. भार्गवम्[2]।

(३) रघुनन्दनकृतस्य स्मृतितत्त्वग्रन्थस्य 'मलमासतत्त्व' भागे–(कूर्मपुराणानुसारेण) (१/पृ० ७९/२,३)–

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. वायवीयम् (कुमारोक्तम्), ४. शिवधर्मम्, ५. दुर्वाशसोक्तम् (आश्चर्यम्), ६. नारदीयम्, ७-८–नन्दिकेश्वरयुगम्, ९. उशनसेरितम्, १०. कापिलम्, ११. वारुणम्, १२. कालिका, १३. माहेश्वरम्, १४. साम्बम्, १५. दैवम् (सर्वार्थसिद्धिदम्), १६. पराशरोक्तम्, (अपरम्), १७. मारीचम्, १८. भास्करम्[3]।

(४) वीरमित्रकृतवीरमित्रोदयस्य परिभाषाप्रकाशे (कूर्मपुराणानुसारेण)–

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. नान्दम् (कुमारोक्तम्), ४. शिवधर्मम्, (साक्षान्नन्दीशभाषितम्), ५. दुर्वाससोक्तम्, (आश्चर्यम्), ६. नारदीयम्, ७. कापिलम्, ८. मानवम्, ९. उशनसेरितम्, १०. ब्रह्माण्डम्, ११. वारुणम्, १२. कालिका १३. माहेश्वरम्, १४. साम्बम्, १५. सौरम्, १६. पराशरोक्तम्

---

१. ले० नरसिंह बाजपेयी।

२. अत्र प्रथमतालिकानिर्दिष्टस्य 'स्कान्दम्' इत्यस्य स्थाने 'नन्दिपुराणम्' इति लिखितम्।

३. अत्र प्रथमतालिकानिर्दिष्टस्य तृतीयं 'स्कान्दम्' इत्यस्य स्थाने 'वायवीयम्'(कुमारोक्तम्), सप्तमं 'कापिलम्', अष्टमं 'वामनम्' इत्यस्य स्थाने 'नन्दिकेश्वरयुगम्', दशमं 'ब्रह्माण्डम्' इत्यस्य स्थाने 'कापिलम्', पञ्चदशं 'सौरम् (सर्वार्थसञ्चयम्)' इत्यस्य स्थाने 'दैवम्' (सर्वार्थसिद्धिदम्) अष्टादशं 'भार्गवम्' इत्यस्य स्थाने 'भास्करम्' इति लिखितं वर्तते। तथा च 'पराशरोक्तम्' इत्यस्य स्थाने 'पराशरोक्तमपरम्' इति लिखितम्। अनेन इदं सूच्यते यत् अन्यदपि पराशरोक्तपुराणं किञ्चिदस्ति। मन्ये तत्र विष्णुपुराणे संकेतः—तस्य पराशरोक्तत्वात्।

(अपरम्), १७. मारीचम्, १८. भार्गवम्[१] ।

(५) हेमाद्रिकृतचतुर्वर्गचिन्तामणिग्रन्थस्य प्रथमभागे (कूर्मपुराणानुसारेण)–

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. नान्दम्, (कुमारोक्तम्), ४. शिवधर्मम् (साक्षान्नन्दीशभाषितम्), ५. दुर्वाससोक्तम् (आश्चर्यम्), ६. नारदोक्तम्, ७. कापिलम्, ८. मानवम्, ९. उशनसेरितम्, १०. ब्रह्माण्डम्, ११. वारुणम्, १२. कालिका, १३. माहेश्वरम्, १४. साम्बम्, १५. सौरम्, (सर्वाथसञ्चयम्), १६. पराशरोक्तम् (प्रवरम्), १७-१८. भागवतं द्वयम्[२] ।

(६) हेमाद्रिकृतचतुर्वर्गचिन्तामणिग्रन्थस्य द्वितीयभागे (कूर्मपुराणानुसारेण)–

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. नान्दम् (कुमारोक्तम्), ४. शिवधर्मम्, ५. दुर्वाससोक्तम्, (आश्चर्यम्), ६. नारदोक्तम्, ७. कापिलम्, ८. मानवम्, ९. उशनसेरितम्, १०. ब्रह्माण्डम्, ११. वारुणम्, १२. कालिका, १३. माहेश्वरम्, १४. साम्बम्, १५. सौरम् (सर्वार्थसंचयम्), १६. पराशरोक्तम्, (प्रथमम्), १७-१८. भागवतद्वयम्[३] ।

(७) शब्दकल्पद्रुमे (कूर्मपुराणानुसारेण)–

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. वायवीयम्, (कुमारेणानुभाषितम्), ४. शिवधर्मम् (साक्षान्नन्दीशभाषितम्), ५. दुर्वाससोक्तम् (आश्चर्यम्),

---

१. अत्र प्रथमतालिका निर्दिष्टस्य तृतीयं 'स्कान्दम्' इतयस्य स्थाने 'नान्दम्', अष्टमं 'वामनम्' इत्यस्य स्थाने 'मानवम्' इति लिखितम् । अत्रापि 'पराशरोक्तम् 'इत्यस्य स्थाने 'पराशरोक्तमपरम्' इत्यस्योल्लेखात् पराशरोक्तस्यापरस्य कस्यचित्पुराणस्य संकेतः ।

२. अत्र प्रथमतालिकानिर्दिष्टस्य तृतीयं 'स्कान्दम्' इत्यस्य स्थाने 'नान्दम्', अष्टमं 'वामनम्' इत्यस्य स्थाने 'मानवम्', षोडशं 'पराशरोक्तम्' इत्यस्य स्थाने 'पराशरोक्तं प्रवरम्' सप्तदशाष्टादशयोः 'मारीचभार्गवयोः' स्थाने भागवतद्वयस्योल्लेखः कृतः ।

अत्र पराशरोपपुराणस्य सर्वेभ्य उपपुराणेभ्यः प्रवरत्वं कथितम् ।

३. अत्रापि तृतीयं 'नान्दम्' (कुमारोक्तम्), अष्टमं 'मानवम्', षोडशं 'पराशरोक्तम् प्रथमम्' सप्तदशाष्टादशं भागवद्वयमेवेरितम् । अत्रापि पाराशरोपपुराणस्य प्राथम्येन निर्देशः । अनेन तस्य महत्त्वमुररीकृतं सर्वेषूपपुराणेषु ।

६. नारदीयम्, ७. नन्दिकेश्वरयुगम् ८. उशनसेरितम्, ९. कापिलम्, १०. वारुणम्, ११. साम्बम्, १२. कालिका, १३. माहेश्वरम्, १४. पाद्मम्, १५. दैवम् (सर्वार्थसञ्चयम्), १६. पराशरोक्तम् (अपरम्), १७. मारीचम् १८. भास्करम्[१]।

(८) स्कन्दपुराणस्य सौरसंहितायाम्–

१-आद्यं सनत्कुमारोक्तम्, २-नारसिंहम्, ३-स्कान्दम् (कुमारोक्तम्), ४-शिवधर्मम् (नन्दिनोक्तम्), ५-दुर्वाससोक्तम्, ६-नारदीयम्, ७-कापिलम्, ८-मानवम्, ९-उशनसेरितम्, १०-ब्रह्माण्डम् (पुण्यम्), ११-वारुणम्, १२-कालीपुराणम् (कालकण्ठम्), १३-वाशिष्ठ-लिङ्गम् (माहेश्वरम्), १४-साम्बम् (सुसूक्ष्मम्), १५-सौरपुराणम् (सावित्रम्), १६-पाराशर्यम्, १७-मारीचम् १८-भार्गवम्[२]।

(९) स्कन्दपुराणस्य रेवाखण्डे (१/४६-५२)–

१-सौरम् (ब्रह्मपुराणस्य खिलं, पुण्यं, शिवकथाश्रयं, संहिताद्वयसंयुक्तम् (तत्र प्रथमा संहिता सनत्वकुमारोक्ता द्वितीया च सूर्यभाषिता) सनत्कुमारनाम्नापि विख्यातम्) २-नारसिहम् (पद्मपुराणेन संबद्धम्,) ३-नन्दापुराणम् (वैष्णवेन पुराणेन संबद्धम्), ४-शिवधर्मम् (वायुपुराणेन संबद्धम्), ५-दौर्वाससम् (भागवतेन संबद्धम्), ६-नारदोक्तम् (भविष्यपुराणेन संबद्धम्), ७-कापिलम् ८-मानवम् ९-उशनसेरितम्, १०-ब्रह्माण्डम्, ११-वारुणम्, १२-कालिकाख्यम्, १३-माहेश्वरम्, १४-साम्बम्, १५-सौरम् (सर्वार्थसंचयम्), १६-पाराशरम् १७-भागवतम्, १८-कौर्मम्[३]।

---

१. अत्र तृतीयं 'स्कान्दम्' इत्यस्य स्थाने वायवीयम् (कुमारेणानुभाषितम्), सप्तमं 'कापिलम्' इत्यस्य स्थाने नन्दिकेश्वरयुगम्, चतुर्दशं 'साम्बम्' इत्यस्य स्थाने 'पाद्मम्' पञ्चदशं 'सौरम्' इत्यस्य स्थाने 'दैवम्', अष्टादशं 'भार्गवम्' इत्यस्य स्थाने 'भास्करम्' इति लिखितम्। तथा च अष्टमं 'वामनम्' इत्यस्य स्थाने 'कापिलम् (७)', दशमं 'ब्रह्माण्डम्' इत्यस्य स्थाने 'साम्बम् (१४) 'इत्युल्लेखः। अत्रापि 'पराशरोक्तमपरम्' इत्यस्योल्लेखोऽति। अनेन इदं ज्ञायते यत् पराशरेण मुनिना अन्यदपि पुराणं निर्मितम्।

२. अत्र अष्टमं 'वामनम्' इत्यस्य स्थाने 'मानवम्', त्रयोदशो 'माहेश्वरम् इत्यस्य स्थाने 'वाशिष्ठलिङ्गम् (माहेश्वरम्), इति वर्तते। तथा च ब्रह्माण्डम् (पुण्यं), सौरं (सावित्रम्) साम्बं (सुसूक्ष्मम्) इति तत्र विशेषः।

३. अत्र 'आद्यं सनत्कुमारोक्तम्' इत्यस्य स्थाने सौरं-सनत्कुमारनाम्नापि विख्यातं, संहिताद्वयसंयुक्तं शिवकथाश्रयं, ब्रह्मपुराणस्य खिलं, द्विवतीयं नारसिंहमित्यस्य स्थाने 'द्वितीयं नारसिंहं च पुराणं पाद्मसंज्ञितं' तृतीयं स्कान्दमित्यस्य स्थाने-'नन्दापुराणं तृतीयं वैष्णवं

(१०) स्कन्दपुराणस्य प्रभासखण्डे (१/२१/१-१५)-

१-आद्यं सदत्कुमारोक्तम्, २-नारसिंहम्, ३-स्कान्दम् (कुमारेणानुभाषितम्), ४-शिवधर्मम् (नन्दीशभाषितम्), ५-दुर्वाससोक्तम् (आश्चर्यम्), ६-नारदोक्तम् ७-कापिलम्, ८-मानवम्, ९-उशनसेरितम्, १०-ब्रह्माण्डम्, ११-वारुणम्, १२-कालिकाह्वयम्, १३-माहेश्वरम्, १४-साम्बम्, १५-सौरम्, १६-पराशरोक्तम् (परमम्), १७-मारीचम्, १८-भार्गवम्[१]।

(११) स्कन्दपुराणस्य सूतसंहितायाः शिवमाहात्म्यखण्डे (१/१३-१८)

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. नान्दम्, ४. शिवधर्मम्, ५. दौर्वासम्, ६. नारदीयम्, ७. कापिलम्, ८. मानवम्, ९. उशनसेरितम्, १०. ब्राह्माण्डम्, ११. वारुणम्, १२. कालीपुराणम् (विशिष्टम्), १३. वाशिष्ठलिङ्गम्, (माहेश्वरम्), १४. साम्बपुराणम्, १५. सौरम् (महाद्भुतम्), १६. पाराशरम्, १७. मारीचम्, १८. भार्गवम् (सर्वधर्मार्थसाधकम्[२])।

(१२) गरुडपुराणे (१/२२३/१७-२०)-

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. स्कान्दम् (कुमारोक्तम्), ४. शिवधर्मम् (नन्दीशभाषितम्), ५. दुर्वाससोक्तम् (आश्चर्यम्), ६. नारदोक्तम्, ७. कापिलम्, ८. वामनम्, ९. उशनसेरितम्, १०. ब्रह्माण्डम्, ११. वारुणम्, १२. कालिका, १३. माहेश्वरम्, १४. साम्बम्, (१५. सौरम्), १६. पराशरोक्तम् (अपरम्), १७. मारीचम्, १८. भार्गवम्[३]।

मतम्', चतुर्थं शिवधर्माख्यमित्यस्य स्थाने 'चतुर्थं शिव-धर्माख्यं पुराणं वायुसंज्ञितम्, पञ्चमं दुर्वाससोक्तमित्यस्य स्थाने 'दुर्वाससोक्तं भागवतं स्मृतम्', षष्ठं नारदीयमित्यस्य स्थाने 'भविष्यं नारदोक्तञ्च', सप्तदशं मारीचमित्यस्य स्थाने 'भागवतं', अष्टादशभार्गवस्य स्थाने 'कौर्मम्' इत्यस्योल्लेखः।

१. अत्र 'वामनम्' इत्यस्य स्थाने 'मानवम्' इत्युल्लेखोऽस्ति। तथा च 'पराशरोक्तम्' इत्यस्य स्थाने 'पराशरोक्तं परमम्' इति लिखितम्। अनेन पाराशरपुराणस्य परमत्वं = श्रेष्टत्वञ्च सूचितम्।

२. अत्र 'स्कान्दम्' इत्यस्य स्थाने 'नान्दम्', 'वामनम्', इत्यस्य स्थाने 'मानवम्', 'कालिका' इत्यस्य स्याने कालीपुराणं (विशिष्टम्), 'माहेश्वरम्' इत्यस्य स्थाने 'वाशिष्ठ-लिङ्गं (माहेश्वरम्), 'सौरम्' इत्यस्य स्थाने सौरं (महाद्भुतम्), 'भार्गवम्' इत्यस्य स्थाने भार्गवं (सर्वधर्मार्थसाधकम्) इति प्रथमतालिकातो वैशिष्टयम्।

३. अत्रापि 'पराशरोक्तम्' इत्यस्य स्थाने पराशरोक्तम् (अपरम्) इति लिखितम्, अनेन अन्यस्यापि पराशरोक्तपुराणस्य सूचना प्राप्यते।

(१३) पद्मपुराणस्य पातालखण्डे (१११/९४-९८)-

१. आद्यं सनत्कुमाराख्यम्, २. नारसिंहम्, ३. नारदीयम्, ४. दौर्वाससम्, ५. नारदीयम् (अन्यम्), ६. कापिलम्, ७. मानवम्, ८. औसनसप्रोक्तम्, ९. ब्रह्माण्डम् (अपरम्), १०. वारुणम्, ११. कालिका, १२. माहेशम, १३. साम्बम्, १४. सौरम्, १५. पाराशरम्, १६. मारीचम्, १७. भार्गवम्, १८. कौर्मम्[१] ।

(१४) देवीभागवते (१/३/१३-१६)-

१. सनत्कुमारम्, २ नारसिंहम्, ३. नारदीयम्, ४. शिवपुराणम्, ५, दौर्वाससम् (अनुत्तमम्), ६ कापिलम्, ७. मानवम्, ८. औशनसम्, ९. वारुणम्, १०. कालिका, ११. साम्बम्, १२. नन्दिकृतम्, १३. सौरम्, १४. पराशर-प्रोक्तम्, १५. आदित्यम् (अतिविस्तरम्), १६. माहेश्वरम्, १७. भागवतम्, १८. वाशिष्ठम् (सविस्तारम्[२]) ।

(१५) वृहद्धर्मपुराणे (१/२५/२३-२६)-

१. आदिपुराणम्, २. आदित्यम्, ३. वृहन्नारदीयम्, ४. नारदीयम्, ५. नन्दीश्वरपुराणम्, ६, वृहन्नदीश्वरपुराणम्, ७. साम्बम्, ८. क्रियायोगसारः, ९. कालिका, १०. धर्मपुराणम्, ११. विष्णुधर्मोत्तरपुराणम्, १२. शिवधर्मपुराणम्, १३. विष्णुधर्मपुराणम्, १४. वामनम्, १५. वारुणम्, १६. नारसिंहम्, १७. भार्गवम्, १८. वृहद्धर्मपुराणम्[३] ।

(१६) पाराशरोपपुराणे–(१/२८-३१)

१. आद्यं सनत्कुमारोक्तम्, २. नारसिंहम्, ३. नान्दम्, ४. शिवधर्मम्, ५.

---

१. अत्र 'नारदीयम्' इत्यस्य स्थाने 'नारदीयम् (अन्यम्)', 'वामनम्' इत्यस्य स्थाने 'मानवम्', 'ब्रह्माण्डम्' इत्यस्य स्थाने 'ब्रह्माण्डम् (अपरम्) इत्येकं वैशिष्ट्यम्, अपरञ्च-चतुर्थं 'शिवधर्मम्' नास्ति, तत्पूर्त्यै अष्टादशं पुराणं 'कौर्मम्' इति लिखितम् ।

२. अत्रोक्तानि शिवादिव्यभागवतवाशिष्ठाख्यानि चत्वारि पुराणानि प्रथम तालिकायां न सन्ति, अथ च स्कान्दब्रह्माण्डमारीचभार्गवाख्यानि चत्वारि अत्र न सन्ति । तथा च-वामनस्य स्थाने 'मानवम्', शिवधर्मम् (साधान्नन्दीशभाषितम्) इत्यस्य थाने 'नन्दिकृतम्' इति पाठोऽस्ति ।

३. अत्र प्रथमतालिकातः केवलं साम्बं, कालिका, वामनं, वारुणं, नारसिंहं भार्गवं चेति षष्ठैव पुराणति गृहीतानि । अन्यानि आदिपुराणम्, आदित्यम्, नारदीयं, वृहन्नारदीयं, धर्मम्, वृहद्धर्मम्, शिवधर्मम् विष्णुधर्मम्, नन्दीश्वरं, वृहन्नन्दीश्वरं, क्रियायोगसारः, विष्णुधर्मोत्तरपुराणम् इति द्वादशपुराणानि नवीनानि सन्ति ।

दौर्वासम्, ६. नारदीयम्, ७. कापिलम्, ८. मानवम्, ९. उशनसेरितम्, १०. ब्रह्माण्डम्, ११. वारुणम्, १२. कालीपुराणम्, १३. वाशिष्ठ-लिङ्गम्, १४. साम्बम्, १५. सौरम्, १६. पाराशरम्, १७. मारीचम्, १८. भार्गवम्[१]।

(१७) विन्ध्यमाहात्म्ये (बृहदौशनसोपपुराणे) (अ० ४)–

१. सनत्कुमारम्, २. नारसिंहम्, ३. नारदीयम्, ४. शिवपुराणम्, ५. दौर्वासम् (अनुत्तमम्), ६. कालिकम्, ७. मानवम् (पुण्यम्), ८. औशनसम्, ९. वारुणम्, १०. कालिका, ११. साम्बम्, १२. नन्दीकृतं (शुभम्), १३. सौरम्, १४. पाराशरम्, १५. आदित्यम् (अतिविस्तारम्), १६. माहेश्वरम्, १७. भार्गवम्, १८. वाशिष्ठम् (सविस्तारम्)[२]।

(१८) वीरमित्रोदयस्य परिभाषाप्रकाशे (ब्रह्मवैवर्तपुराणानुसारेण) (पृष्ठ १४)

१. आद्यं सनत्कुमारम्, २. नारदीयम्, ३. नारसिंहम्, ४. शिवधर्मम्, ५. दौर्वासम्, ६. कापिलेयम्, ७. मानवम्, ८. शौक्रम, ९. वारुणम्, १०. ब्रह्माण्डम्, ११. कालीपुराणम्, १२. वाशिष्ठ लैङ्गम्, १३. माहेशम्, १४. साम्बम्, १५. सौरम्, १६. पाराशर्यम्, १७. मारीचम्, १८. भार्गवम् (सर्वधर्मप्रवर्तकम्[३])।

---

१. अत्र 'स्कान्दम्' इत्यस्य स्थाने 'नान्दम्', 'वामनम् इत्यस्य स्थाने 'मानवम्', 'माहेश्वरम्' इत्यस्य स्थाने 'वाशिष्ठलिङ्गम्' इति लिखितम् । यथा—

आद्यं सनत्कुमारोक्तं नारसिंहं ततः परम् ।
नान्दाख्यं शिवधर्माख्यं दौर्वासं नारदीयकम् ॥
कापिलं मानवं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणं कालीपुराणाख्यं तथैव च ॥
वाशिष्ठं लिङ्गसंज्ञं च साम्बं सौरं तथैव च ।
पाराशरसमाख्यं च मारीचं भार्गवाह्वयम् ॥
(अ० १/२८-३१)

अनेकमातृकासु 'वाशिष्ठलैङ्गसंज्ञं' अथवा 'वाशिष्ठं लैङ्गसंज्ञम्' वेति पाठः ।

२. अत्रोक्तानि शिवादित्यवाशिष्ठाख्यानि त्रीणि प्रथमतालिकायां न सन्ति, स्कान्दब्रह्माण्डमारीचाख्यानि च अत्र न सन्ति । 'वामनम्' इत्यस्य स्थाने 'मानवं (पुण्यं)' वर्तते ।

३. अत्र 'वामनम्' इत्यस्य स्थाने 'मानवम्', 'औशनसम्' इत्यस्य स्थाने 'शौक्रम्', 'माहेश्वरम्' इत्यस्य स्थाने 'माहेशम्' वर्तते । 'स्कान्दं' नास्ति, 'वाशिष्ठलिङ्गम्' तत्स्थाने वर्तते ।

(१९) गोपालदासकृतभक्तिरत्नाकरे (ब्रह्मवैवर्तपुराणासारेण)–

१. सनत्कुमारम्, २. नान्दम्, ३. नारसिंहम्, ४. दौर्वाससम्, ५. शिवधर्मम्, ६. कापिलेयम्, ७. मानवम्, ८. शौक्रम्, ९. वारुणम्, १०. वाशिष्ठम्, ११. साम्बम्, १२. कालीपुराणम्, १३. माहेशम्, १४. पराशरम्, १५. भार्गवम्, १६. मारीचम्, १७. सौरम्, १८. ब्रह्माण्डम्[१] ।

(२०) मधुसूदनसरस्वतीकृतप्रस्थानभेदे–

१. आद्यं सनत्कुसारोक्तम्, २. नारसिंहम्, ३. नान्दम्, ४. शिवधर्मम्, ५. दौर्वासम्, ६. नारदीयम्, ७. कापिलम्, ८. मानवम्, ९. उशनसेरिसम्, १०. ब्रह्माण्डम्, ११. वारुणम्, १२. कालीपुराणम् (विशिष्टम्), १३. वाशिष्ठ-लैङ्गम्, १४. साम्बपुराणम्, १५. सौरम् (महाद्भुतम्), १६. पाराशरम्, १७. मारीचम्, १८. भार्गवम्[२] ।

(२१) एकाम्रपुराणे (१/२०-२३)–

१. वृहन्नारसिंहम्, २. वृहद्वैष्णवम्, ३. गारुडम्, ४. वृहन्नारदीयम्, ५. नारदीयम्, ६. प्रभासकम्, ७. लीलावतीपुराणम्, ८. देवीपुराणम्, ९. कालिका-पुराणम्, १०. आखेटकपुराणम्, ११. वृहन्नन्दिपुराणम्, १२. नन्दिकेश्वरपुराणम्, १३. एकाम्रपुराणम्, १४. एकपादपुराणम्, १५. लघुभागवतम्, १६. मृत्युञ्जय-पुराणम्, १७. आङ्गिरसोक्तम्, १८. साम्बम्[३] ।

(२२ वारुणोपपुराणे (अ० १)–

१. आद्यं कुमारकथितम्, २. नृसिंहम्, ३. नारदीयकम्, ४. वाशिष्ठ-लैङ्गम्, ५. मारीचम्, ६. नन्दाख्यम्, ७. भार्गवम्, ८. माहेश्वरम्, ९. औशनसम्, १०. आदित्यम्, ११. गणेशकम्, १२. कालीयम्, १४. दौर्वासम्, १५. शिवधर्मकम्,

---

१. अत्र 'स्कान्दम्' इत्यस्य स्थाने 'नान्दम्' 'औशनसम्' इत्यस्य स्थाने 'शौक्रम्' 'माहेश्वरम' इत्यस्य स्थाने 'माहेशम्', वामनम्' इत्यस्य स्थाने 'मानवम् वर्तते । अत्र 'नारदीयम्' नास्ति, अथ च 'वाशिष्ठम्' वर्तते तत्स्थाने ।

२. अयं क्रमः पाराशरोपपुराणक्रमेण साम्यं भजते । मन्येऽयं तत एवोद्धृतः । अत्रापि 'स्कान्दम्' इत्यस्य स्थाने 'नान्दम्', 'वामनम्' इत्यस्य स्थाने 'मानवम्', 'माहेश्वरम्' इत्यस्य स्थाने 'वाशिष्ठलैङ्गम्' इति वर्तते ।

३. अत्र केवलं 'नारदीयम्' 'कालिकापुराणं' 'साम्बं' च विहाय अन्यानि सर्वाणि (१५) नामानि नूतनानि सन्ति । अत्रैव केवलं पराशरोपपुराणस्यापि नोल्लेखः ।

१६. पराशरेण कथितम्, १७. साम्बम्, १८.वारुणम्[१]।

उपर्युक्तासु उपपुराणसूचीसु अष्टादशभ्योऽधिकानि उपपुराणानि कथितानि। ततोऽप्यधिकानि उपपुराणानि सन्ति। मन्ये, शताधिकानि उपपुराणानि इतस्ततो विकीर्णानि मातृकामग्नानि सन्ति। केवलं एकाम्रपुराणं विहाय प्रायः सर्वत्र प्रस्तुतस्य पराशरोपपुराणस्य नामोल्लेखो महता समादेरण कृतः। क्वचित् तस्य प्रथमत्वं क्वचित् प्रवरत्वं क्वचिच्च अपरत्वं कथितम्। अनेन इदं निश्चेतुं शक्यते यत् पुरा पराशरोपपुराणस्य अन्योपपुराणेभ्यो महीयान् प्रभावः आसीत्।

उपपुराणानामुत्पत्तिः—

उपपुराणानामुत्पत्तिसम्बन्धिनी कथा मनोहारिणी सर्वानाकर्षति। एषामुत्पत्तिविषये कूर्मपुराणे, स्कन्दपुराणस्य सूतसंहितायां तथा च विभिन्नेषु धर्मशास्त्रीयनिबन्धग्रन्थेषु नित्याचारप्रदीपे वीरमित्रोदयस्य परिभाषाप्रकाश-चतुर्वर्गचिन्तामणिरघुनन्दनकृतस्मृतितत्त्व-जीवगोस्वामिकृतभागवतटीकादिषु या वार्ता उपलभ्यन्ते तास्तु आलोचनायाः सौकर्याय अत्र प्रदीयन्ते—

कौर्मे (१/१।२६)—

अन्यान्युपपुराणानि मुनिभिः कथितानि तु।
अष्टादशपुराणानि श्रुत्वा संक्षेपतो द्विजाः॥

स्कन्दपुराणस्य सूतसंहितायाम् (१।२२)—

अष्टादणपुराणानि श्रुत्वा सत्यवतीसुतात्।
अन्यान्युपपुराणानि मुनिभिः कीर्तितानि तु॥

उपर्युक्तधर्मशास्त्रनिबन्धेषु—

अन्यान्युपपुराणानि मुनिभिः कथितानि च।
अष्टादशपुराणानि श्रुत्वा संक्षेपतो द्विजाः॥

अस्मादिदं प्रतीयते यत् पुराणवत् उपपुराणानि अपि ऋषिप्रणीतानि एव। साधारणमनुष्यकर्तृत्वादिमानि हेयानि इति कदापि न मन्तव्यम्। पुराणानि तु

---

१. अत्र 'सनत्कुमारोक्तम्' इत्यस्य स्थाने 'कुमारकथितम्', 'नारसिंहम्', इत्यस्य स्थाने 'नृसिंहम्', 'कालीपुराणम्' इतयस्य स्थाने 'कालीयम्' 'पाराशरम्' इत्यस्य स्थाने 'पराशरेण कथितम्', 'सौरम्' इत्यस्य स्थाने 'आदित्यम्' वर्तते। 'स्कान्दम्' (कुमारोक्तम्), 'ब्रह्माण्डम्' तथा 'वामनम्' इत्येतानि त्रीणि पुराणानि अत्र न सन्ति, तथा चान्यानि नन्दाख्यम्, वाशिष्ठलैङ्गम्, गणेशञ्चेति त्रीणि सन्ति।

सर्वाणि यथा व्यासेन निर्मितानि, अत एव पावित्र्यमादधते तथैव इमानि अपि समानादरणीयतां भजन्ते ।

पुराणानां प्रथमतः श्रवणं तदनन्तरञ्च उपपुराणानां विरचनं यद् वा पुराणोत्तरकालेषु एषां प्रादुर्भावः समादरश्च । एतेनैव उपपुराणस्य सम्मानहानिर्न भवति पाणिनिकात्यायनपतञ्जलिः, इति मुनित्रयेण प्रसिद्धं यत् 'त्रिमुनि व्याकरणम्' तत्र 'यथोत्तरं प्रामाण्यं मुनीनाम्' इति परिभाषाबलात् पाणिन्यपेक्षया वार्तिककारकात्यायनस्य तस्यापेक्षया भाष्यकृत्पतञ्जलेः प्रामाण्यं स्वीकृतम् । अत्रापि तथैवाभ्युपगन्तव्यम् । पुराणोपपुराणयोः वादस्थले तु पुराणापेक्षया उपपुराणस्यैव समादरः अभ्युपेयः । पुराणोपपुराणयोर्विभाजनरेखां दूरीकृत्य कानिचन उपपुराणानि स्वयं पुराणपदवीं लभन्ते । नरसिंहोपपुराणम्, देव्युपपुराणम्, कालिकोपपुराणम्, यद्यपि प्रकृत्या उपपुराणानि एव, उपपुराणमध्ये तेषां परिगणनात् निबन्धादौ तेषामुपपुराणत्वेनैव स्वीकृतेश्च । इमानि तु स्वयमेव 'पुराणानि' इत्याख्यया प्रसिद्धानि । अद्यत्वे तु सर्वे ब्रुवन्ति–कालिकापुराणम्, देवीपुराणम् न तु देव्युपपुराणं कालिकोपपुराणमिति । कुत्रचित्स्थले उपपुराणानि पुराणान्यपि आक्रमितुमभिलषन्ते । हेमाद्रिकृतचतुर्वर्गचिन्तामणिग्रन्थे येंऽशाः कालिकापुराणादुद्धृताः, वस्तुतस्तु ते कालिकापुराणे नोपलभ्यन्ते, परन्तु भागवतपुराणे प्राप्यन्ते । अतः कालिकापुराणस्य भागवतपुराणसंज्ञा नासमीचीना । इदं भागवतं तु नूनं देवीभागवतपदवाच्यं, न तु श्रीमद्भागवतपदसंज्ञकम् । देवीभागवते कालिकापुराणे च उभयत्रापि देवीमाहात्म्यलीलाविस्तरप्रसङ्गात् उभयोः समानत्वं नास्वीकरणीयम् । वस्तुस्थितिस्तु ईदृशी, यत् देव्युपपुराणं, नरसिंहोपपुराणं, साम्बोपपुराणमित्यादीनि प्राचीनोपपुराणानि कुत्रापि उपपुराणसंज्ञां न भजन्ते । पुराणत्वेनैव तेषां ख्यातिः प्रसिद्धिश्च सर्वत्र प्रसारिणी । अस्मात् इदमपि वक्तुं पार्येत, यत् आदौ पुराणोपपुराणानां मध्ये वास्तविकभेदः सुदुर्लभ आसीत्, परवर्तिनि काले क्रमश इयं विभाजनरेखा उपलब्धा स्वीकृता च ।

श्रीमद्भागवते[१] 'अल्प-महद्' इत्यनया रीत्या उपर्युक्तानां पुराणानां भेदो न समादरणीयः । यानि अल्पानि क्षुल्लकानि वा उपपुराणानि किं तानि उपपुराणानि भवेयुः ? यद्वा महत्तराणि पुराणानि एव पुराणपदवाच्यानि स्युः ? एवं यदि स्यात् तदा कूर्मवामनादीनि पुराणानि उपपुराणसमुदाय एव भवितुमर्हन्ति, न तु महापुराणसमुदाये । तथा च साम्बकालिकादीनां महापुराणसंज्ञा एव सिध्येत्, न तु उपपुराणसंज्ञा । अतः इमानि लक्षणविशिष्टानि पुराणानि इमानि च उपपुराणानि

१. भाग० १२/७/१०, १२/७/२२

इति निर्णयः सुदुष्करः। फलतः पञ्चलक्षणाक्रान्तं दशलक्षणयुक्तं यथा पुराणं तथोपपुराणमपि।

सौरोपपुराणे स्पष्टतयोपलभ्यते[1] —

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥
ब्रह्मादीनां पुराणानामुक्तमेतत्तु लक्षणम्।
एतच्चोपपुराणानां खिलत्वाल्लक्षणं स्मृतम्॥

अस्माद् इदं प्रतीयते यत् एतल्लक्षणोपसंक्रान्तम् उपपुराणं न सुदुर्लभम्। श्रीमद्भागवते यद् दशलक्षणम् पुराणानां दृश्यते[2], तल्लक्षणं तु बहुषु उपपुराणेष्वपि प्राप्यते। अतः लक्षणप्रसंगात् निर्णयस्तु न किञ्चन फलमावहेत्। केचन इत्थं विश्वसन्ति-उपपुराणानि प्रत्यक्षतया पुराणादेव समुद्भूतानि। लक्ष्मीधरकृतकृत्यकल्पतरुनिबन्धग्रन्थे समुद्धृतः कश्चन श्लोकः प्रसङ्गेऽस्मिन् समुपस्थापयितुं शक्यते—

अष्टादशभ्यस्तु पृथक् पुराणं यत् तु दृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम्॥

नित्याचारप्रदीपेऽपि अयं श्लोकः समुपलभ्यते। लक्ष्मीधरस्तु टीकायां निगदति-विनिर्गतम् - उद्भूतम्। यथा कालिकापुराणादि। मधुसूदनसरस्वती स्वकीये प्रस्थानभेदाख्ये ग्रन्थेऽपि इत्थं परिपुष्णाति। 'अत्रोपपुराणानामपि पुराणेऽन्तर्भावः।' अत एवास्माभिरिदमुच्यते यत् अद्यत्वे यानि किल अष्टादश महापुराणानि प्रसिद्धानि तद्व्यतिरिक्ततया तदितरेषां पुराणानामुपपुराणसंज्ञा समीचीना एव।

पाराशरोपपुराणम्—

उपपुराणानां मध्ये पाराशरोपपुराणस्य किञ्चन वैशिष्टचमवश्यमेव स्वीकरणीयम्। प्रथमतः अस्य नामकरणमेव विशेषपदवीमवगाहते। भगवतः पराशरस्य नाम्ना युक्तमिदम्। महर्षिसंज्ञया संज्ञितमिदं पुराणं शीर्षकादेव प्राचीनत्वं सम्मानं गौरवञ्च विस्पष्टीकरोति। वस्तुतस्तु को नाम पुराणपाठकः प्रवक्ता, यः पराशर

---

१. सौरोपपुराणे ९/४/५

२. सर्गस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः॥
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।
केचित्पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया॥
(भाग० १२/७/९-१०)

इति नाम्ना आकृष्टो न भवेत्। यथा पराशरेण प्रणीता धर्मसंहिता सर्वेषामादरणीया मनुयाज्ञवल्क्यवत् प्रतिष्ठिता च सर्वासां संहितानां मूर्धिन विराजते।

यथा कृषिपरासराख्यो ग्रन्थः प्राचीनभारतवर्षस्य कृषिशास्त्ररहस्यमुद्घाटयन् सर्वानाकर्षति वैज्ञानिकवस्तुपरिशीलनेन मोहयति च, तथा पाराशरोपपुराणमपि सकलोपपुराणानां मूर्धिन विराजमानं स्वयं शोभते।

द्वितीयं वैशिष्टचम्–उपपुराणानां मध्ये पाराशरोपपुराणे एव इदमुपलभ्यते यत् इमानि उपपुराणानि मुनिकृतानि न तु साधारणतया अवमन्तव्यानि। पाराशरोपपुराणे वर्तते—

एवमाज्ञापितास्तेन शिवेन मुनयः पुरा।
श्रुत्वा सत्यवतीसूनोः पुराणं सकलं मुदा॥
अन्यान्युपपुराणानि चक्रुः साररताणि वै[1]।

उपपुराणानि शिवाज्ञया व्यासप्रेरितैर्मुनिभिरेव संगृहीतानि = विरचितानि। अतो भगवता महेश्वरेण सह परम्परासंबन्धात् भगवद्विष्ण्ववतारभूतेन व्यासेन सह प्रत्यक्षसंबन्धात् एषामुपपुराणानां माहात्म्यसिद्धिः।

तृतीयं वैशिष्टचम्–यत्र यत्र उपपुराणानां नाम्नामालोचनं पर्यवलोक्यते तत्र तत्रैव पाराशरोपपुराणस्य अन्तर्भुक्तिः सुविदिता। अतः उपपुराणेषु अस्य महत्त्वं (वरीयस्त्वं) स्वीकर्तव्यम्।

चतुर्थं वैशिष्टचम् –स्कन्दपुराणस्य प्रभासखण्डे[2] पाराशरपुराणमेव परमम् (सर्वश्रेष्ठम्) उपपुराणम् इत्युक्तम्। स्कन्दपुराणस्य प्राचीनपुराणत्वेन स्वीकृतिः सर्वैरेवावगम्यते। तत्र प्राचीने पुराणे पाराशरोपपुराणस्य इयं स्वीकृतिः अस्य गौरवं प्राचीनत्वं महत्त्वञ्च सुस्पष्टीकरोति।

पञ्चमं वैशिष्टचम्—पाराशरोपपुराणस्य विष्णुपुराणेन सह सादृश्यमेतादृशं समधिकमासीत् यदुभयोरपि वक्तृसामान्यात् यत्र कुत्रचित् पाराशरोपपुराणमुद्दिश्य 'पराशरं तु अपरम्' इत्यादीनि संगृहीतानि।

वल्लालसेनः स्वकीये दानसागरनामके ग्रन्थे यस्य वैष्णवाख्यपुराणस्य नाम उदाजहार, तस्य वैष्णवपुराणस्य बहुप्रचलितस्य वा मुख्यप्रवक्ता आसीत् पराशरः। एतेन एताभ्यां वा सह पाराशरोपपुराणस्य मा भूत् काचित् विप्रतिपत्तिः

१. पाराशर० १/२७, २८
२. स्कन्द० प्रभास० १/२/११-१५

इत्याशंक्यैव ऋषिभिः 'पराशरोक्तमपरम्' पुराणम्, न तु विष्णुपुराणम् वैष्णवपुराणं वा पाराशरोपपुराणस्य सामान्यधर्मप्रकाशकत्वेन उपस्थापितम् । अत एव इदमुपपुराणं सर्वेषां दृष्टिमाकर्षति ।

षष्ठं वैशिष्टचम्—

हेमाद्रिकृतचतुर्वर्गचिन्तामणिग्रन्थे कूर्मपुराणादंशाः साकल्येन समुपस्थापिताः। तानंशान् समालोच्य इदं वक्तुं पार्यते यदस्योपपुराणस्य प्रवरत्वेनापि स्वीकृतिः । तत्रोक्तं 'पराशरोक्तं प्रवरम्' प्रवरस्यार्थः श्रेष्ठम् । अतः यथा 'पराशरोक्तं प्रथमम्' इत्युद्धृत्या अस्योपपुराणस्य प्रशस्तिः, तथा श्रेष्ठत्वेन स्वीकृतमिदं पुराणमिति सर्वेषामुपरि राजते । अथ च प्रवरपदस्य यदि सन्ततिः गोत्रप्रवर्तकः इत्यादयोऽर्थाः स्वीक्रियन्ते तर्हि पाराशरगोत्रान्तर्भूतानाम् अधस्तनपुरुषाणां मध्ये एवास्योपपुराणस्य प्रामाण्यत्वे स्वीकृतिः पठनपाठनादिकं सर्वं प्रचलितमासीत् । वास्तविकदृष्टचा प्रवरपदस्य श्रेष्ठः अर्थ एव समीचीनः । न केवलमिदं विशेष गोत्रान्तर्गतानामेव मध्ये सीमितमासीत्, अपि तु विश्वजनीनं सर्वजनीनं वा इदं प्रसिद्धञ्च ।

सप्तमं वैशिष्टचम्–पराशरोपपुराणं प्रामाणिकोपपुराणरूपे निबन्धकृद्भिरुररीकृतम् । माधवाचार्येण पराशरसंहितायाः भाष्ये, त्र्यम्बक ओकमहोदयेन स्वकीये आचारभूषणे, महाभाष्यस्य प्रदीपोद्योतटिप्पण्यां (छायाख्यायाम्) वैद्यनाथदीक्षितेन स्मृतिमुक्ताफलस्याह्निककाण्डे (द्वितीयखण्डे) सांख्यसूत्राणां विज्ञानभिक्षुविरचितभाष्ये च पराशरोपपुराणस्य वचनानि परमादरेण संगृहीतानि[१] । एतदस्य ग्रन्थस्य जनप्रियतां भारतवर्षेषु सर्वत्र स्वीकृतिं च विस्पष्टयति । भारतवर्षस्य सर्वेषु प्रान्तेषु यदस्य पठनपाठनादिकमभ्यासो महत्त्वञ्च वरीवर्ति तदेव निबन्धरचयितॄणां स्वीकारकारणम् । यदि कश्चित्परमर्षिः कञ्चन ग्रन्थं लिखेत् तस्य च यदि किञ्चन उपयोगित्वं नास्ति तर्हि तल्लिखनमेव व्यर्थम् । अन्यैस्तु कदापि नैतत् समादर्तव्यम् । किन्तु पराशरोपपुराणप्रसङ्गे नेदं वक्तुं पार्यते ।

अन्तिमं वैशिष्टचम्-पृथिव्यां बहुषु स्थानेषु पराशरोपपुराणस्य मातृकाः समुपलभ्यन्ते । आलोचितानां मातृकानां परिचयप्रदानप्रसङ्गे उपलब्धानां मातृकानां च विवरणमस्माभिस्तत्र प्रदत्तम् । अतः अस्योपपुराणस्य सर्वव्यापी प्रभावः सर्वत्रसमादरः सकलस्थानेषु महद्गौरवमुपयोगित्वञ्च सूच्यते ।

अस्मात् कारणकलापादेव अपराणि उपपुराणानि विहाय पाराशरोपपुराणस्य समालोचनात्मकं सम्पादनं कर्तुमहं प्रवृत्तः ।

---

१. अत्रत्यं विवरणमन्यत्र–पराशरोपपुराणोद्धृतवचनानि–इत्यध्याये द्रष्टव्यम् ।

पाराशरपुराणस्य कालः–

पुराणपरम्पराऽतीव प्राचीनाऽस्ति। तैत्तिरीयारण्यके ब्राह्मणेतिहासपुराण-नाराशंसीगाथानां चर्चा वर्तते[1]। छान्दोग्योपनिषदि इतिहासपुराणं पञ्चमो वेद इत्युक्तम्[2] वृहदारण्यकेऽपि इतिहासपुराणयोरुल्लेखोऽस्ति[3]। ज्ञायते यत् पुरा पुराणमेकमेवासीत्। यथा मात्स्ये–'पुराणमेकमेवासीत् पुरा कल्पान्तरेऽनघ।' महाभाष्येऽपि पुराणशब्दस्यैकवचनत्वं जातिपरकं बहुत्वद्योतकं मन्यते। वैयाकरणपरम्परायामपि 'ब्राह्मणः पूज्यः' 'ब्राह्मणाः पूज्या' इत्युभये पार्थक्यं नास्ति। तथैव पुराणशब्दस्यैकवचनप्रयोगोऽपि तत्रानेकत्वबोधकोऽस्ति।

वर्तमानानि पुराणानि रचनादृष्टया भाषाधारेण च प्राचीनतमानि न ज्ञायन्ते। विषयदृष्टयाऽपि पुराणानामधिकोंऽशः पश्चात्कालिकः प्रतिभाति। किन्तु पाश्चात्यविद्वांसो यावत्पश्चात्कालिकानि तानि मन्यन्ते, न तादृशानि तानि। अस्मिन् विषये डा० राजबलीपाण्डेयसंभावना समीचीना प्रतिभाति। तस्य मतम् यत् 'महाभारतकाले वैदिकसंहितासमानं पुराणसाहित्यस्यापि संघटनारम्भो बभूव। तदैव व्यासोऽष्टादश पुराणानि निर्ममे। तत्र पञ्चैव मुख्या विषया आसन्-सर्गः, प्रतिसर्गः, वंशः, मन्वन्तराणि, वंशानुचरितम्। पुराणेषु विस्तारस्य महती शक्तिरासीत्। अतः प्रत्येकमागतयुगे नवीना सामग्री प्रक्षिप्ता बभूव। तत्र केवलं कथाभागे एव वृद्धिर्नाभूत्, अपि तु नूतना विषया अपि सङ्कलिताः, तान् सर्वान् विषयान् यथासम्भवमात्मसात्कृत्य पुराणवाङ्मयं विशालसंहितारूपं दधार[4]।' पाण्डुरङ्ग वामनकाणेः--वायुविष्णुमार्कण्डेयमत्स्यकूर्मपुराणानां रचनाकालम् ईसवीयोत्तरं ३००-६०० पर्यन्तं मनुते[5]। अ० द० पुसालकरः पुराणरचनाकालसंबन्धे कथितवान् यत् निःसन्देहं वर्तमानपुराणानि नैककालिकानि। समये समये तत्र संशोधनं परिवर्धनमभवत्। अतस्तेषां कालनिर्धारणे पुरातनांशस्यैव समयो विचारणीयो न तु पश्चात्तनस्यांशस्य। पुराणानां प्राचीनरूपं भारतीययुद्धकालेऽवश्यमेवासीत्, मेगस्थनीज कालेऽप्यासीत्। साहित्यशिलालेखयोराधारेण इदं वक्तुं शक्यते यद्

१. तै० आ० (२/१०) ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथाः नाराशंसीः।

२. छा० उ० ७/१/२,४

३. बृहदारण्यक० ४/१/२

४. पुराणानुक्रमणी, प्रस्तावना पृ० २

५. धर्मशास्त्र का इतिहास, भाग १, पृ० ४८

वर्तमानपुराणवाङ्मयकाल ईसवीयपूर्वकालादारभ्य ईसवीयपश्चात्कालस्यारम्भिकशताब्दयामस्ति[१]।

उपपुराणानां कालविषये डा० आर० सी० हाजरा महोदयस्य गवेषणापूर्णा विचाराः सन्ति। तन्मते सम्पूर्णमुपपुराणवाङ्मयमेककालिकं नास्ति। भिन्न-भिन्न काले तेषां रचनाऽभवत्। कूर्मपुराणस्याष्टादशोपपुराणविषयकश्लोकानुद्धृत्य तेन विचारितं यत् कूर्मपुराणीया इमे श्लोकाः रघुनन्दनस्य स्मृतितत्त्वे, हेमाद्रिकृतचतुर्वर्गचिन्तामणौ चोद्धृताः॥ उक्तसूचीवत् स्कन्दपुराणस्य सौरसंहितायां, शिवमाहात्म्यखण्डेऽपि च उपपुराणसूची प्राप्यते। तथा च वल्लालसेनेन स्वकीये दानसागरेऽपि कूर्मपुराणस्यादिपुराणस्य च उपपुराणसूची निर्दिष्टा। एवमन्यसाक्ष्यैरपि स्पष्टीभवति यत् उपपुराणानामष्टादशानां निर्माणकालः ८५० खीष्टाब्दतः उत्तरकालिको न भवितुं शक्यः[२]।

अतोऽप्यधिकं प्राचीनत्वमुपपुराणानां मत्स्यपुराणस्य ५३ अध्यायश्लोकैरभ्युपगम्यते। तदनुसारं नरसिंह–नान्दी–साम्ब–आदित्योपपुराणानि तत्कालीनमानवसमाजे पूर्णतः प्रतिष्ठितान्यासन्। उक्ताध्यायस्य संभाविततिथिः हाजरामहोदयानुसारं ५५०–६५० ईसवीयोत्तरकालिकी भवितुं शक्या। तथा ५९–६३ श्लोकाः यत्र उपर्युक्तोपपुराणानामुल्लेखो वर्तते, ६५०–८५० ई० उत्तरकालिका भवितुं शक्याः। उपपुराणानां सम्बन्धे निर्धारित उक्तकालक्रमोऽन्येषां व्यक्तिगतरूपेण लिखितानामुपपुराणानां विषये मान्यो नास्ति[३]।

नारसिंह–नान्दी–साम्बादित्योपपुराणानां, येषां चर्चा मत्स्यपुराणस्य ५३ अध्याये कृता, निर्माणमुपपुराणसमूहनिर्माणात्पूर्वमेवाभवत्, कालान्तरे एतान्यपि उपपुराणसूच्यां सम्मिलितीकृतानि। एवमनुमीयते यदुपपुराणानां रचना गुप्तकालतः प्रारब्धोऽभवत्। धार्मिकमान्यतानुसारेण उपपुराणानां रचनारम्भः एतत्पूर्वमेवास्ति[४]।

---

१. हिन्दू संस्कृति अङ्क–गीता प्रेस
२. स्टडीज इन दी उपपुराणाज्–भूमिका
३. हाजरा–स्टडीज इन दी उपपुराणाज्–भूमिका
४. हाजरा–स्टडीज इत दी उपपुराणाज्–भूमिका
मत्स्यपुराणीयाः श्लोकाः (५९-६३)–

उपभेदान् प्रवक्ष्यामि लोके ये सुप्रतिष्ठिताः।
पाद्मे पुराणे तत्रोक्तं नरसिंहोपवर्णनम्॥

पाराशरोपपुराणे इत्थं प्रतिपादितं यदुपपुराणानां रचना व्यासमुनेर्मुख-तोऽष्टादशपुराणानि श्रुत्वाऽन्यैर्मुनिभिरष्टादश उपपुराणानि निर्मितानि। तत्र पराशरेण इदमुयपुराणं शिवप्रीतिकरं शिवाज्ञया निर्मितम्[१]।

अनेन इदं सिध्यति यदष्टादशमहापुराणरचनानन्तरमेवोपपुराणानां रचना प्रारभत। अतो यदि पुराणरचनाकालः ईसवीयषष्ठशताब्दीपर्यन्तः स्वीक्रियते, तदा तत्पश्चादेवैषां निर्माणकालः स्वीकर्त्तव्यः। अर्थात् ईसवीयोत्तरं षष्ठशताब्दी-तःसार्द्धाष्टशताब्दीयपर्यन्तः (६००-८५० ई० उ०) उपपुराणरचनाकालः स्वीकरणीयः।

तत्रोपपुराणानां मध्ये पाराशरोपपुराणस्य कियान् प्रभाव आसीत्, इति विचारणीयम्। उपपुराणानां सर्वासु सूचीसु तस्य वैशिष्ट्यपूर्ण उल्लेखो विद्यते। क्वचित्प्रथमत्वेन[२], क्वचित्प्रवरत्वेत[३], क्वचिदपरत्वेन[४] चास्योल्लेखो वर्तते। अनेन इदं प्रतीयते यदस्योपपुराणस्य जनसमाजे महानादरः आसीत्। पराशर-संहितायाष्टीकायां सायणभ्राता माधवाचार्यः परमादरेणास्य श्लोकानुद्धृतवान्। माधवाचार्यस्य काल ईसवीयोत्तरं १३००-१३८० पर्यन्तो निर्णीतः। अत

तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते।
नन्दाया यत्र माहात्म्यं कार्तिकेयेन वर्ण्यते॥
नन्दीपुराणं तल्लोकैराख्यातमिति कीर्त्यते।
यत्र साम्बं पुरस्कृत्य भविष्येऽपि कथानकम्॥
प्रोच्यते तत्पुनर्लोके साम्बमेतन्मुनिव्रताः।
एवमादित्यसंज्ञा च तत्रैव परिगद्यते॥
अष्टादशभ्यस्तु पृथक् पुराणं यत्प्रदिश्यते।
विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम्॥

१. पारा० अ० १ : २७ - ३२

२. हेमाद्रि० चतुर्वर्ग० द्वि० भा० (पाराशरोक्तं प्रथमम्)

३. हेमाद्रि० चतु० प्र० भा०–(पराशरोक्तं प्रवरम्)

४. रघुनन्दनकृतमलमासतत्त्वे (पृ० ७९), वीरमित्रोदय-परि० प्र०, स्क० पु० प्र० ख०, (१/२/११-१५), गरुड० १/२२३/१७-२० (पराशरोक्तमपरम्)

एतत्प्रागेवास्योपपुराणस्य काल इति तु निश्चप्रचम् । अन्यैरपि विज्ञानभिक्षु-त्र्यम्बक-ओक-वैद्यनाथ प्रभृतिभिर्भाष्यकारैर्निबन्धकारैश्च परमादरेणास्मात्पुराणाद् वचनानि संगृहीतानि । पुराणेऽस्मिन् संख्ययोग-न्याय-वैशैषिक-पाणिनीय-मीमांसावेदान्त-जैनबौद्धलोकायतिकदर्शनानां नामानि लिखितानि[१] । तन्त्रागमशब्दावपि यत्र-तत्र आगतौ । अतोऽस्य समयः ईसवीयोत्तरं सार्द्धाष्टशताब्दीतः सहस्रशताब्दीं यावदनुमातुं शक्यते—(ई० उ० ८५०-१०००) ।

१. पारा० ८/२८-३१

अध्यायानुसारि विवरणम्

प्रथमोऽध्यायः (उपक्रमः)

सौरमण्डलमध्यस्थं संसारभेषजं साम्बं शिवं नमस्कृत्य मुनिवरः शुकदेवो मेरुशृङ्गे समासीनं सर्वज्ञं श्रीपराशरं प्रति सादरं सविनयं पप्रच्छ-भगवन् भवपाशनिबद्धानां जीवानां भवबन्धविमुक्तये कोऽभ्युपाय इति निबोधय। ततः भगवान् पराशरः भवानीपतिं शङ्करं ध्यात्वा भक्तिप्रह्वं शुकं प्रत्युवाच। पुरा कृष्णद्वैपायनो व्यासो यदा निखिलानि (अष्टादश) पुराणानि निर्माय मुनीनदर्शयत् तदा तद्वचनानैपुण्यावलोकनाकृष्टपरमप्रसन्ना मुनयो व्यासमपूपुजन्। तदानीमेव परमकारुणिको भक्तवत्सलो भगवान् शङ्करो भवान्या सहितस्तत्र प्रादुरभूत्। तं भगवन्तं भूतनाथं दृष्ट्वा मुनयः प्रदक्षिणीकृत्य प्रणम्य समर्च्य च सगद्गद्गिरा तुष्टुवुः। भगवान् शङ्करश्च मुनिसपर्यासन्तुष्टमानसस्तानुवाच—अयं सत्यवतीसूनुर्व्यासो मत्प्रसादेन लोककल्याणार्थं सकलं पुराणं निर्ममे। तेन मम मनसि महानानन्दो जातः। अतः परं भवन्तो व्यासमुखात् समस्तं पुराणं (महापुराणम्) समाकर्ण्य अन्यानि उपपुराणानि रचयन्तु इति आज्ञाप्यैवं सोऽन्तर्दधौ।

तदनन्तरं तदाज्ञां शिरसि निधाय मुनयो वक्ष्यमाणानि उपपुराणानि निरमाशिषुः—

(१) सनत्कुमारोक्तम्	(२) नारसिंहम्	(३) नान्दम्
(४) शिवधर्मम्	(५) दौर्वासम्	(६) नारदीयकम्
(७) कापिलम्	(८) मानवम् (पावकम्)	(९) उशनसेरितम्
(१०) ब्रह्माण्डम्	(११) वारुणम्	(१२) कालीपुराणम्
(१३) वाशिष्ठम् (लैङ्गम्)	(१४) साम्बम्	(१५) सौरम्
(१६) पाराशरम्	(१७) मारीचम्	(१८) भार्गवम्।

तत्र पाराशरोपपुराणं मयैव कथितम्। पुराणमिदं शिवप्रीतिकारकमिति।

द्वितीयोऽध्यायः सृष्टिक्रमः)

प्रलयकाले खल्विदं चराचरं जगत् स्वकीयकारणीभूतमायाऽभिन्नरूपेण वासनारूपेण मायाभिन्ने परमेश्वरे संतिष्ठते न त्वभावरूपेण वर्तते। ततः प्रलया-

वसाने सर्गाद्यकाले कालकर्मविपाकात् वासनावलाच्च मायाया स्रक्फणीव महान् आत्मा जायते। महानात्मा च स्रष्टव्यविषयकसत्त्वजज्ञानमेव। तत्स्वरूपं महान्तमात्मानं सृष्ट्वा शिवः स्वयं तत्रानुप्राविशत्। एवंभूतो महानात्मा ज्ञानप्राधान्यात् सर्वज्ञ इति तथा ईक्षणोपाधित्वाच्च प्रधान इति गीयते। स ईक्षिता महानात्मा सत्त्वं रजस्तमश्चेतिगुणानात्मतयाऽङ्गीकृत्य(अभिमत्य)रजोगुणेन जगदुत्पाद्य सत्त्वेन परिपाल्य तमसा च संहृत्य स्रष्टा गोप्ता संहर्त्ता चेतिसंज्ञां क्रियानुरूपां भजन् स्रष्टृत्वेन ब्रह्मा गोप्तृत्वेन विष्णुः संहर्तृत्वेन शिव इत्यभिधाभिः व्यवह्रियते। तत्र महेश्वरः सृज्यमानसकलप्रपञ्चकारणस्याधिष्ठानतया जडा माया च परिणामितयोपकरोति तथा भूतानां सर्गे स्थितौ लये च पुण्यं पापं काले वासनापि सदोपकुर्वन्ति। ब्रह्मविष्णुमहेशानां सर्गानन्तरं मायातः शब्दपूर्विका भूतसृष्टिः प्रवर्तते। शब्दादिपञ्चभूतानां सत्त्वगुणैर्ज्ञानशक्तयो(ज्ञानेन्द्रियाणि)रजोगुणैश्च कृतिशक्तयः(कर्मेन्द्रियाणि) जायन्ते उत्पन्नाश्च ता ज्ञानशक्तयः स्वकारणैकमायाख्याविद्यया कवलीकृताः सत्यः एकाकारत्वमापद्य कालकर्मविपाकात् अन्तःकरणानां (मनोबुद्धिचित्ताहङ्काराणां) व्यष्टिसमष्टिरूपाभ्यां प्रवर्तन्ते; एवं समुत्पन्नाः कृतिशक्तयः स्वकारणैकमायारूपयाऽविद्यया कवलीकृताः सत्यः एकाकारत्वमापद्य कालकर्मविपाकात् सर्वस्य प्राणस्य (पञ्चविधस्य) व्यष्टिसमष्टिरूपाभ्यां विजायन्ते। तत्र शब्दादितन्मात्रास्थाः सत्त्वगुणोत्पन्ना ज्ञानशक्तयो ज्ञानेन्द्रियाणां समष्टयस्तथा कृतिशक्तयः कर्मेन्द्रियाणां समष्टयो भवन्ति। समष्टयन्तःकरणं मनोबुद्धिचित्ताहङ्कारभेदाच्चतुर्विधं समष्टिप्राणः प्राणापानव्यानोदानसमानभेदात्पञ्चविधो भवति। तत्र तेषां बाह्यान्तःकरणादीनामभिमानिनो देवा हिरण्यगर्भादयः सर्वस्य च भगवान् सत्यादिलक्षणोपेतः साम्बोऽधिष्ठातृदेवः। तस्मात् साम्बशिवात् ब्रह्माण्डभेदो लोकभेदो भोक्तृभोग्यभेदो देवभेदो वर्णाश्रमादिभेदो धर्माधर्मसुखदुःखमर्त्यस्वर्गादिभेदो माययोत्पद्यते। स एव सत्यादिलक्षणः साम्बः सर्वकारणं नापरः। तस्माच्छ्रौतस्मार्तविधिभिः स एवोपास्योऽपरस्तु तच्छेषत्वेन। स एव सर्ववेदान्तप्रतिपाद्यः वेदानुसारिस्मृतिपुराणेतिहासादिप्रतिपाद्यश्च। श्रौतस्मार्तै सदाचारैः स एवाराध्यः तच्छेषत्वेन तदन्यदेवा आराध्याः। क्वचित्वदाचिद् ज्ञेयत्वं ध्येयत्वं चैषां तद्रूपत एव न, अपि तु साम्बस्यान्वयेन। स्मृतयः पुराणानि भारतेत्यादीतिहासाः शिवशङ्कररुद्रेशब्रह्मेशानादिनामभिः परमं पदं ब्रुवन्ति, न तु विष्णुनारायणादिनामभिः। रुद्रादिशब्दा रुढ्या परमेश्वरे वर्तन्ते विष्ण्वादिशब्दा योगवृत्त्या। सत्यादिलक्षणः साक्षात् साम्बः सर्वमूर्तिः, तदधीनमेव जगत्। वेदास्तमेव परमतत्त्वं वदन्ति। स शिवः परमतत्त्वतया पापिनां कृते न भासते किन्तु सिद्धानां श्रौतस्मार्तानुवर्तिनां कृते विभासते। सर्वैरपि प्राणिभिरमात्ये राजदृष्टिरिव सर्वत्र शिवदृष्टिः कर्तव्या। स एव राजाधिराजः तस्यैवानुचरा ब्रह्मादयः। तत्प्रसादादेव

मुक्तिहेतुपरिज्ञानं, न तु विष्ण्वादिप्रसादात्। मुक्त्यर्थं ये साम्बं शिवं विहायान्यदेवान् यजन्ते, न ते विमुक्ता भवन्ति। अपि तु संसरन्ति। सर्वं परित्यज्य शिव एव ध्येय इति वदत्याथर्वणी श्रुतिः। ईदृशी निष्ठा शास्त्राणामपि। साम्बादतिरिक्तं सर्वं विश्वं ततोऽधिकः शिव एव जगन्नाथः संसारमोचकश्च।

तृतीयोऽध्यायः (जीवानां तारतम्यविवेचनम्)

शम्भुना सृष्टेषु जडाजडेषु सर्वेषु विश्वेषु विशेषादरणीयत्वात् देवानामधिकं महत्त्वं, ततोऽतिरिक्तेषु अचेतनापेक्षया चैतन्यं महत्तरं, तत्रापि मानवाः श्रेष्ठास्तेभ्यश्च द्विजा मतास्तेषु च कुलीनाः (श्रोत्रिया) तेभ्यो मनुष्यगन्धर्वास्ततो देवगान्धर्वाः, तेभ्यः पितरः पितृभ्यश्च कर्मदेवास्ततो देवाः, देवेभ्य इन्द्रस्तस्माद्-वृहस्पतिर्वृहस्पतेः प्रजापतिस्ततो ब्रह्मा, ब्रह्मणा विष्णुर्विष्णोर्मायी शिवस्ततः साम्बः शिवोऽधिको मतः। तदन्यत्सर्वं विश्वं विश्वाधिकः शिवः, तत्पराण्येव वेदान्तवाक्यानि सन्ति। स्मृत्यादीनि शास्त्राणि श्रुत्यनुग्राहकास्तर्काः साम्बं विहाय नान्यं विश्वाधिकतया प्रवदन्ति। सर्वाणि माहेश्वरपुराणानि असाधारणया मूर्त्या साधारणेन नाम्ना च परमतत्त्वं साम्बं शिवं प्रवदन्ति तथा तदंशं वैभवं तदंशमानञ्च कथयन्ति। वैष्णवपुराणानि त्रिमूर्त्तिषु हरेर्नाम्ना मूर्त्या च तस्यैव परमतत्त्वं वदन्ति तथा तदंशे तद् वैभवं तदंशमानं च निगदन्ति। ब्राह्मे द्वे आग्नेयसौरपुराणे त्रिमूर्त्तिषु ब्रह्मण एव परमतत्त्वं तथा तदंशतद्वैभवमानं वदन्ति। शैवपुराणेषु हरेर्योऽपकर्षो दृश्यते स साक्षान्मूलभूतस्य हरेरस्ति तथा वैष्णवपुराणेषु शिवस्य योऽपकर्षो दृश्यते स केवलं शिवविभूतेरस्ति। एवं शैवेषु रुद्रस्य य उत्कर्षः स स्वरूपेण तत्त्वात्मना चास्ति, किन्तु वैष्णवेषु विष्णोर्य उत्कर्षः स तत्त्वात्मनैव, न स्वरूपेण। एवं ब्राह्मयोरपि पुराणयोर्ब्रह्मणो ज्ञेयः।

पुरा अहमहमिकयोरुत्कृष्टं मन्यमानौ ब्रह्मविष्णू मिथो युध्यमानौ क्रोधेन परस्परं शप्तवन्तौ। तत्र ब्रह्मा विष्णुमेवं शशाप—त्वं गर्भस्थो भव, तव भक्ता वेदोक्तमार्गविमुखाः शङ्खचक्राद्यङ्किताः पाञ्चरात्रादिदीक्षिता भवेयुः। विष्णुश्चापि तमेवं शशाप—त्वदीयं पञ्चमं शिरः शङ्करः कर्त्स्यति, त्वद्भक्ता अपि संकरा भवेयुः, त्वदीयं तन्त्रं छिन्नं प्रतिष्ठा च भ्रष्टा स्याताम्। एवं तौ प्रस्खलितावभवताम्। तदित्थं शिवस्यैवाधिक्यं निर्बाधं वर्तते। इत्थं ये न मन्वन्ते ते पातकिनः सन्ति।

चतुर्थोऽध्यायः (देवतालिङ्गं भस्मत्रिपुण्ड्रमहिमा च)

देवा द्विधा—श्रौता अश्रौताश्च। तत्र श्रुतिधर्मैकनिष्ठाः श्रौतास्तद्भिन्ना अश्रौताः। श्रौतानां तु श्रौतं लिङ्गम्, तच्च त्रिपुण्ड्रम्। अश्रौतानामश्रौतमूर्ध्व-

पुण्ड्रादि लिङ्गम्। शम्भुविष्णुब्रह्मणां तज्जातानां विशिष्टानामपि च श्रौतमेव लिङ्गम्। तत्र तन्त्रसिद्धो महादेवः शम्भुस्तन्त्रोक्तरीत्या ललाटे भस्मना तिर्यक् त्रिपुण्ड्रं, महाविष्णुस्त्रिशूलमूर्ध्वपुण्ड्रं विरिञ्चिश्चतुरस्रकं दधति। इन्द्रादीनां वज्रपाशाङ्कुशादीनि लिङ्गानि सन्ति। तन्त्रनिष्ठैः शिवभक्तैस्तन्त्रोक्तपद्धत्या ललाटे भस्मना त्रिपुण्ड्रं विष्णुभक्तैस्त्रिशूलं चतुरस्रं वा विरञ्चिभक्तैर्वर्तुलमिन्द्रादि-भक्तैश्च वज्रपाशाङ्कुशादिकं धार्यम्। अथवा सर्वैस्तान्त्रिकैर्वैदिकैश्च भस्मनैव त्रिपुण्ड्रं कार्यम्। नान्यलिङ्गम् धारणीयम्। महापाप्मनामेव महेश्वरे तल्लिङ्गे द्वेषो भवति। एवं भूतैस्तत्कार्यैस्तदुत्पत्तिविषये साङ्कर्यमेवानुमेयं विपश्चिद्भिः। एवमेव ये वेदमार्गसमं भिन्नं मार्गं, शिवरुद्रादि नामभिः समं विष्ण्वादिशब्दं मन्वते तथा च महादेवादधिकं विष्णुं मन्यन्ते तेषामपि वंशसाङ्कर्यमनुमेयम्। पापबाहुल्याद् दधीचिगौतमयोः शापाच्च श्रौतं लिङ्गम् जनेभ्यः प्रायो न रोचते, प्रत्युत भ्रान्त्या अश्रौतमेव रोचते। अनेकजन्मसिद्धानां श्रौतस्मार्तसदाचारशालिनां वेदोक्तत्रिपुण्ड्रे रतिर्जायते। त्रिपुण्ड्रेनैव ब्राह्मण्यं पुष्कलं भवति। एतत् ज्ञानप्रदं महापातकविनाशकं शिवादीनां देवानां पार्वतीत्यादिदेवीनाञ्च प्रीतिकरं चास्ति। भस्मना त्रिपुण्ड्रं विना भक्तिर्ज्ञानमाचारो विफलाः। एतदेव सतां मार्गः, वर्णधर्मः, आश्रमधर्मः, माङ्गल्यं सर्वसिद्धिकरं ज्ञेयम्। नह्येतद् विना मुक्तिः संभवति। अतो मुक्तिकामैरेतदवश्यमेव धार्यम्।

पञ्चमोऽध्यायः (श्रुत्यर्थविचारः :—मानवानां श्रेष्ठताक्रमविचारः)

सर्वेषां जन्तूनां निखिलस्य च जगतः कर्त्ता, भर्ता; संहर्ता महेश्वर एव नास्ति तत्समस्तदधिको वा कश्चिच्चेतनः। स एव सत्यज्ञानानन्दैकलक्षणः परो महेशो रुद्रविष्णुविरञ्च्यादिरुपेण बहुधा सन्तिष्ठते। शिवस्यास्य प्रसादात् ब्रह्मविष्ण्वादिदेवानां सृष्टिस्थितिप्रलयकर्तृत्वं मुक्तिभुक्तिप्रदत्वञ्चोपजायते अस्य विज्ञानादेव मुक्तिर्न कर्मणा नापि कर्मविज्ञानाभ्याम्। तच्च मोक्षप्रदं ज्ञानं वेदान्त-श्रवणमनननिदिध्यासनैः वेदोक्तमार्गेण भस्मना त्रिपुण्ड्रधारणेन च शुद्धान्तः-करणानां प्राणिनामभिजायते। चित्तशुद्धिश्च यज्ञदानतपः कर्मभिर्भवति। अतः श्रेयोभिलाषुकैः सर्वचेननैः सर्वथा वर्णाश्रमसदाचाराः श्रौताः स्मार्ता न त्याज्याः।

सर्वेषु मानवेषु जम्बूद्वीपनिवासिनो मानवा वरिष्ठास्तेष्वान्तरालजास्तत्रापि प्रतिलोमजास्ततोऽनुलोमजा वरिष्ठाः सन्ति। संकरप्रभवेभ्यो वरिष्ठा वर्णसंभवाः तत्र शूद्राद्वरिष्ठो वैश्यस्ततो राजन्यस्तत आस्तिको विप्रो वरोऽस्ति। विप्रः खलु सर्व-मानवानां देव इति–अर्थात् भूसुरः। तस्माद्देवाः श्रेष्ठास्तत्र ब्रह्मा (स्रष्टा) ततो विष्णुः (पालकः) ततो रुद्रः (संहारकः) श्रेष्ठो वर्तते। एतेषां सर्वेषां देवानाम-पेक्षया परमेश्वरो वरिष्ठः। तत्र वरिष्ठयोः परस्परं सम्बन्धः समुचितः।

तस्माद् विप्रस्य शिवेनैव सह संबन्धः सुपूजनीयोऽति। वर्णदृष्ट्या विचारे सर्वे देवाः सङ्कराः, पुरन्दरोवृषलः, पितामहो वैश्यः विष्णुः क्षत्रियः, रुद्रो ब्राह्मण इति। अतोऽयं नैसर्गिको रुद्रस्सर्वोत्तमः, नास्य ब्राह्मण्यं हेतुजम्। दृश्यते च लोके, ब्राह्मणो ब्राह्मणमेवोपधावति, नापि वर्णान्तरान्। तस्माद् वेदविद्भिः, ब्राह्मणः शिव एवोपगन्तव्यः। य एवं नाचरति, तत्रावश्यमेव साङ्कर्यम्। आदिभूतेन ब्राह्मणेन शिवेन धृतस्य भस्मत्रिपुण्ड्रस्यानुसरणं ब्राह्मणानां धर्मः। एष एव च तेषां नित्यो धर्मः। तच्छेषत्वेनैव विष्वादिदेवानामुपाश्रयणं न तु प्रधानत्वेन।

षष्ठोऽध्यायः (वेदगूढार्थविचारः, रुद्राक्षमहिमा च)

वेदानां प्रत्यक्षसिद्धोऽर्थः सर्वैः संग्राह्यः, किन्तु तदप्रत्यक्षसिद्ध्यर्थं मुनीश्वराः क्वचित्कदाचिदधिकारिविशेषाणां कृते प्रकटयन्ति। परा श्रुतिः क्वचित् शिवागमानुसारेण क्वचित् वैष्णवागमानुसारेण क्वचित् ब्राह्मतन्त्रानुसारेण जन्मना वाप्तोच्चजातीनां सर्वेषामाश्रमाणां धर्मं निगदति। स्मृतयः पुराणानि महाभारतादीतिहासाः तेषां क्वचित् कदाचिद् भ्रष्टानां च कृते वेदधर्मानादिशन्ति। तदुक्तधर्मे प्राधान्येन महादेव एव पूज्यो नेतरः। तत्प्राप्त्यर्थमेव विष्णुः पितामहः सर्वे देवा उत्तममध्यमाधमाः पूज्याः सर्वजातिभिः सर्वाश्रमस्थैश्च। वेदोक्तधर्मे त्रिपुण्ड्रं भस्मगुण्ठनं रुद्रलिङ्गार्चनं मुख्यम्। वर्णाश्रमच्युतेन प्रायश्चित्तविमुखेनापि वेदागमोक्तो धर्मः करणीयः। सर्वागमनिष्ठानां कृते त्रिपुण्ड्रं विहाय भ्रमात् पुण्ड्रान्तरग्रहणे तेषां पात एव। त्रिपुण्ड्रधारणं, भस्मावगुण्ठनं, वर्णशिखाकण्ठहस्तेषु रुद्राक्षधारणं श्रेयोऽर्थिभिरादरात् कर्तव्यम्। महादेवो विष्णुर्ब्रह्मा तद्विभूतयोऽन्ये देवाश्च भक्त्या रुद्राक्षं धारयन्ति। पापिष्ठानामेव रुद्राक्षधारणे श्रद्धा न जायते। सर्वेषां कूटस्था गोत्रर्षयः तद्वंशप्रसूताः सर्वे श्रौतधर्मपरा मुनयो रुद्राक्षधारिण एव। महादेव प्रसादाद् बहूनां जन्मनामन्ते रुद्राक्षधारणे श्रद्धा संजायते तथा वेदवेदान्तविज्ञाने वेदोक्ते शास्त्रोक्ते च कर्मणि पुण्येन श्रद्धोत्पद्यते। पापिनां वेदेतरस्वतन्त्रमार्गे स्वभावेनैवेच्छा प्रवर्तते। वेदवादेतरासक्ता बहवो जनाः शिवाज्ञया निरयं प्राप्तास्तथा वेदोक्तमार्गरता अनेके जनाः शिवप्रसादात् भवबन्धनविमुक्ता अभूवन्। मातृवत् श्रुतिर्गोपायति, शत्रुवत् वेदेतरमार्गः साक्षात् बाधकोऽस्ति। तन्त्राणि तन्त्रनिष्ठानामेव रक्षकाणि वेदानुयायिनां तु बाधकान्येव। तस्माद् वेदोक्तो धर्म एव वैदिकैर्ग्राह्यो न तु तन्त्रोक्तः।

सप्तमोऽध्यायः (ब्राह्मणवैभवम्)

ब्राह्मणस्त्रिविधः—१-जन्मब्राह्मणः, २-वेदब्राह्मणः, ३-ब्रह्मब्राह्मणः। तत्र ब्राह्मण्यां ब्राह्मणेन जातः प्रथमः। सहस्रजन्मार्जितपुण्यवशात् लोके ब्राह्मणगृहे

जन्म लभ्यते। देवानां प्रसादान्मानुष्यमाप्नोति। तत्र इन्द्रप्रसाद् वृषलो, ब्रह्मणः प्रसादाद् वैश्यो विष्णोः प्रसादाद् राजन्यो महादेवस्य प्रसादाच्च ब्राह्मणो लोके जायते। तथा च महादेवप्रसादाद् ब्राह्मणो ज्ञाननिष्ठः, क्षत्रियो रक्षकः वैश्यो वाणिज्यकृषिकः शूद्रश्च शुश्रूषुर्भवति। मनुष्याणां ब्राह्मणः श्रेष्ठः। ब्राह्मणस्यैव तपसा इदं जगत् प्रवर्तते (स्थिरो भवति धार्यते च)। अतः राज्याभिषिक्तै राजभिः सर्वदा ब्राह्मणो रक्षणीयः। ब्राह्मणावगूरणे तु अवगूरयिता स्वर्णशतेन राज्ञा दण्ड्यः। प्रहारे सुवर्णेन दण्ड्यो भवति प्रहर्त्ता। प्रहारे रुधिरे प्राकट्ये सति प्रहर्ता अयुतेन सुवर्णेन दण्ड्यः। अथ शस्त्रादिभिर्ब्राह्मणानां देहक्षते प्रहर्त्तृ करच्छेदनम् करणीयम्। चक्रादिभिरग्निना वा ब्राह्मणदेहस्याङ्कने शीघ्र-प्रवासनमेव दण्डः। यतो हि पतितानां तस्मादङ्कनं सर्वथा त्याज्यम्। यः खलु वेदब्राह्मणस्तस्यावमानं भ्रान्त्याऽपि न करणीयम्। अधीतवेदयोः क्षत्रियवैश्ययोर-वगूरणं न कार्यं, नापि हिंसा, किमुत वक्तव्यं - वेदब्राह्मणानाम् कृते चावगूरणे-हिंसायाः कर्त्ता च पूर्ववद् दण्ड्यः। यस्तूत्तमो ब्रह्मब्राह्मणस्तस्यावमानं छेदनं च न कार्यम्, कर्त्ता च पूर्ववद् दण्ड्यो भवति। ब्रह्मनिष्ठद्विजानां निन्दका राज्ञा राष्ट्राभिवृद्धये हन्तव्यास्तथा भस्मनावगुण्ठितास्त्रिपुण्ड्रभूषिता ब्राह्मणा रक्षणीया। एतदपराधे दण्डितपुरुषः अध्ययनाध्यापनश्रौतस्मार्तकर्मसंभाषणसंब धेषु नाधि-कारी। ब्राह्मणस्य चिह्नानि तु वैणवो दण्डः, सोदकः कमण्डलुः यज्ञोपवीतं त्रिपुण्ड्रश्च सन्ति। तानि सर्वाणि ब्राह्मणैः सर्वदा सर्वथा धार्याणि। न च त्रिशूल-मूर्ध्वपुण्ड्रं वर्तुलं चतुरस्रकमर्धचन्द्रादिकं लिङ्गम् कदापि धार्यम्। ब्राह्मणस्य शरीरे सर्वे देवा निवसन्ति, तस्मात् स विशेषतः पूज्यो न कदाप्यवमन्तव्यः। भवेत्कोऽपि देवो महादेवतुल्यः किन्तु ब्राह्मणतुल्यस्यस्तु नास्त्येव। ब्राह्मणचरणस्प-र्शादिवेयं भूमिः शुद्ध्यति तस्य दृष्टिपातादेव सर्वपापाद् विमोचनं भवति, किं बहुना ब्राह्मणमाश्रित्य जगदेतद् विवर्धते।

अष्टमोऽध्यायः (वेदरहस्यार्थः)

वेदवेदान्तप्रतिपादितयोर्ज्ञानकर्मणोर्ज्ञानस्य प्राधान्यम्। तत्र ज्ञानं द्विधा-एकं साक्षात् परं तत्त्वं द्वितीयं च कारणाज्जन्यम्। तदपि प्रथमज्ञानस्यार्थमुपयुज्यते। कारणोत्पन्नं ज्ञानं द्विधा-एकं तत्त्वावेदकं द्वितीयं च मृषार्थकम्। तत्र तत्त्वावेदकं वेदान्तमात्रजन्यं ब्रह्मज्ञानापरनामधेयं शान्तिप्रव्रज्याभस्मोद्धूलनत्रिपुण्ड्रैकाग्रमति-दान्तिवेदान्तोक्तसाधनचतुष्टयसंपन्नस्य जायते न तु शान्त्यादिरहितस्य। द्वितीयं मृषार्थविषयकं ज्ञानमतत्त्वावेदकनामकमस्ति। व्यवहारदशायां तन्मिथ्याज्ञान-नत्यते। महादेवमायया यः सत्यत्वेन कल्पितः तदर्थविषयकज्ञानं सम्यग्ज्ञानं तत् संसारभोगायैव शिवेन निर्मितम्। सर्वाणि नित्यकर्माणि मुक्तिज्ञाने परम्पर-

योपयुज्यन्ते। वर्णाश्रमवयोऽवस्थाविशेषाध्यासवान् मानवः सर्वशास्त्रेषु अधिकारी भवति न तु वर्णादिहीनः। ज्ञानार्थश्च नित्यकर्माणि ब्राह्मणैः कार्याणि।

वेदादन्यत्र विज्ञानं नास्ति, तस्मात्कल्याणसदनमेकं वेदः तन्मूलानि मन्वादिशास्त्राणि निखिलानि पुराणानि सादरं नित्यं समाश्रयणीयानि श्रेयस्कामैः। वेदेऽपि क्वचिद् बाह्यार्थतया यत् किञ्चिदुक्तं विरुद्धतया भाति तदपि वैदिकैस्त्याज्यमेव न तु ग्राह्यम्। सांख्ययोगन्यायवैशेषिकशास्त्रेषु वेदैकशरणैर्मानवैर्वेदविरुद्धोंशः सर्वथा त्याज्यः, किन्तु पाणिनीयं शब्दसाधुत्वोपपादकं शास्त्रं सर्वं ग्राह्यं न त्वंशतः किमपि हेयम्। मीमांसायां वेदान्ते (ब्रह्मसूत्रे) च कोऽप्यंशो वेदविरुद्धो नास्ति, अपि तु वेदार्थविज्ञाने सर्वांशतस्ते शास्त्रे परमोपयोगिनी स्तः। बौद्धजैनचार्वाकशास्त्राणि तु वैदिकैः सर्वदा त्यक्तव्यानि।

नवमोऽध्यायः (आह्निककृत्यविचारः)

प्रातः कृत्यम् :—

मानवः ब्राह्मे मुहूर्ते उत्थाय साम्बं शिवं ध्यात्वा समाहितो भूत्वा धर्ममर्थञ्च चिन्तयेत्। ततो विण्मूत्रे त्यक्त्वा वारिणा प्रक्षाल्य गण्डूषैरम्भसा च मुखं प्रक्षालयेत्। सकृदाचम्य प्राङ्मुख उदङ्मुखो वा भूत्वा मध्यमाङ्गुलिसदृशस्थूलेन द्वादशाङ्गुलिपरिमितदीर्घेण त्वक्सहितेनार्द्रेण क्षीरिणा मालतीकरवीरापामार्गविल्वजानामेकेन केनचिद् दशनशोधोपयोगिना काष्ठेन दन्तशुद्धिं काष्ठान्तरेण च जिह्वाशुद्धिं विधाय तत्काष्ठं भङ्क्त्वा शुभे स्थले निखनेत्। ततो दशगण्डूषान् कृत्वा आचम्य प्रयतो महानदीषु तडागे वा स्नायात्। एतत् वारुणनामकं स्नानम्। जलस्नानाशक्तौ आर्द्रवाससा उत्तमाङ्गादिपादान्तं मार्जनं करणीयम्। एतद् ब्राह्मनामकं स्नानम्। एतदभावे अग्निमूर्धेत्यादि जाबालोक्तसप्तमन्त्रैः त्रिपुण्ड्रधारणपूर्वकं भस्मना स्नायात्। इदञ्चाग्नेयं स्नानम्। गवाङ्घ्रिरजसा वायव्यनामकं स्नानं वा कुर्यात्। अथवा सातपेन वर्षेण दिव्यनामकं स्नानं कार्यम्। उताहो आत्मविज्ञानरूपेण जलेन मानसनामकं स्नानं विधेयम्। अस्मान्मानसस्नानान्न किञ्चिद्वरम्। तस्मादात्यन्तिकी शुद्धिर्भवति। एवं स्नात्वा देवान् ऋषीन् पितॄंश्च तर्पयित्वा स्वसूत्रोक्तमार्गेणाचम्यापोहिष्ठेत्यादिभिस्त्रिभिर्मन्त्रैः कुशोदकैश्चात्मानं संप्रोक्ष्य सूर्यश्चेत्यादिमन्त्रेणाभिमन्त्र्य पीत्वा दधिक्रेत्यादिना पुनराचम्य आपो हिष्ठादिभिः पुनः स्वं संप्रोक्ष्य प्रदक्षिणीकृत्य जलाञ्जलिमादाय गायत्र्याभिमन्त्र्य सूर्यायार्घ्यं दत्त्वा त्रिः प्रदक्षिणीकृत्य नदीतीरे शुद्धदेशे वा दर्भाद्यासने उपविश्य शास्त्रानुकूलं प्राणायामत्रयं कृत्वा सन्ध्यामभिध्यायेत्। सन्ध्यावन्दनहीनः पुरुषः सर्वदाऽशुचिर्भवेत् श्रौतस्मार्तसदाचारेऽधिकारी न स्यात् नरकगामी

च भवेत्। सन्ध्यावन्दनेन द्विजातयः कर्मबन्धनाद् विमुक्ता भवन्ति। सन्ध्याकर्मणि द्विजैः अष्टोत्तरसहस्रमष्टोतरशतमष्टाविंशतिर्वा गायत्रीजपनीया। अर्धोदयवेलायां प्राणायामपूर्वकं स्वसूत्रोक्तेन मन्त्रेण श्रौतैः सूक्तैः स्मार्तैः स्तोत्रैश्च सूर्य उपास्यः। ओं स्वस्वोल्काय शान्तायेत्यादिमन्त्रेण तस्य प्रणतिर्विधेया। स्वसूत्रेण पावके सभिदाधानं कुर्वीत। मेधावीत्यादिमन्त्रेण सिद्धभस्मना त्रिपुण्ड्रधारणं वेदोक्तवर्त्मना पत्रपुष्पादिभिर्नित्यं शिवलिङ्गार्चनम् तच्छेषत्वेन विष्णुब्रह्मदेवान्तर-पूजनञ्च कुर्यात्। समिदाधानहीनपुरुषः सप्ताहात् पतितो भवेत्। गुरून् देवान् प्रदातॄन् नमस्कारादिभिः पूजयेत्। ततः आचार्यमुखतः प्रेमतोऽध्ययनं कार्यम्। येन वेदचतुष्टयमाचार्यमुखादधीतं तस्य जीवनं सफलम्। गुरुपूजनं कार्यम्। ब्रह्मचर्यमाचरणीयम्। अधीतेन वेदत्रयेण रुद्रो, वेदद्वयेन विष्णुरेकेन च ब्रह्मा प्रसीदति। अध्ययनवद् अध्यापनमपि कार्यम्। पाठधारणमात्रेण ब्राह्मण्यं पुष्कलं भवति मोक्षावाप्तिश्च। धर्मशास्त्रं वेदाङ्गानि च चिन्तनीयानि। न्यायेन अर्थः साधनीयः। अतिथयो ब्राह्मणाश्च प्रसन्नमनसा सत्कार्याः।

मध्याह्नकृत्यम्—

मध्याह्ने मृत्पिण्डेनैकेनामलकसमेन शिरस्तथैकेन नाभेरुर्ध्वं चतुर्भिर्नाभेरधः षड्भिः पादौ प्रक्षाल्य तथैव गोमयपिण्डेनाङ्गमनवलिप्य पुनस्तथा मृत्पिण्डेन देहं प्रक्षाल्य पुनराचम्य वारुणैर्मन्त्रैः शुद्धं जलमभिमन्त्य तोयमध्ये जलाधिदेवं ध्यायन् स्नायात्। स्नात्वाचम्य अन्तर्जले द्रुपदानाम गायत्रीं सकृद् प्रजप्य 'मृत्तिके हर मे पापम्' इति मन्त्रेण मृत्तिकां शिरसि धारयित्वा पुनः स्नायात्। ततो जलमञ्जलि-नादाय मन्त्रेणाभिमन्त्य मूर्ध्नि निक्षिपेत्। पुनश्च स्नात्वाऽऽचमेत्। केचित्प्रातः स्नानवन्मध्याह्नस्नानमप्याहुः। ततः पूर्वोक्तरीत्या प्राणायामादिकं सर्वं विधाय करमालया शङ्खमणिपुत्रकीवपद्माक्षस्फटिककुशग्रन्थिरुद्राक्षमालाभिर्वा यथाशक्ति यथा संख्याकष्टोत्तरशतं वा सावित्रीं जपेत्। स्वसूत्रोक्तरीत्योपस्थानं च कुर्यात्। एतासु मालासु रुद्राक्षस्य माहात्म्यं सर्वश्रेष्ठम् जाबालमुनिनाऽन्यैश्च साक्षाच्छिवेनोदितं तत्। अङ्गुल्या जपेऽष्टगुणं शङ्खमणिभ्यामष्टोत्तरशतगुणं पुत्रजीवेन शतत्रयगुणं पद्माक्षेण सहस्रगुणं स्फाटिकेनायुतत्रयगुणं कुशग्रन्थ्या कोटिगुणं रुद्राक्षेणानन्तगुणं फलं भवति। तस्माद् रुद्राक्षेण सर्वप्रयत्नैर्जपः कार्यः। उच्चैर्जपादुपांशुर्वरिष्ठस्ततो जिह्वाग्रजः शतगुणस्ततो मानसः सहस्रगुणो भवति। रजस्वलां चाण्डालीं सूतिकां पतितं बौद्धं च दृष्ट्वाऽऽचम्य मन्त्रञ्च जप्त्वा स्वसूत्रानुसारेण ब्रह्मयज्ञः करणीयो देवर्षिपितृगणाश्च तर्पणीयाः।

सायंकालिककृत्यम्—

स्वसूत्रोक्तविधानेन सायंकृत्यं करणीयम्। प्रत्यहं नित्यकर्मणामनुष्ठानेन

दुरितक्षयश्चित्तशुद्धिश्च जायते। यया च चित्तशुद्ध्या संसारे दोषदृष्टिरुपजायते यतश्च संसारविरक्तिर्भवति। विरक्तस्यैव संसारात्संन्यासः स्यात्। विरक्तिश्च द्विधा-तीव्रा तीव्रतरा च, तत्राद्यायां जायमानायां योगिना कुटीचकनाम्नि संन्याससंप्रदाये संन्यासः कार्यः। शक्तौ सत्यां तीव्रायां विरक्तौ हंसनामके मुमुक्षुः संन्यसेत् ततः साक्षाद् विज्ञानसाधनात्मके परमहंसाभिधेये संन्यसेत्। परमहंसः मोक्षैकसाधनं ब्रह्मविज्ञानं वेदान्तश्रवणादिना अभ्यसेत्। ब्रह्मविज्ञानलाभाय परमहंसाख्य एव संन्यासः। संन्यासे शान्तिदान्त्यादिसर्वसाधनसंपन्नताऽपेक्षिता वर्तते। बाह्येन्द्रियाणां विषयेषु व्यावृत्तिः शान्तिः, मनसो व्यावृत्तिर्दान्तिः, सहिष्णुता तितिक्षुत्वम् समाहितत्त्वमेकाग्रता। शास्त्रोक्तरीत्या कर्मत्यागसंकल्पः साक्षात्-संन्यासः। स च कर्मसंत्यागद्वारा अविद्यानाशके शुद्धे ब्रह्मवेदने उपकरोति, शान्त्यादयः प्रवृत्तिव्यावृत्तिद्वारेणोपकुर्वन्ति, अन्यानि सर्वाणि कर्माणि दृष्टद्वारेणोपकुर्वन्ति नादृष्टद्वारेण, तथाप्यङ्गानि भवन्ति, अपि च ज्ञानोत्पत्तिप्रतिबन्धकं पापसमूहं घ्नन्ति। तस्मात् शान्तिदान्तिसंन्यासतितिक्षुत्वमेकाग्रतागुरुभक्ति शिवभक्त्यादीनि ज्ञानसिद्धयेऽङ्गानि श्रुतिसिद्धानि सन्ति। मुमुक्षुभिः परमहंसैः सर्वप्रयत्नेनाप्रमादेनातन्द्रया श्रद्धया च ज्ञानार्थं कर्म कर्तव्यम्। कर्मणा विना विज्ञानं न सिद्ध्यति। पापापनोदनार्थं नैमित्तिकं च कर्तव्यम्। पापिष्ठस्य ज्ञानं नोत्पद्यतेऽनर्थं च जायते। अतः नैमित्तिकं श्रद्धया कार्यम्। नित्यनैमित्तिककर्मभ्यां वरो नास्ति कश्चनोपायो ज्ञानार्थम्।

दशमोऽध्यायः (निषेधमुखेन आचारविमर्शः)

ब्रह्मचारिणो वर्ज्यविषयाः—

यज्ञोपवीतसंस्कारसंपन्नैर्द्विजैर्गुरोरन्तिकमाश्रित्य प्रत्यहं सर्वं आचारो ग्राह्यः। अनुज्ञापालकैः स्वाचार्यमनिरीक्षमाणैर्वेदो नाध्येतव्यः। शयानो गच्छन् तिष्ठन् वा कदाचिद् वेदवादिनामुपेक्षां परिवादञ्च न कुर्यात्। गुरुसन्निधौ यथेष्टासनग्रहणं, कर्णप्रावरणं, चरणप्रसारणं, छत्रपादुकाधारणं, दानग्रहणं, हास्यं, गुरोर्नामग्रहणं न कार्यम्। गुरोर्निन्दा न श्रोतव्या, कर्णौ पिधाय च तद्देशाद्दूरे गन्तव्यम्। रूक्षां कल्याणरहितामनृतां दीर्घसूत्रितां वाणीं न वदेत्, हर्षशोककामप्राणिहिंसा-क्रोधलोभदम्भादयो विशेषतो वर्ज्याः। रोगरहितैरष्टमीषष्ठीचतुर्दशीजन्मपर्वतिथिषु सूर्यगुरुभौमशुक्रवारेषु अभ्यङ्गो न कार्यः। अक्षनृत्यगीताशिष्टजनसम्पर्कादिकं परिहर्तव्यम्। द्विजैर्वेदाध्ययनं विना स्नानं (समावर्तनं) न कुर्यात् नापि गुरोरनुज्ञां विना, तथा चीर्णव्रतैरपि न कर्तव्यम्।

गार्हस्थ्ये वर्ज्यविषयाः—

रूपलावण्यहीनां गोत्रानुकूलहीनां स्वाधिकां भार्यां न गृह्णीयात्। पूर्णिमा-चतुर्दशीषष्ठ्यष्टमीषु मैथुनं न कार्यम्। प्रमादासत्याहितोच्चारणं, चौर्यं, राजन्यवैश्यशूद्रपतितान्त्यजकृतघ्नेभ्यो धनधान्यादिग्रहणं, शूद्रतान्त्रिकाधार्मिकैर्व्याप्ते देशे निवासः, विवादः, मात्सर्यमात्मप्रशंसा, अशिष्टैः पापिभिश्च सह भाषणं चेत्यादि सर्वं द्विजैर्हितमिच्छद्भिर्न कार्यम्। चौरपतितौ प्रति चौरपतितशब्दौ न वाच्यौ, वचनात् तुल्यदोषता स्यात्। असत्यभाषणे द्विगुणो दोषो भवेत्, तस्माज्जनसभायां दृष्टश्रुतदोषकथनं तत्स्मरणं च वर्ज्यम्। ब्रह्मघ्नचौरसुरापगुरुतल्पगैः सह वासो न विधेयः। निमित्तं विना मध्याह्नवर्त्ती, जलस्थोऽस्तगामी सूर्यश्चन्द्रो वा न द्रष्टव्यः। इन्द्रधनुः सन्ध्यां गां विद्युतं महावृष्टिं शुक्रादिग्रहान् दम्पत्योरालिङ्गनं मैथुनञ्च परस्य विण्मूत्रोत्सर्जनं नग्नां स्त्रियं प्रेतं क्रुद्धमुखाचार्यं प्रेम्णा परभार्यां रजस्वलामुदक्यां मत्ताश्च नैक्षेत। भार्यापुत्रबन्धवाचार्यान्यजन्तुभिः सह न भोक्तव्यम्। जन्तून्न लङ्घयेत् नाप्यधितिष्ठेत्, शूद्राय वेदमुखेन परिज्ञानं न दद्यात्। विभवे सति जीर्णवस्त्रादिभिरात्मानं विशेषतो भार्यां पुत्रांश्च नावमन्येत। सर्वै-रस्त्रिभिः शस्त्रिभिर्गजैरश्वैर्मूर्खैश्च सह सम्पर्को न कार्यः। जले नग्नो न तिष्ठेत्। अञ्जलिना जलं न पिबेत्, तटाके सति कूपस्नानं न कुर्यात्। स्नानं देवपूजां भिक्षादानञ्च विना भोजनं न कर्तव्यम्। बालातप-चाण्डालप्रेतधूमापस्मारादि-ग्रस्तान् दूरतः परिवर्जयेत्। सन्ध्याकाले स्वापमैथुनगमनाध्ययनानि न कार्याणि। चरणेन चरणप्रक्षालनं, ब्राह्मणनृपवैश्याग्निस्पर्शः, विना प्रयोजनं जलस्पर्शः, मुखेन वामेन हस्तेन जलपानमयोनौ रेतस्त्यागः, शुक्रस्य पानं च बुधैर्न कार्याणि।

श्मशानचर्मरोमास्थिकपालादीनां परकीयवस्त्रपादुकाछत्राणाञ्च स्पर्शो न कर्तव्यः। वेदवादो न त्याज्यः। वैदिको वेदबाह्यमागमं वैष्णवमन्यं वा न गृह्णीयात्। श्रौतस्मार्तानुगो वेदबाह्यागमपरान् जनान् न स्पृशेत, सति स्पर्शे सचैलं स्नायात्। वेदबाह्यागमाचारः प्रशस्तोऽपि नोपास्यः। त्रिपुण्ड्रभस्मावगुण्ठनरुद्रलिङ्गार्चनादि न त्यजेत्। ख्यातिलाभाय वैष्णवागमोक्तं पुण्ड्रान्तरं न धारयेत्। यज्ञं दानं तपः श्रुतिस्मृत्युक्तं कर्म च न त्यजेत्। वेदधर्मशास्त्रप्रतिषिद्धं कर्म न समाचरेत्। सर्वेषु देशेषु श्रुतिस्मृतिविहितः प्रसिद्ध आचारः प्रमाणं, सोऽपि पुण्यदेशेषु मध्यदेशादिषु-प्रशस्तं प्रमाणम्, अन्यत्र प्रमाणमप्रमाणञ्च। ब्रह्मेन्द्रप्राजापत्यमनुष्यलोकेषु श्रुति-स्मृतिविरुद्धोऽपि आचारः प्रवर्तते। देवमुनिसज्जनानां च दुराचारः कदाचिद् दुर्नि-वारकः प्रवर्तते। यथा प्रजापतिसुरपतिवशिष्ठपराशराणां स्वपुत्रीगौतमपत्नी-उर्वशी-मत्स्यगन्धाविषयकप्रस्खलनं जातम्। अतः सर्वत्र दुराचारसंभावना वर्तते। पुण्येन श्रौतस्मार्तसदाचारे प्रवृत्तिस्तद्विरुद्धे कर्मणि पापिनां प्रवृत्तिर्भवति। वेद-वेदाङ्गधर्मशास्त्रपुराणमहाभारतदेशजातिकुलाचारेषु परस्परविरोधे जाते निःशंकं

वेदानुगामिभिर्वेदविपरीतं सर्वं त्याज्यम् । वेदानुकूलमेव शास्त्रोक्तं ग्राह्यम् । अतीन्द्रियार्थधर्माधर्मादिविज्ञाने वेद एव प्रमाणम् तन्मूला स्मृतयश्च, नहि पुरुषोदिता आगमा पञ्चरात्रादयः प्रामाण्यमादधते । तेषु वेदोक्तसदाचारविपरीता ये आचाराः सन्ति ते सर्वे तत्सम्प्रदायदीक्षितानां कृते सन्ति तथा ये वेदाविरुद्धा आचारास्ते सर्वे शुद्धस्य कृते भवन्ति । केचन, तेषु यो वेदानुकूलाचारस्तं वैदिकानां कृते वाच्छन्ति । वेदमूलस्मृतिपुराणकाराः क्वचित् कदाचित् स्वीयग्रन्थेषु तन्त्रार्थं तन्त्रानुकूलं धर्ममपि कथयन्ति, सोंऽशस्तन्त्रावलम्बिभिर्ग्राह्यः, पुराणधर्मशास्त्रयोर्योंऽशः श्रुतिविरुद्धः स तन्त्रार्थ एव । तस्मात् वेदप्रमाणेन वेदोक्तमेव ग्राह्यम् ।

एकादशोऽध्यायः

महादेवविष्णुब्रह्मदेवान् पापकर्मिणः सदा मोहेन निन्दन्ति तथा महादेवसममन्यं मन्यन्ते । ते सर्वाधिकं जड़चेतनजगन्मूलकारणं साम्बं न स्वीकुर्वन्ति । वेदान्तजन्यमात्मज्ञानं तत्साधनं शान्तिदान्त्यादि यज्ञं त्रिपुण्ड्रं भस्मावगुण्ठनं निन्दन्ति, ऊर्ध्वपुण्ड्रं त्रिशूलं वर्तुलं चतुरस्रकं ललाटे धारयन्ति । शङ्खचक्रगदापद्मवज्रपाशाङ्कुशादिभिरङ्किता भवन्ति । वैधं सकलं कर्म परित्यज्य निषिद्धं कर्म कुर्वन्ति । वेदवेदाङ्गस्मृतिपुराणानि परित्यज्य पञ्चरात्रे कापाले अपरेषु च पाषण्डेषु दीक्षिता भवन्ति । काशीकुरुक्षेत्रपद्मपुराणि विहाय कीकटादिषु निवसन्ति । वश्याकर्षणविद्वेषमारणादिषु यजन्ते, वेदबाह्यं सेवन्ते, अभिषिक्तं नृपतिं, बहुश्रुतं ब्राह्मणं, निर्भयं राष्ट्रं वेदमर्यादां च बाधन्ते ।

द्वादशोऽध्यायः (अभक्ष्य-विवेचनम्)

अन्नदोषादेव चित्तस्य कालुष्यं जायते, कलुषितचित्तानां जनानां धर्मोपेतं वस्तु समीचीनतया न भासते, अपितु धर्मोऽधर्मतया अधर्मो धर्मतया च विभाति, स्वयं प्रकाशमानं ब्रह्मापि न भासते नापि कदाचिद् ब्रह्मविद्यानुराग एव जायते । अत्र किञ्चिदन्नं परब्रह्मप्रकाशप्रतिबन्धकं किञ्चिद् ब्रह्मविषयज्ञानोत्पत्तिप्रतिबन्धकं किञ्चित्परमेश्वरभक्तिबाधकं किञ्चिच्च परब्रह्मरुद्रविष्णुब्रह्मार्कादिदेवविषयकध्यानस्य तद्विभूतिसाधनस्य यज्ञदानतपःकर्मणां विज्ञानसाधनस्य च प्रतिबन्धकमस्ति । किञ्चिच्च ब्राह्मणहत्यायाश्चौर्यस्य कादम्बरीपानेच्छायाः पापिष्ठसंसर्गेच्छाया वेदपरित्यागाभिलाषस्य पाषण्डधर्मानुष्ठानस्य वेदोक्तसदाचाराभावस्य वा कारणं भवति । किञ्चिद् विशेषतः तान्त्रिकविज्ञानस्य वैदिकविषयकाज्ञानस्य तान्त्रिकविज्ञानश्रद्धाया वैदिकविज्ञानश्रद्धाभावस्य, तान्त्रिकसम्मानकर्मणां वैदिकसम्मानाभावस्य वा कारणं वर्तते । किञ्चिदन्नं वेदप्रामाण्यसन्देहकारणं नास्तिक्यकारणं

तन्त्रविश्वासकारणं मौर्ख्यकारणं देवद्रोहादिकारणं रागादिदोषकारणं भ्रान्तिकारणं वास्ति। अतो बुद्धिमता निषिद्धमन्नं सर्वथा परिवर्जनीयम्।

अनुपवीत-यति-यतिप्रेरित-नेत्रहीन-पतित-वेदविहीन-वेदबाह्यालम्बि-वेददूषक-दैवत-श्रौतस्मार्तसदाचारविमुख-कृतघ्न-महारोगाक्रान्त-परदारलम्पट-पिशुन-कन्याविक्रयि-यतिनिन्दक-पापप्रसक्त-श्रद्धाविहीन-भार्या-श्वशुर-दरिद्र-मूक-निर्मर्याद-मूर्ख-प्रजारक्षाविमुखनृपति-पुरोहित-शान्तिरहितवैश्य-मरणाशौचाक्रान्ताभिशप्त-पाषण्डि-शूद्र-तक्ष-विट-नर्तक-कर्षि गण-गणिका-शस्त्रोपजीवि-ध्वजि-रजक-गान्धर्वायस्कार-सूतकि-याज्येतर-याजक-रक्षाविहीनबाल-तैलकार-चित्रकार-चिकित्सक-पौनर्भव--मूढ-वार्धुषिक-स्वर्णकार-किरात-दूतिक-देवतानिन्दकानामन्नं नोपादेयम्। भीतरुदित-क्षुत्पीडित-श्राद्ध-सूतिक-बन्ध्या-वृथापाक-शस्त्रास्त्रकार-पारशव-कारुक-पुनर्भू-लोभि-विधवा पिशुनानामन्नभक्षणे वत्सरान्ते पतितो भवति। सोमसुरामांसविक्रयिणां शिवद्रोहि-यतिनिन्दक-विज्ञानदूषकदेवभस्मत्रिपुण्ड्रभ्रातृदूषकाणां दिव्यायुधदधानानाश्चान्नभक्षणे सद्यः पतितो भवति। आपत्तावपि द्विजैर्दासकुलमित्रगोपालानां कुधनिनः कुम्भकारस्य कर्षकस्य अन्येषाञ्चान्नं न भोक्तव्यम्। सति भक्षणे प्रायश्चित्तं कर्तव्यम्। पिण्याक—(तिलखलि) सक्तु-तैल-गव्य-तक्रादीनि वस्तूनि शूद्रादेव संग्राह्याणि न द्विजेभ्यः। वृन्ताक-गृञ्जन-लशुन-ग्रामकुकुटानां भक्षणं ब्राह्मणैर्न कर्तव्यम्। व्रतिभिश्च औदुम्बरालाबुगुम्फलकिंशुकादीनि न भक्ष्याणि। केशकीटादिदुष्टं श्वकाकादिदूषितं भस्मसंस्कृतञ्च न भक्षणीयम्। रजस्वलाचाण्डालप्रमुखैरपविव्रैर्जनैर्दृष्टमन्नं पर्युषितं वत्सहीनाया गोःक्षीरं सन्धिनीक्षीरमौष्ट्रमाविकं क्षीरञ्च ब्राह्मणैर्न भोक्तव्यम्। रोगिणां कृते त्वभक्ष्यमपि भक्ष्यं भवति सुरां वर्जयित्वा।

भक्ष्यस्य भक्षणेन चित्तशुद्धिर्जायते। तस्मात् पारमेश्वरं ज्ञानं प्रमाज्ञानं भवति। एवं वेदवाक्यात् पारमेश्वरविज्ञाने जाते हृदयग्रन्थिर्भिद्यते।

त्रयोदशोऽध्यायः (प्रायश्चित्तनिरूपणम्)

ब्रह्महत्याप्रायश्चित्तम्—

ब्रह्महत्याकारी पुरुषः तज्जन्यपापविनाशाय निर्जने शुद्धे नदीतीरे वसेद् वा शुष्कतृणकाष्ठैः कुटीं निर्माय निवसेत्, शवशिरोध्वजं कृत्वा विप्रेभ्यो भिक्षामादाय अतितापवान् सन् अपराह्णे मौनी भूत्वा सकृदेव भुञ्जीत। प्रत्यहं त्रिवारं स्नानं सर्वदा विप्रार्चनं गोसेवां पिप्पलसंरक्षणं मानवदोषप्रशंसां फलमूलाशनं च लज्जाविहीनो जितेन्द्रियः सन् कुर्यात्। एवं क्रियमाणे सति द्वादशवर्षैः ब्रह्महत्याजन्यपापं विनश्यति। प्रायश्चित्तमिदमबुद्धिपूर्वकस्यास्ति। रहस्यमयपातकस्य प्रायश्चित्तन्तु एकमासपर्यन्तं प्रत्यहमालस्यवर्जितः सन् त्रिपुण्ड्रं विधाय भस्मलिप्तो भस्मशायी

भूत्वा सर्वदा 'नमः शिवाय' इति मन्त्रमोङ्कारं वा जपेत्। अन्येषां रहस्यमयपातकानामपि पूर्वोक्तप्रकारेण प्रायश्चित्तम्। एवं प्रायश्चित्तम् कुर्वतां पातकिनां मरणादेव शुद्धिर्न मार्गान्तरेण।

सुरापानप्रायश्चित्तम्—

सुरापी अग्निवर्णां सुरां तादृशं कृतं गोमूत्रं वा पीत्वा सुरापानदोषाद् मुच्यते। वैदिकविप्रः स्वेच्छया सुरां पीत्वा सद्यः स्वयं पतति स्ववंशं च पातयति। सुरापानजन्यपापस्य षोडशीं कलामपि ब्रह्महत्यादिपातकं न भजते, तस्माद् द्विजैः सर्वदा सुरापानं त्याज्यमेव।

स्तेयप्रायश्चित्तम्—

स्तेयी (चौरः) खलु विप्रकीर्णकेशी मुसलमादाय राजानं गत्वा तत्र स्वकर्म कथयित्वा राज्ञा हतः सन् स्तेयदोषाद् विमुच्येत।

गुरुदाराभिगमनप्रायश्चित्तम्—

गुरुदाराभिगामी तत्पापविनिवृत्त्यर्थं स्वयं स्वस्य सवृषणशेफमुत्पाट्याञ्जलौ निधाय अनशनः सन् वाग्यतो दक्षिणां दिशं गत्वा एकवर्षपर्यन्तं जितेन्द्रियः तप्तकृच्छ्रं व्रतं चरेत्।

दुहितृ-स्वसृ-स्नुषाऽभिगमने तप्तकृच्छ्रम् कर्तव्यम्। मातृस्वसृमातुलानी-पितृस्वसृ-भागिनेयीनामभिगमने कृच्छ्रातिकृच्छ्रव्रते चान्द्रायणं तीर्थस्नानं वा कर्तव्यम्। भ्रातृभार्याभिगमने चान्द्रायणचतुष्टयं, मातुलसुताभिगमने चान्द्रायणं, मित्रभार्याभिगमने तप्तकृच्छ्रं, चाण्डालीगमने तप्तकृच्छ्रत्रयं कृच्छ्रं सान्तपनं वा, कुयोनिषु रेतःस्रावे कृच्छ्रसान्तपनम्, आस्यमैथुने चान्द्रायणद्वयं, गोमैथुने चान्द्रायणद्वयं, क्षत्रियभार्याभिगमने प्राजापत्यद्वयं कृत्वा ब्राह्मणः शुद्धिमवाप्नुयात् ततः स्ववृत्तिं च कर्तुं प्रभवेत्। ब्रह्मचारी अवकीर्णश्च नैरृतपशुमालभेत्। भिक्षुर्द्विजस्त्रीगमने अवकीर्णिव्रतं चरेत्। द्विजो वैश्याभिगमने प्राजापत्यव्रतं पौनःपुन्येन पतितागमनेऽपि प्राजापत्यं विप्रकन्याभिगमने चान्द्रायणं चरेत्। उदक्यागमने त्रिरात्रेण विशुद्धिः। बारम्बारं रजस्वलाभिगमने कृच्छ्रचान्द्रायणं नटशैलूषभार्याभिगमने चान्द्रायणत्रयं कुर्यात्। सर्वपापनोदनाय साम्बं शिवं हृदि यामार्धं मुहूर्तं वा ध्यायेत् सप्रणवं पञ्चाक्षरमन्त्रं (नमः शिवाय) च जपेत्। तद्ध्यानेनैव पापकाननं दह्यते। रुद्रस्य ध्यानेन बहवः संसाराद् विमुक्ता अभवन्, किं पुनः पापात्। यद्यपि विष्ण्वादिदेवताध्यानमपि पापविनाशकं किन्तु शिवध्यानसमतां लब्धुं न शक्तम्। अतो विहाय सर्वान् सर्वादिभूतस्य शङ्करस्य ध्यानं कर्त्तव्यम्, यतो हि तेन, विना यत्नमेव पापनिवृत्तिः सिध्यति।

चतुर्दशोऽध्यायः (प्रायश्चित्तनिरूपणम्)

पापकाननं दग्धुं ज्ञानदावानलः सर्वयत्नैः सम्पाद्यः। जाते हि ज्ञाने क्षणादेव सर्वं कालुष्यं नश्यति, यदि कश्चन प्रतिबन्धको न स्यात्। यथा सुदीप्तोऽप्यग्निः-सत्सु चन्द्रकान्तमणिमन्त्रौषधिषु प्रतिबन्धकेषु काष्ठानि दग्धुं न समर्थः। तत्र ज्ञानस्य प्रतिबन्धकारणे द्वे-असंभावना विपरीतभावना च। ते च द्वे श्रवणमननिदिध्यासनैर्निवर्तेते। यथा प्रतिबन्धरहितोऽग्निर्दहति तथैव निवृत्तप्रतिबन्धो ज्ञानाग्निः सकारणं पापं दहति। उपक्रमोपसंहाराभ्यासापूर्वफलार्थवादोपपत्तिभिः षड्भिर्लिङ्गैर्वेदान्तवाक्यस्य तात्पर्यनिर्णयादधिकारिणः सर्वसाधनसंपन्नस्य मुमुक्षोः वेदान्तवाक्यैः संसाररोगमहौषधं प्रत्यग्ब्रह्मैक्यविज्ञानं जायते। तत्र मनननिदिध्यासनापेक्षया विज्ञानकारणस्य श्रवणस्य प्राधान्यमस्ति, ज्ञानोत्पत्तौ श्रवणस्यान्तरङ्गत्वादन्ययोश्च ताटस्थ्यात्। शान्तिदान्तितितिक्षोपरत्यादयः इतिकर्तव्यताकोटयोऽपि तटस्थ एव। भगवतो रुद्रस्य प्रसादस्तु तत्रात्यन्तान्तरङ्गोऽपराणि सर्वाणि तदर्थान्येव। तत्र साम्बस्य शिवस्य प्रसादो नाम वाक्यलक्षणसामग्रीप्रवृत्तिजन्यस्य वृत्तिज्ञानस्य चिदभिव्यक्तियोग्यता, सा च योग्यता देहिनां तीव्रे तीव्रतरे मन्दे शाम्भवे प्रसादे सति वृत्तिसाक्षितयाऽभिजायते। स च चिदात्मा वृत्तेः साक्षिरूपः वृत्तिप्रागभावस्थितिरूपः बुभुत्सायां सत्यां तथाऽज्ञोऽस्मीत्याभासाज्ञातवस्तुनोऽसत्यालम्बनत्वेन सर्वजडस्य चापि तथात्वेन स सत्यः, सर्वदा प्रेमास्पदत्वतः आनन्दस्वरूपः, सर्वार्थसाधकत्वात् सर्वसंबन्धवत्वाच्च शिवसंज्ञः जीवेश्वरत्वादिविरहितः केवलः स्वप्रकाशः शिवः वृत्तौ सत्यामात्मानं बुभुत्सोः प्राणिनः स्वयं साक्षाद् अभिव्यक्तो भवति।

शिवादिनामहीनस्य शिवध्यानशिवभक्तिविहीनस्य त्रिपुण्ड्रादिषु श्रद्धाहीनस्य च पुरुषस्य शुद्धज्ञानं मुक्तिश्च न सिध्यति। शान्तिदान्त्यादिसत्त्वेऽपि त्रिपुण्ड्रधारणादीनि विना रुद्रप्रसादं न भविष्यन्ति। यथा विशिष्टव्यक्तिषु यज्ञदानाद्यनुष्ठानं दुर्लभं तथैव श्रौतधर्मेषु त्रिपुण्ड्रभस्मावगुण्ठनरुद्रलिङ्गार्चनान्यपि दुर्लभान्येव। त्रिपुण्ड्रधारणभस्मावगुण्ठनयोर्दुर्लभत्वादेव नित्यानन्दनिरञ्जनतः शिवस्तत्सर्वं साधकार्थमकरोत् अतोऽनिष्पन्नेन स्वलाभाय यत्नतो धार्यमिदम्। सर्वाङ्गनिष्ठस्य पुरुषस्य वेदवाक्यात् प्रत्यग्ब्रह्मैकगोचरा या शुद्धा मानसी वृत्तिरुदेति तस्यां च स्वयंसिद्धा शाङ्करी चिद् अभिव्यक्ता भवति, तदेवाज्ञाननाशकं ब्रह्मविज्ञानमस्ति, जाते च तस्मिन् सर्वं मिथ्याज्ञानं निवर्तते। यथा घटज्ञाने जाते घटाज्ञानं निवर्त्तते तथैव ज्ञाने जाते अज्ञाने नाशे सति सर्वाणि अज्ञानकार्याणि नश्यन्ति। कर्त्रादिकारकसमूहोत्पत्तिस्तु कर्मतो भवति, कर्माभावे कुतः कर्त्रादिकारकोत्पत्तिः। देहेन्द्रियादिसङ्घाताभिमानस्था एव कर्तृता भवति। वस्तुतो ब्रह्मभूतस्य

निष्क्रियस्य जीवस्य कर्तृत्वं भोक्तृत्वं च कथं स्यात्। यदि कर्तृत्वं कृत्यं चात्मनो वास्तवं भवेत् तर्हि केनोपायेन न निवर्तेत। शरीराद्यभिमानेन अहमिति, कृशोऽहं, ब्राह्मणोऽहं, गृही, ब्रह्मचारी, भिक्षुकोऽहम्, कृष्णोऽहमित्यादिप्रतीतिभ्रान्त्या निर्विशेषः सन्नपि मन्यते। स चैकोऽप्यात्मा नभसो घटाकाशमठाकाशादिभेदवत् सर्वेषु देहेषु भ्रमाद् भिन्न एव भासते, अक्रियोऽपि जलचलनाद् भास्करचलनवद् भ्रान्त्या सर्वविकारवान् प्रतीयते। यथा अतीवधवलः स्फटिको जपाकुसुमलौहित्यसंक्रान्तत्वात् रक्तो भाति तथैव आत्मापि उपाधिवशात् संसारी भवति। यस्य पुरुषस्यात्मानात्मविवेकप्रकाशो वर्तते तस्य सविधे वर्णाभिमानाख्यं तमः कथं तिष्ठति ? यस्य वर्णाश्रमवयोऽवस्थाविशेषप्रतीतिरस्ति तस्य विधयो निषेधाश्च वर्तन्ते, सर्वोपाधिविनिर्मुक्तं सर्वसाक्षिणं चैतन्यं पश्यतः पुरुषस्य कथं शुभाशुभं कर्म तिष्ठति। एवं सर्वबन्धरहितमात्मानं ब्रह्मतया साक्षात्पश्यन् पुरुषं कथञ्च कर्मणा बध्यते ? अतो ब्रह्मात्मविज्ञानं सर्वमज्ञानं तज्जनितं निखिलं कर्म तत्फलं च ग्रसति। यज्ज्ञानं समूलं कर्म विनाशयति तदेव सर्वपापानामुत्तमं प्रायश्चित्तम्। एवमात्मज्ञानेन दग्धं सकलं कर्म प्रारब्धकर्मणो भोगं यावदाभासरूपेण भाति। यदा ज्ञानेन दग्धं जगदाभासतया विभाति तदा विद्वान् जीवन्मुक्तो भवति न स भूयो जगति जायते। जीवन्मुक्तिदशायां जीवन्मुक्तो भातमभातमखिलं जगत् पृथक् पश्यन्नपि स्वात्मनैव स्वात्मानं पश्यति। भातं भाति यथा तथाऽभातमपि भाति इति सर्वत्र भानान्वयात् तद् ब्रह्मण एव भानमिति प्रकाशस्याव्यभिचारित्वात्। प्रकाशस्याव्यभिचारेण निखिलं प्रकाशं पश्यतः पुरुषस्य किमपि प्रकाशातिरिक्तं विभाति न वा ? तस्मात् सम्पूर्णविज्ञानं सम्पूर्णकर्मनिवर्त्तकं भवति, कारणस्य अज्ञानस्य निवर्तकत्वात्, अज्ञाननाशेन प्रतिकूलतः कर्म न संभवति। सति अज्ञाने कर्तृत्वं प्रवर्तते, कर्तुरेव च शुभाशुभं कर्म प्रवर्तते। अज्ञाननाशे सति तु कथमज्ञानं तज्जन्यं कर्म च बाधते ? मूलभूते ज्ञाने स्थिते सति द्वैतं विजायते, पुंसः शोभनाशोभनाध्यासश्च प्रजायते। ततो रागद्वेषौ जायेते, ततश्च देही प्रवर्त्तते। ततो धर्माधर्मौ प्रवर्तेते। धर्माधर्मोपभोगाय शरीरं जायते, एवं नरः चक्रवत् भ्राम्यति। सम्यग् ज्ञाने जायमाने सति अज्ञानं निवर्तते, तन्निवृत्तौ च तन्मूलं समस्तजगन्निवर्तते। अतः संसारनाशाय ज्ञानमेकं समाश्रयणीयम्, अज्ञानानुकूलञ्च सर्वं कर्म हातव्यम्।

ये जनाः सम्पूर्णज्ञानं लब्धुं यतमानास्तिष्ठन्ति, तेषां बहूनि महान्ति पापानि नश्यन्ति, ज्ञानादूर्ध्वं किमपि शुभमशुभं वा कर्म नास्ति। स्वस्वरूपातिरेकेण यद्यस्ति स पशुरेव। वस्तुतो योगिनां कृते आत्मनोऽतिरिक्तं किमपि नास्ति, तदानीमात्मनो भिन्नतया किमपि क्षुब्धं न भाति। यदा च फलदानाय कर्म क्षुब्धं नास्ति तदा आत्मनोऽतिरिक्तं किञ्चिदपि न भासते। परात्मवेत्ता जनः स्वात्मनो

भिन्नतया सर्वं पश्यन्नपि निर्भयः स्वानुभूतितः सर्वं स्वात्मना पश्यति । स्वानुभूतितः स्वात्मनः परमव्याप्तिं पश्यतः शिवो यथा भातेन रूपेण भाति, अखिलं च भासयति तथा तेन रूपेण स्वयमपि तिष्ठति। शिवरूपेण स्वानुभवेन यदा स्वयं केवलं तिष्ठति, तदा तस्य महात्मनो निर्वाणं सन्तिष्ठते । महाव्यापकनिर्वाणस्वरूपे स्वात्मवस्तुनि स्वानुभूत्यैव विश्रान्तो भवति जनः, तदा स स्वयं परदेवताऽस्ति । विश्रान्तिश्च महाक्षोभः प्रकाशाव्यभिचारतो वर्तते, तदा तत्त्ववित्प्रकाशरूपमेव पश्यति । सर्वं जगन्मायामयम्, आत्मा तु साक्षात् सर्वस्यावभासकोऽस्ति । एवं प्रकारेण य आत्मानं विजानाति स ब्रह्मविद् भवति । दृश्यरूपं जगदिदं दृश्यरूपं दृङ्मयं यः पश्यति तथा दर्शनादर्शने हित्वा यः स्वरूपेण तिष्ठति स ब्रह्मविद् भवति । इत्थं ज्ञानं यस्य नरस्य वर्तते तस्य पुण्यपापाभ्यां लेपो न विद्यते । एकैकस्य पापस्य यत्प्रायश्चित्तं प्रकीर्तितं तन्महतामपि कर्तुं दुष्करम्, अत इदमद्वैतविज्ञानमेकं सर्वेषां पापानां परोक्षापरोक्षरूपेण साक्षादुन्मूलनक्षमं वर्तते, नैतादृशं किञ्चिदपि श्रुतिस्मृत्युक्तं प्रायश्चित्तं सन्तिष्ठते, नापि ततोऽधिकं वा । तस्माच्छ्रद्धया तत्समाश्रयणीयम् । संक्षेपेण ज्ञातव्यमिदं यज्ज्ञानमेकमेव सहेतुकस्य सर्वस्य पापस्य निवर्तकं सर्वथा उपादेयञ्च । ज्ञानमाश्रितः पुरुषः श्रुतिगुरुपुण्य-शिवप्रसादेन समागतं दुःखं तरति । विमलमात्मज्ञानं विना मनुजः शोकमोहसुख-दुःखसागरं जन्म कथं तितीर्षति । सर्वमेतज्जगदखिलेश्वरः शिवः केशवादयो देवाः त्वमहं सर्वं परब्रह्मेतिविषया मतिः परा ज्ञेया । सा मतिरेव कर्मवृन्दवाड-वाग्निरत एव नरा वेदचक्षुषो भवितुमर्हन्ति । सा च परविद्या शिवपादस्मरणेन भविष्यति ।

पञ्चदशोऽध्यायः (वाराणसीमाहात्म्यम्)

अविमुक्तनामकं वाराणसीक्षेत्रं संसारविषदष्टानां गतिविहीनानां जीवानां महौषधं, संसारविषवृक्षस्य कुठारः, सर्वपापविनिवर्तकमाधिभौतिकमाध्यात्मिक-माधिदैविकं वर्तते। अधिभूतस्थितस्य मायिनो ब्रह्माण्डस्वरूपस्य विराडात्मनो भ्रुवोर्मध्ये स्थितमिदं वाराणसीक्षेत्रम् ।

वाराणसीसेवनेन सर्वपापविनिर्मुक्तः सन् प्राणी शिवं प्राप्नोति कुरुक्षेत्रवास-फलं च लभते । इदं क्षेत्रं देवयजनं, ब्रह्मसदनं, सर्वपापहरं, सर्वलोकप्रसिद्धं, सर्वतीर्थ-श्रेष्ठम्, अव्ययमस्ति । अस्य सेवया सर्वाणि पापनिवर्तकानि तीर्थस्थानानि सेवि-तानि भवन्ति । संसारनाशनमिदं त्यक्त्वा नरो नान्यत्र निवसेत् क्षणमात्रमपि । अत्र मासपर्यन्तं भागीरथीस्नानेन बुद्धिपूर्वकृतपातकान्मुक्तिः एकवारमेवात्र भागीरथीस्नानं कृत्वा विश्वेश्वरलिङ्गदर्शनेन दिनमात्रोपवासेन श्रद्धया चाल्पदानेन

ब्रह्महत्यादिसकलपातकान्मुक्तिर्भवति। अत्र जपहवनदानकर्मणामनन्तफलं भवति। वाराणस्यां म्रियमाणस्य मोक्षार्थं सकलवेदवेदान्तसाररूपप्रणवात्मब्रह्मणोऽर्थभूतो भगवान् शङ्करः संसारद्रावकः कृपया स्वकीयं परामृतं सच्चिदानन्दस्वरूपं तारकं ददाति, येन त्वरया स प्राणी महाकष्टकरं संसारं परित्यज्य परानन्दो भवति। नहि शिवं विनाऽन्यः कश्चन संसारमोचकोऽस्ति। एवं भूतस्य भगवतः शङ्करस्य क्षेत्रत्वात् विज्ञानोत्पत्तेः कारणत्वात् पापानां नाशकत्वाच्चेदमविमुक्तं मुमुक्षुभिः सदा सेव्यम्, न कदापि हेयम्। पुरा किल बृहस्पतिर्याज्ञवल्क्यादस्य सर्वं वैभवमाकर्ण्य शिवं विज्ञातवान्। बहवो वैदिका विद्वांसः श्रद्धया आचार्येभ्योऽस्य माहात्म्यं श्रुत्वा विमुक्ता अभवन्। अस्य क्षेत्रस्य माहात्म्यं शिवेनापि वक्तुं न शक्यम्। जाबालोपनिषदपि जानाति वैभवमस्य क्षेत्रस्य इत्यत्र सन्देह एव। पुराणान्यपि लोकरक्षार्थं सर्वदाऽस्य माहात्म्यं वदन्ति। अविमुक्तेऽस्मिन् सेवाहीनोऽपि जनः संसारान्मुक्तो भवति। धीमद्भिरिह जन्मनि जन्मान्तरे वा विज्ञानायेदं क्षेत्रमवश्यमुपास्यम्। वाराणसीसेवनं विना वेदजन्यं विज्ञानं नोत्पद्येत। सहस्रजन्मार्जितपुण्यबलादेव ब्रह्मविज्ञानं जायते। एकैकस्मिन् जन्मनि कृतं सर्वं पुण्यमात्मनि तिष्ठति। एवं क्रमेण अनेककोटिजन्मार्जितपुण्यपरिपाकवशात् सम्यग् ज्ञानं जायते। ये खलु वाराणस्यां तनुं तत्यजुस्तेऽवश्यमेव पूर्वं विज्ञानसाधनं भूरि पुण्यमनुष्ठितवन्त इति विज्ञेयम्। अस्य सेवया निखिलानि पापानि नश्यन्ति। तस्मात् वाराणसीसेवनसदृशं प्रायश्चित्तं न किमपि वर्तते।

वाराणसीमाहात्म्यं वदता भगवता शिवेन पार्वतीं प्रत्यवादि यद् देवि! त्वया मया सेवितमिदं क्षेत्रं समाश्रयणीयमेव जनैः सर्वं परित्यज्य। वरणानासि नामकं क्षेत्रं वेदान्तैः मदीयमपि मुक्तिदं किमुतान्येषाम्। अविमुक्तस्थं विश्वेश्वरं ध्यायिनां वशे निवृत्तविषया अपि पुरुषा आयान्ति तथा तेषां सकलानि च पापानि नश्यन्ति। तस्मादवयवार्थानुकूलेन वरणानासि नामकमिदं वर्तते। अस्यायं भावः निवृत्तपुरुषाणां वरणात् वरणा, पापानां नाशकत्वात् नासि इति।

वरणानासि इति स्थानं देहिनां भ्रुवोर्घ्राणस्य च सन्धौ संस्थितम्। तस्मिन् वरणानासि संज्ञके क्षेत्रे मुमुक्षुभिर्मदीयं प्रतिष्ठितमविमुक्तं चिन्तनीयम्।

केवलेनैतत्क्षेत्रचिन्तनेन सर्वपापानि विलयं यान्ति। एतच्च क्षेत्रं भगवतः शिवस्यास्ति, अत्राम्बया सह शिवः सदा संनिहितोऽस्ति। अतः पापापनोदनाय ज्ञानस्य च सिद्धये तत्र भगवन्तमालस्यरहितः सन् ध्यायेत्। यामार्धं मुहूर्तं वाऽत्र चिन्तनं सर्वपापानां प्रायश्चित्तमस्ति। सर्वेषु प्रायश्चित्तेषु ध्यानं श्रेष्ठम्। तस्मात्सर्वं परित्यज्य तदाचरणीयम्।

पूर्वकाले मुनिरत्रिः याज्ञवल्क्यं प्रति विज्ञानस्य साधनमपृच्छत्तत्र योगीश्वरो याज्ञवल्क्योऽविमुक्ते शिवध्यानमेव विज्ञानसाधनमब्रवीत् । अन्ये च योगिनो ध्यानेन भ्रूमध्ये वरणानासि संज्ञके शुद्धं प्रकाशमण्डलं केवलं भावनागम्यमेवोपदिश्य तदग्रेऽविमुक्तनामकं शिवक्षेत्रमोङ्कारहृदयं सूक्ष्ममभिधाय ततः परं सर्वातीतं चैतन्यं सुखस्वरूपं सकलोत्पत्तिस्थितिसंहारकारकं साम्बं वेदवाचोऽविषयं स्फटिकसमं सोमार्धकृतशेखरं त्रिनेत्रं सस्मितं मुकुटकालदण्डव्याघ्रचर्मोपवीताभरणाभयमुद्रा-समन्वितं विष्ण्वादिनोपास्यमानं परमानन्दं प्रकाशमयं मोक्षैकसाधनं प्राहुः । अन्ये ऐश्वर्याभिलाषिणः ऐश्वर्यसाधनं मामाहुः । केचन मुनिश्रेष्ठाः क्रममुक्तेः साधन-ञ्चाहुः । आचार्योपदेशेन ये जना मामुपासते तेषां सर्वं किल्विषं नाशयामि । भ्रुवो-र्घ्राणस्य यः सन्धिः स द्युलोकस्यापि सन्धिर्विज्ञेयः । तत्र सन्धिसंज्ञे स्थाने सन्धिभूतं मां पूर्वे वैदिकब्राह्मणाः सदा सादरमचिन्तयन् । प्रत्यहं वाराणस्यां मुमुक्षुभिः मोक्षार्थमविमुक्ते साम्बोऽहं सदोपास्यः । हे पार्वति ! अत्र अविमुक्ते सदाहं सन्निहितोऽतोऽस्य अविमुक्तसंज्ञा । प्रसन्नोऽहमुपासकेभ्योऽविमुक्तनामकं स्वात्मविषयं ज्ञानं ददामि । एकवारमपि येऽत्र यजन्ते, तेषां करगता मुक्तिः ।

जाबालशाखिनः सदैवमामनन्ति, जाबालोपनिषच्च प्रधानसाधनमेव ज्ञान-स्याविमुक्तमित्याह । अतः सर्वैर्यत्नैः सर्वपापविनिवृत्तये सर्वधर्ममध्ये केवलमालस्यर-हितेनेदमेव साध्यम् । अथवा [१]पुण्डरीकपुरमेवाश्रयणीयम्, यद्दर्शनमेव मुक्तिकारणं, पुरा तत्रैव मे नर्त्तनं जातम् । अथवा पवित्रे सुवर्णमुखरीतोये कालहस्तिसंज्ञे पर्वते मम दर्शनं कृत्वा सुवर्णमन्यद् वा ब्राह्मणाय दद्यात् । अथवा सेतुबन्धे गन्धमादन-पर्वते, यत्र रामेण स्थापितं मम लिङ्गं वर्तते, तत्र पर्वणि स्नात्वा यथाशक्ति धनं दत्त्वा मम लिङ्गस्य दर्शनं प्रदक्षिणां नमस्कारं च कुर्यात् । अथवा ज्ञानिनं भक्त्या धनेनात्मना च पूजयेत् । यत्र ज्ञानी साक्षात् प्रसन्नो भवति तत्राऽहमपि प्रसन्नः सन्निहितश्च । यथा ज्ञानी सर्वं त्यक्त्वा माम् लब्धवान् तथैवाहमपि तं लब्धवान् । यत्र ज्ञानी तिष्ठति तत्र सर्वाणि तीर्थानि वसन्ति । यो ज्ञानिने कौपीनादिकं ददाति तस्य च शुश्रूषुरस्ति स मेऽत्यन्तं प्रियः ।

पराशर उवाच—

एवमुक्त्वा महादेवो महेश्वरीमालिलिङ्ग, महादेवी च महेश्वरमालिलिङ्ग परमया मुदा । प्रायश्चित्तविहीनानां पापिनां फलभोगाय शिवो नरकानसृजत् । दुरात्मनां शिवे श्रद्धा न प्रवर्तते । पापिनो दुःखभोगार्थं श्वशूकरादियोनिषु उत्पद्यन्ते महादुःखञ्च प्राप्नुवन्ति । अतः पापनिवृत्तये प्रायश्चित्तमाचरणीयम् ।

---

१. 'पुण्डरीके जैमिनीशः' (ललितागम–ज्ञानपादे–प्रादुर्भावपटले) ।

षोडशोऽध्यायः (पूजाविधिः)

सर्वकारणस्य त्रिमूर्त्तिश्रेष्ठस्य सच्चिदानन्दस्य रुद्रस्य पूजा केवलं ज्ञानमेव। सा च पूजा रुद्रप्रसादादेव आस्तिकस्य कृते सफला भवति, न तु नास्तिकस्य ज्ञानप्रदाऽस्ति। भगवत्प्रसादलभ्या पापनाशिनी, पवित्रा, परानन्दप्रदा सा पूजा योगिनां सार्वकालिकी भवति। सा चैषा पूजा आवाहनविसर्जनक्रिया-कलापविनिर्मुक्ता आत्मसंवेद्या विश्वविश्रान्तिरूपिणी योगिनामस्ति। प्रमाता, प्रमाणं, प्रमेयं, प्रमिति इत्येतच्चतुष्टयं परं चैतन्यमेवास्ति नान्यत् किञ्चित्, इति ज्ञानमेव परमात्मनः पूजा नान्या। चराचरमेतज्जगत् देवदेवस्य रुद्रस्य शरीरमेव इति ज्ञानमेव शिवस्य महती पूजा। सैव पूजा योगिनां मङ्गलदायिनी वर्तते।

ये खलु योगिनो न सन्ति त एव लिङ्गे शिवार्चनं कुर्युः। एतानि सर्वकर्माणि ज्ञानदायकानि भवन्ति। उत्पन्ने सति च ज्ञाने सर्वाणि कर्माणि स्वयमेव विनश्यन्ति। पूजया मुक्तिः, शुद्धं ज्ञानं, ब्रह्मविष्ण्वादिदेवपदप्राप्तिः, अणिमाद्यष्ट-सिद्धिः, देवत्वं, गन्धर्वादिपदं, सार्वभौमिकता, मनोहरस्त्रीसौख्यकल्याणभवनानि पुरुषार्थचतुष्टयं च सिद्ध्यन्ति।

विष्णुः शिलामयं लिङ्गं समभ्यर्च्य परमं पदं लब्धवान्, लक्ष्मीर्विष्णुवल्लभा अभवत्, जगत्कर्ता ब्रह्मा यस्य लिङ्गार्चनेन भारतीं प्राप्तवान्, शची इन्द्राणी जाता, मरुतः पूर्णां श्रियं लेभिरे स भगवान् शङ्करः सर्वचेतनैः सदा पूज्योऽस्ति।

यस्य देहिनः सर्वेन्द्रियाणि कदाचिदपि पूजार्थे संलग्नानि भवन्ति तस्य जीवनं सफलं वर्तते। एककालं द्विकालं त्रिकालं वा मानवैः प्रत्यहं शिवलिङ्गस्य पूजा श्रद्धया कर्तव्या। आसनावाहनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतभूषणगन्ध-पुष्पधूपदीपान्नमाल्यानुलेपननमस्कारविसर्जनैः क्रमशः शिवलिङ्गार्चना विधेया। एतानि च सर्वाणि प्रणवेन (ओङ्कारेण) सह पञ्चाक्षरेण (ॐनमः शिवाय इति मन्त्रेण), त्र्यम्बकमित्यादिश्रौतमन्त्रेण अपरेण श्रौतमन्त्रेण वा प्रतिदिनं देवलिङ्गे श्रद्धया कार्याणि। पर्वतवननदीतीरेषु अन्यत्र वा मनुष्यमुनिदेवयक्षराक्षसगन्धर्वसिद्ध-विद्याधरादितिर्यग्जातिभिरन्यैश्च प्रतिष्ठितं शिवलिङ्गं ब्राह्मणोऽन्यो वा प्रदक्षिण-त्रयपूर्वकनमस्कारद्वारा पूजयेत्। अग्निहोत्रादिमध्ये सूर्यसोममण्डले हृदये ब्रह्मरन्ध्रे वा शिवं पूजयेत्। ये मानवाः सदा मनीषया वन्द्यं रुद्रमभ्यन्तरे ध्यायन्ति ते जिह्वया सोमं लिहन्ति। ये त्वेवं न कुर्वन्ति, ते पुरीषं जिह्वया गृह्णन्ति।

---

१. 'कूर्मेशो गन्धमादने' (ललितागम–ज्ञानपादे–प्रादुर्भावपटले)

२. 'सेतौ रामेश्वराभिधः' ,, ,,

भवानीसहितरुद्रस्य ध्यानं पूजनं वाराणसी–व्याघ्रपुर-कालहस्तिगिरिषु वासः शिवशङ्कररुद्रादिनाम्नामुच्चारणं नारायणादिनामानि साक्षात्परमात्मनो नामानि न, इति ज्ञानम्, एकस्य देवदेवस्य ब्रह्मविष्णुमहेश्वरा अंशाः सन्ति इति ज्ञानम्, अमी जीवास्तस्यैवांशभूता उपास्याश्चेति ज्ञानं च महतस्तपसः फलानि सन्ति । अतो यथाधिकारं विप्रादिभिर्ज्ञानक्रियाभ्यां भगवान् शङ्करः पूज्यः ।

सप्तदशोऽध्यायः (परमतत्त्वविवेचनम्)

इदं सर्वं पुरोदृश्यमानं जगत् कस्मिंश्चिदधिष्ठाने अज्ञानेन शुक्तिकायां रजतवत् कल्पितमेव न तु वास्तवम् । कल्पितस्यास्य सकलस्य जगतो यदधिष्ठानं वर्तते तत्तु कल्पितपदार्थातिरिक्तं तद्भिन्नलक्षणञ्चास्ति । अर्थात् असत्यस्य जगतोऽस्य अधिष्ठानं सत्यमेव, यथा असत्यस्य शुक्तिरजतस्याधिष्ठानं शुक्तिका सत्या (व्यावहारिकी) एव, न शुक्तिरजतसदृशी असत्या । अत्र दृष्टान्तरूपायां शुक्तिकायां सत्यत्वं यद्गृह्यते तत् सत्यत्वं व्यावहारिकमेव न तु पारमार्थिकं किन्तु जगदधिष्ठाने तस्मिन् न व्यावहारिकं सत्यत्वं नापि हेतुजं किन्तु पारमार्थिकं सत्यत्वं विद्यते, तस्य सर्वसाक्षिस्वरूपस्य प्रागभावाद्यसंभवेन जन्मनाशाद्यभावात् । सर्वस्य च दृश्यस्य भासकत्वात् तद् अधिष्ठानभूतं चैतन्यं सर्वावभासकं स्वयंप्रभं स्वप्रकाशकमस्ति । यस्य चैतन्यस्य शेषतया सर्वमिदं दृश्यं प्रमास्पदं तत् शेषि साक्षात् सुखमेव । इदं सर्वं जडाजडात्मकं जगत् ब्रह्मणः शेषभूतं यस्मात् प्रियं तस्मात् शेषि तत्त्वं परानन्दः स्वलक्षणं च । तदेव चैतन्यं स्वसत्ता-प्रकाश-प्रियांशैर्जगद् व्याप्य संतिष्ठते । वस्तुतस्तच्चैतन्यं विना जगत्प्रतीतिरेव नास्ति, अपि तु तस्मादेव जगतः सत्ता । तत्तु सत्य-ज्ञान-सुखस्वरूपमनन्तं परं पदं वर्तते । सजातीयविजातीयस्वगतभेदशून्यत्वात्तस्य कश्चन धर्मो न भवति । भवति हि लोके धर्मो धर्मिणो वस्तुन एव न तु धर्मधर्मिणो वस्तुनः । धर्मधर्मिणि वस्तुनि धर्मधर्मिणोर्भेदो नास्ति, तत्र भेदस्यानिरूपणात् । ययोर्भेदोऽस्ति स भेदः प्रकाशात् पूर्वमेव वर्तते, सति भेदे प्रकाश एव नोत्पद्येत । भासिते भेदे सत्येव तयोर्भेदो भवति । यदि द्वयोर्भेदो न स्यात्तर्हि एकस्यैव वस्तुनो भेदस्तु चन्द्रभेदवन्मिथ्यैव । तस्मात् सच्चिदानन्दस्य वस्तुनः स्वरूपमेव । भेदस्तु छायानिर्मितोऽस्ति । इदं द्वैतं दृश्यं मायामात्रमेव वर्तते, वस्तुतस्तु अद्वैतमेवेति निगदति सत्यार्थवादिनी श्रुतिः । स्वतः प्रमाणात्मा वेदो यत् प्रकाशयति तदेव सत्यं वस्तु नापरं किञ्चित् । अतीन्द्रिये धर्मे अधर्मे आत्मनि च वेद एवैकः प्रमाणं नान्यत् परम् । उक्तलक्षणस्य तस्य तत्त्वस्य विशेषनामानि एतानि, अतस्तस्यान्यैः सह संगतिर्नास्ति । शिवशम्भुपरब्रह्मसत्येशानेश्वरादीनि नामानि परमात्मनो रूढ्या भवन्ति । केचन योगरूढ्या वाञ्छन्ति, केचिद्

रूढ्यैव न तु योगेन वदन्ति, यतोहि निर्विशेष-निरालम्ब-निर्मलाद्वैतस्य स्वानुभूत्येकसिद्धस्य तस्य शब्दगोचराभावात्। नारायणहरिविष्णुमुकुन्दादीनि नामानि तत्त्वपरकाणि न सन्ति, यदि सन्ति, तर्हि परतत्वोपदेशसन्निधिपठितत्वे सति कथञ्चित् योगबलात् न तु मुख्यतः। वस्तुतः सर्वसाक्षिणः परतरस्य मूर्तिः शुद्धा पापनाशिनी स्वतन्त्राऽस्ति, सा च साम्बचन्द्रशेखरस्यैव, सैव सदा ब्रह्मादिभिर्ध्येया। सा मूर्तिर्जगतः सृष्टौ स्थितौ चाम्बया सह वर्तते. संहारे केवला भवति। तामेव मूर्त्ति ब्रह्मादयो देवा ध्यायन्ति। विग्रहसम्प्रदान-युगपत्कर्मसान्निध्यादीनि पञ्च देवादीनां विद्यन्ते परमात्मनस्तदंशभूतानां ब्रह्मविष्णुमहेशानाञ्च प्रीतिः फलप्रदत्वं च वर्तते। परतत्त्वरूपशिवस्य सकलं स्वभाव एव।

साक्षात् शिवतत्त्वं स्वभावादेव निर्मलं जन्मादिरहितं पूर्णमद्वैतं स्वतन्त्रं प्रकृतितज्जन्यकार्यातीतं लक्ष्यलक्षणहीनं बन्धमोक्षदायकं परशक्तिसमन्वितं पराहन्तानुसन्धानं परमविलासविभूषितं कालकलातीतं कालग्रासवर्जितं सकलाधारमपरिच्छिन्नवैभवं परतत्त्वानुसंधानं विद्यावेद्यं सदोल्लासविलासपरिबृंहितं परमाचार्यानुग्रहेण साम्बशिवप्रसादेन च ज्ञात्वा जनाः संसारबन्धनाद् विमुच्यन्ते। अतः सर्वैः प्राणिभिस्तत्परं पदं विशेषतो विद्यया वेदितव्यं तदस्ति हि परागतिः। मुमुक्षुभिर्मुक्त्यर्थं परतरा सा मूर्तिध्येया, मूर्तिध्यानं विना पराविद्या न जायते। निष्कल-निरालम्ब—निरञ्जनात्मके परे तत्त्वे क्षुद्रजनाः किं कर्तुं शक्नुवन्ति, ततस्तां मूर्त्ति नित्यमाश्रयेत्। येऽज्ञानिनो मानवा ज्ञानावलम्बनभ्रान्त्या मूर्त्युपेक्षां कुर्वन्ति तेषां ज्ञानं न जायते। साधनं विहाय फलावाप्तिर्न भवति, नहि भोजनं विना क्षुन्निवृत्तिर्भविष्यति। तस्माद् आस्तिको ज्ञानोदयपर्यन्तं भक्तिज्ञानजपार्चनादिकं वैदिकं कर्म कुर्यात्।

अष्टादशोऽध्यायः (शास्त्रविमर्शः)

शास्त्रं हि शासनात् शास्त्रं भवति शंसनाद् वा। तत्र शासनं द्विविधं प्रथमं विधिमुखेन, द्वितीयं निषेधमुखेन च। शंसनं तु भूतवस्तुविषयकं भवति न तु क्रियापरम्। विधिनिषेधात्मकस्य शास्त्रस्य शंसनस्य च अज्ञ एवाधिकारी न तु प्राज्ञः, आत्मा, विग्रहो वा चातुर्वर्ण्याश्रमवयोऽवस्थाविशेषालम्बनेन तस्य

प्रसक्तत्वात् । विशेषावलम्बनं शास्त्रं विशेषेसति स्वभावेन प्रवर्तते, तत्र तस्य निवर्तकं नास्ति, किन्तु वर्णाश्रमादिविशेषाध्यासरहितो ब्रह्मवेत्ता शास्त्रं नेक्षते । शास्त्रं केवलं देहावलम्बनेन न प्रवर्तते, देहस्य अत्र विनाशित्वेन फलरूपदेहान्तरे लोकान्तरेऽपि विहितत्वात्, नापि केवलमात्मानमेवावलम्ब्य प्रवर्तते, तत्र शास्त्रस्याकिञ्चित्कर-त्वात् । तस्मात् शास्त्रं भ्रान्तिमति आत्मनि प्रवर्तते । यो हि स्वस्मिन् मोहेन बन्धमोक्षौ संसारविभ्रमात् कल्पयति । तद्धि शास्त्रमापाततो बहुमुखं भाति, किन्तु न्यायत एकमुखं विभाति, न्यायश्च शास्त्रनिर्णायकोऽस्ति तन्न्यायकलापानां स्फुरणं शिवाज्ञया सूत्ररूपेण जातम् । सूत्रस्य तावल्लक्षणम्–असंदिग्ध–सारवद्–विश्वमुखा–स्तोभानवद्यत्वे सति अल्पाक्षरत्वम् । तेषां सूत्राणामर्थं भगवतः शङ्करस्य प्रसादा-न्मुनयो मनुष्याश्च भाष्यरूपेण प्रकटयन्ति । भाष्यलक्षणञ्च सूत्रानुकारिवाक्यैः सूत्रार्थवर्णनपुरस्सरं स्वपदानां वर्णनम् । केचन साम्बरूपरुद्रस्य कृपया भाष्यस्य व्याख्यानं कुर्वन्ति, व्याख्यानञ्च पदच्छेद–पदार्थोक्ति–विग्रह–वाक्ययोजना–क्षेप–समाधानात्मकं भवति । केचिद् वार्तिकरूपेण भाष्यस्य व्याख्यानं विदधति, वार्ति-कञ्च–उक्तानुक्तदुरुक्तचिन्तनरूपम् । अपरे भाष्यं स्वबुद्ध्या संग्रहरूपेण विस्तरतो व्याकुर्वन्ति । अन्ये प्रकरणरूपेण स्फोटयन्ति, प्रकरणञ्च–शास्त्रैकदेशसंबद्धत्वे सति शास्त्रकार्यान्तिरस्थत्वम् । एवं शास्त्रं सूत्रभाष्यादिभिः साक्षाद् वेदसाधनं स्वात्मोपलब्धये गुरोः सकाशात् सर्वदा श्रोतव्यम्, नहि आत्मलाभात्परं किञ्चिद् विद्यते । स आत्मलाभ आत्मनैव भवति । लब्धालब्धलब्धव्यानां लाभः स्वात्मलाभ एव । विद्यालाभस्तु स्वस्वरूपम्, तत्र निरन्तरं यत्न आचरणीयः ।

लब्धस्यात्मनो या लब्धता वर्तते सा अज्ञानवशादेव । आत्मज्ञानादात्मनो लाभः । आत्मलाभस्तु आत्मज्ञानोत्पत्तिरेव । आत्मज्ञाननिमित्तं यत् पुरुषस्य बन्धनं वर्तते तस्य नाशः स्वात्मलाभमात्रतयैव भवति । वस्तुतत्त्वविमर्शे स्वात्मातिरिक्तं किमपि वस्तु नास्ति, यत् तदतिरिक्तं वस्तु प्रतीयते तद् व्यावहारिकदृष्ट्यैव विभाति । आत्मा समस्तं जगत् व्याप्य संतिष्ठते, तस्मात् केवलमात्मैव भावः, नापरः । स्वस्वरूपलाभेन महान् आत्मानन्दो, या प्रत्यक्षतः परामुक्तिरिति ।

आत्मस्वरूपम्–

आत्मा नाम जडस्य तत्प्रकाशस्य प्रकाशकः स्वयंज्योतिः सच्चिदानन्द-स्वरूपः । तस्योपाधिवशात् कल्पितो भेदो न तु स्वाभाविकः, दृश्यमानो हि नैल्यादिधर्मो दृश्यस्यैव नत्वात्मनः यथात्मनो दृष्टधर्मो न विद्यतेऽपि स तु लौकिक

एव, तथैव भेदोऽपि दृश्यधर्म एव, तस्यापि दृश्यत्वात् । दृष्टधर्मो दृश्यो न भवति, तथा सति द्रष्टृबोधो नोपजायते द्रष्टृबोधे दृष्टे सति द्रष्टृता एव न सिध्यति ।

एकरूपवस्तुनो परस्परविरुद्धरूपं न घटते नापि दृष्टभेदः, यदि भासते तदा भेदः सत्य एव भवितुमर्हति । यदि दृष्टभेदो नास्ति तदा भेदोऽपि न सिध्यति । एवं यस्य अभेदः स सत्यः स्यात्, भेदस्तु नीलत्वादिवदौपाधिक एव । संसारधर्मो न आत्मधर्मो भवति तस्मादात्मा सर्वदाऽद्वयः, औपाधिकभेदेन जीवेश्वरेत्यादिविशेष-स्वरूपभाग् वर्तते, अतो भिन्नं परं पदं चास्ति । तत्र जीवः संसारदोषेण व्यवहार-दशायां दृष्टवद् भासते, परमार्थतस्तु न स दृष्टः, किन्तु परमेश्वरो व्यवहारदशाया-मपि न दृष्टः । यथा आकाशस्थितः सूर्यः चलनादिदोषरहित एकः शरावादिपात्र-स्थितजलेषु भिन्नवद् भासते तथैव जीवानामपि भेदः कल्पित एव । यथा सूर्यस्य घटादिषु प्रतिबिम्बं चलतीव भासते तथैव संसारी जीवोऽपि नत्वीश्वरः । पुण्यपाप-जन्ममरणादिभिर्लिप्तो जीव एव दुःखितो भवति न तु बिम्बभूत ईशः । यथा सूर्ये बिम्बप्रतिबिम्बकल्पना तथा आत्मनि जीवेश्वरकल्पना । यथा जलपात्रे नष्टे सति सूर्यस्य बिम्बप्रतिबिम्बत्वे नश्यतः, तथैवात्मनो जीवेश्वरत्वेऽपि । बिम्बप्रतिबिम्ब-भावरहितो भास्करो यथा स्वस्वरूपेण दीप्तः सन् प्रकाशते तथैवात्मा जीवेश्वर-त्वादिरहितः सच्चिदानन्दस्वरूपेण दीप्यते । यथा प्रतिबिम्बाद् बिम्बभूतो भानुः श्रेष्ठो तदपेक्षया विशिष्टोऽस्ति तथैवेश्वरोऽपि जीवेभ्यः श्रेष्ठो विशिष्टश्च, साक्षि-त्वात् स्वभावत्वाच्च । तद् यथा आत्मनः साक्षित्वं जीवापेक्ष्या यद् वर्तते तत् साक्ष्य-भावेऽपगच्छति, किन्तु तत्र यन्नैसर्गिकं साक्षित्वं तत्तु कदापि न गच्छति; एवं सूर्यस्य भासकत्वं यद् भास्यापेक्षया वर्तते तद् भास्याभावेऽपगच्छति, किन्तु नैसर्गिकं यद् भासकत्वं सूर्ये वर्तते, तत्तु कदापि न गच्छति । अत आत्मनः स्वाभाविकं साक्षित्वं, सर्वकालिकं, व्यावहारिकं तु साक्ष्यपेक्षया वर्तते, एवं सूर्यस्य स्वाभाविकं भासकत्वं सार्वदिकं, व्यावहारिकं तु भास्यभासनापेक्षया संतिष्ठते । स्वाभाविकं साक्षित्वं साक्ष्याभावे व्यपदेश्यं विनैव केवलं स्वरूपेणैव तिष्ठति, एवं स्वाभाविकं भासकत्वं भास्याभावे व्यपदेश्यं विना सूर्यस्य स्वरूपेणैव वर्तते । एवं स्वभावाद् यः साक्षी स एव परमः शिवः, तदैक्यमेव जीवस्य परा मुक्तिः कथ्यते । स्वाभिन्नरूपपरात्मनः स्वतः-सिद्धमैक्यं तदैक्यमज्ञाननाशेन स्वत एव प्रकाशते । जीवब्रह्मैक्यविज्ञानाद् यद् अज्ञानं विनश्यति तद् अज्ञानं न भिन्नं नापि अभिन्नं च स सदसद्विलक्षणं, महदादि-शून्यपर्यन्तं सर्वं ब्रह्मात्मैक्याज्ञानमहामायाविजृम्भणमात्रम् । संसारहेतुभूतस्य मूलाज्ञानस्य बाधकं ब्रह्मात्मैक्यविज्ञानं वेदादेव भवति ।

ब्रह्मात्मैक्यविज्ञानं वेदान्तादेवोपजायते। जाते हि तस्मिन् हृदयग्रन्थिर्भिद्यते सर्वसंदेहो दूरीभवति सञ्चितादीनि निखिलानि कर्माणि नश्यन्ति। तदानीं ब्रह्मविज्ञानेन ध्वस्तमिदं जगदाभासकरूपेण प्रारब्धकर्मफलभोगपर्यन्तं भाति। यानि कर्माणि संसारफलकारणानि सन्ति तान्येव संसारफलभोगसाधनत्वेन देहं जनयन्ति, यानि तु विद्याप्रदायकानि कर्माणि निखिलानि शमदमादीनि सन्ति तानि शरीरं साधनं विनैव विद्यामुत्पादयन्ति। अन्यैः कर्मभिः सम्पादिते देहे यानि विद्याकारणानि सन्ति तानि सर्वाणि स्वानुसारं विद्यां जनयन्ति। एतज्जगदवभासनं प्रारब्धफलपर्यन्तं सन्तिष्ठते, तद् दग्धुं वेदान्तवाक्योत्पन्ना विद्यापि न सक्ता, यतो हि देहोत्पादकानि कर्माणि ज्ञाने स्वतन्त्रतया सम्पूर्णं दाहकस्वरूपं प्रतिबध्नन्ति। परतत्त्वसमुत्पन्ना संसारनिर्वर्तिका विद्या स्वोदयमात्रेण अखिलसत्यतां दहति। दग्धेऽपि जगत्सत्यत्वे फलदायकानि प्रारब्धकर्माणि फलं भोजयन्ति। अतएव तदानीं जगत्सत्यत्वस्य दग्धत्वेन प्रारब्धभोगस्य शेषत्वेन च स प्रारब्धफलभोगपर्यन्तं जीवन्मुक्त इति कथ्यते। जीवन्मुक्तस्य पुरुषस्य किञ्चिदपि पुण्यं पापं वा कर्म न लिप्यते, यतो हि साभिमानस्यैव पुरुषस्य कर्मणः सम्भवति न तु ज्ञानिनः। अहं कर्ता इति प्रतीतेः कर्तृता अहंकृतेरेवास्ति, अहमेव कर्तुः स्वरूपं, स्वयंप्रभ आत्मा तु साक्ष्येव शुद्धात्मनः सर्वदा साक्षिस्वरूपत्वात्। एतादृग्ज्ञानसम्पन्नस्य पुरुषस्य कर्तृता पूर्वमपि नास्ति, ज्ञानवेलायां तु विभातापि सा कर्तृता विद्यया बाधिता भवति, तेन ज्ञानोत्तरकाले कर्म न संतिष्ठते तस्य, किन्तु योगिनोऽपि शरीरोत्पादकं कर्म फलभोगं विना न नश्यति। देहिनः वर्तमानशरीरसम्पन्नं कर्म अस्मिन् लोके परलोके वा फलं ददाति। अस्मिन्नेव लोके फलदायकं वर्तमानशरीरसम्पन्नं कर्म प्रारब्धकर्मविपाकं प्रतिबध्य स्वप्नकाले जागरणसमये वा फलं ददाति।

अनेन प्रकारेण निरुद्धभोगं प्रारब्धकर्म स्वप्ने जाग्रति वा फलं ददाति। प्रारब्धानुकूलमेव फलं देही प्राप्नोति। देही अत्रत्यसम्पादितस्य अत्युत्कटस्य पुण्यस्य पापस्य वा फलं प्रारब्धकर्मफलभोगं मध्ये एव विच्छिद्य भुङ्क्ते। तत्फलभोगानन्तरमेव पुनः विच्छिन्नं प्रारब्धशेषफलं तद्देहेन देहान्तरेण वा भुङ्क्ते, कथमपि प्रारब्धफलभोगोल्लङ्घनं न सम्भवति। यतो हि प्रारब्धकर्मफलभोगो अवश्यमेव जनैः विद्यमानशरीरेण शरीरान्तरेण युगपत् क्रमेण वा भोक्तव्यः। अनेकदेहभोग्यस्य अनेकस्य फलस्य शुभाशुभस्य कानिचित् कर्माणि कारणानि भवन्ति। तानि कर्माणि अनेकं शरीरं क्रमशः आरभन्ते, तेषां नाशश्च भोगतोऽभिजायते। सम्पूर्णेषु संचितेषु कर्मसु यत् प्रबलं कर्म, तदेव नानाविधान् भोगान् देहाश्चारभते। माहेश्वरी या शक्तिः सैव जडा माया सकलं दुर्घटं घटयति, नात्र कश्चन सन्देहः।

माया तत्कार्यञ्च सर्वं निरूपयितुं न शक्यम्। तस्या अनिरूप्यस्वभावत्वात्। व्यवहारदशायां श्रुत्युक्तमार्गेण कर्मणा फलहेतुत्वं विद्यते। भोगेन प्रारब्धकर्मणि क्षीणे सति विद्यया मायालेशो निवर्तते। माया स्वयमेकापि विविधाकारा चास्ति, जगद्विवर्तने एकमात्रा सा हेतुः, तस्या एक आकारो वस्तुनः सत्यत्वप्रतिभासने कारणं, द्वितीयो जगतोऽर्थक्रियाकारित्वे, तृतीयः परतत्त्वापरोक्षस्य प्रतिबन्धकत्वे, कश्चिदाकार आत्मस्वरूपस्याच्छादकत्वे, अपरो जगत् प्रतीतिमात्रस्य हेतुत्वे, अन्ये च सूक्ष्माः स्थूला बहवः आकारा वक्तुमशक्याः सांसारिकभिन्नभिन्नकार्येषु हेतवः। ते सर्वे मायाऽऽकाराः कार्यानुगुण्येन कल्प्याः सन्ति। प्रारब्धकर्मणि क्षीणे एव जगत्प्रतीतिमात्रस्य हेतुभूतो मायाभेदः प्रणश्यति।

विश्वमायानिवृत्तिरेव परतरा मुक्तिः। सा च विद्यया सिध्येद् विद्या च वेदान्तवाक्याज्जायते। सा विद्या मुमुक्षोरेव वेदान्तवाक्याद् भवति नान्यस्य। मुमुक्षुत्वञ्च मन्द- मन्दतर- तीव्र- तीव्रतरोत्तरादिभेदेन बहुविधम्। विद्यासाधनबाहुल्ये महत्तर-मुमुक्षुत्वे च सति सा विद्या देव- त्रिमूर्ति- वेद- गुरुसाम्बशिवचिच्छक्ति- स्वविलक्षणशून्यस्वयंभातसर्वसाक्षिप्रत्यगात्मनां प्रसादादुदेति। जातायां च तस्यां विद्वान् विद्वत्तां विहाय स्वयं परं पदं भवति। यथा स्वप्नद्रष्टा जागरणेन स्वप्नाद् विमुक्तः सन् स्वयमेवावशिष्यते तथैव आत्मनोऽन्यरूपेण भासितं समस्तं जगत् स्वप्नोपमं स्वात्ममात्रात्मिकया बुद्ध्याऽवगत्य स्वयमेवावशिष्यते।

एवमुक्त्वा शक्तिपुत्रः पराशरः सच्चिदानन्दे परमाद्वैते प्रत्यगात्मनि निमग्नः तूष्णीमास। ततस्तत्र पराशरस्वात्मानुभूतिप्रदा देवी पार्वती आविरभूत्, किन्तु आत्मानुभूतिलीनत्वात् पराशरस्तां देवीं नाविन्दत्। एवं भूतमात्मलीनं पराशरं विलोक्य देवी शुकदेवं प्रेम्णाऽब्रवीत्। अनेन मुनिना यदुक्तं तत्सर्वं सत्यं, त्वन्तु अस्य पौत्रो व्यासस्य च पुत्रः, अतः किं ते न सिध्यति? मत्प्रसादात् भाग्यवैभवाच्च वेदान्तजन्यं ज्ञानं त्वया लब्धम्, अतः परं त्वत्कृते किमपि अलभ्यं वस्तु नास्ति। चित्तचाञ्चल्यं परित्यज्य आत्मानं पश्य, आत्मतत्त्वानुसन्धानादेव प्राचीना मुनयो विमुक्ता अभवन्। त्वमपि तादृगेवासि। अविवेकिजनदुर्लभं सद्यो मुक्तिकरं ज्ञानं मत्प्रसादं विना नोपलभ्यते। अतो मत्प्रसादावाप्तये निरालसो भूत्वाऽऽदरेण हृदयाम्भोजे वाचि ब्रह्मरन्ध्रे मूलाधारे भ्रूमध्ये वा यथाशक्ति नित्यं मां पूजयेत्। मम निष्कलं रूपं वर्णयुतविग्रहं हस्ताद्यवयवयुतं ब्राह्मणात्मकं लोहपाषाणजन्यं विग्रहं वा

भक्त्या गुरूपदिष्टरीत्याऽर्चेत् । इत्युक्त्वा पार्वती तत्रान्तर्दधे, अन्तर्हितायां तस्यां स्वानुभूतिगलितः पराशरः शुकदेवमालोक्य भवानीगणेशषडाननन्दीश्वरसहितं शिवं प्रणम्याब्रवीत्-यदुमेश एव परं तत्त्वं, वेदान्तवाक्यजैव विद्या, भस्मावगुण्ठनमेव सर्वोत्तमं विधेयं, गुरुरेव संसारतारकः, श्रद्धैव धर्ममोक्षयोः कारणमिति । इतः परं किमपि न वक्तव्यं श्रोतव्यश्चास्ति । महादेवप्रसादादेव पराशरनामकमिदं पुराणं व्यरचयमिति । पराशरात् पुराणमिदं श्रुत्वा शुको गुरुं प्रणम्य भगवन्तं शिवमस्तौत् । अस्मिन् पुराणेऽष्टादशाध्यायाः, अष्टोत्तरसहस्रश्लोकाः सन्ति इति ।

समाप्तोऽयं पुराणसारांशः

विषयपर्यालोचनम्

सृष्टिक्रमविमर्शः

पञ्चलक्षणात्मकेषु दशलक्षणात्मकेषु वा पुराणेषु सर्ग एव मुख्यो विषयः, स च सांख्यशास्त्रानुप्राणितो वेदान्तशास्त्रानुमोदितो नवविधः । तद्यथा-प्राकृतवैकृतमिश्रभेदात् पूर्वं त्रिविधः पाद्मादिषु केषुचित्पुराणेषु स्मृतः । तत्र-प्राकृतस्त्रिविधः–महत्सर्गभूतसर्गेन्द्रियसर्गभेदात् । वैकृतः पञ्चविधः–वृक्षादिसर्गपश्वादिसर्गदेवादिसर्गमनुष्यसर्गानुग्रहसर्गभेदात् । मिश्रश्चैकविधः–स च कौमारसर्गः ।

प्राकृतसर्गः—

अत्र हि प्रकृतिपदेन मूला प्रकृतिः, सप्त महदादयः प्रकृतिविकृतयः संगृह्यन्ते । एवम्भूतया प्रकृत्या उत्पादितः सर्गः प्राकृतः सर्ग उच्यते । तत्र महत्सर्गः प्रथमः (महन्नाम बुद्धितत्वं तदेव ब्रह्मनाम्नापि गीयते तस्य सर्गः महत्सर्गः) । एष एव ब्रह्मसर्गो, बुद्धिसर्गो विद्यासर्गश्चेत्यादिशब्दैर्व्यवह्रियते ।

भूतसर्गश्च द्वितीयः । अत्र भूतपदेन पञ्च तन्मात्रा गृह्यन्ते, तेषां सर्गः, भूतसर्गः । महत्सर्गानन्तरं भूतसर्गो जायते ।

तृतीयः इन्द्रियसर्गः । इन्द्रियाणामर्थात् पञ्चज्ञानेन्द्रियाणां पञ्चकर्मेन्द्रियाणामुभयात्मकस्य मनसश्च सृष्टिः । अस्य वैकारिकसर्गोऽपि संज्ञा ।

वैकृतः सर्गः—

विकृतिशब्देन पञ्चतन्मात्रोत्पन्नानि पञ्चमहाभूतानि इन्द्रियाणि च गृह्यन्ते । तैरुत्पादितः सर्गः वैकृतसर्गः । स एव प्राणिसर्ग इत्यभिधीयते । तत्र प्राणिसर्गे वृक्षादिसर्गः प्रथमः, यो हि मुख्यसर्गनाम्नाभिधीयते । द्वितीयः पश्वादिसर्गः (तिर्यक् सर्गनाम्नाप्ययं प्रसिद्धः) । तृतीयो देवसर्गः । चतुर्थो मानुषः सर्गः । पञ्चमोऽनुग्रहः सर्गः, अर्थात् भावसर्गोऽथवा प्रत्ययसर्गः ।

कौमारसर्गः—

कौमारसर्गश्चान्तिमः प्राकृतवैकृतोभयात्मकः सर्गः । कुमारपदेन सनत्कुमार

---

१. पद्म०सृष्टि० अ०३, श्लो० ७६-८१ । विष्णु० १/५/१-२५ । मार्क० ४७अ० । शिव० वाय० १/१२ अ० ।

उच्यते तत्संबद्धः सर्गः कौमारसर्गः। अयं सनत्कुमारो देवो मानवोऽपि भगवद्ध्यानजन्यो भगवज्जन्यश्च ब्रह्मजातो प्रत्यहंजातश्च। देवत्वाद्ध्यानजन्यत्वाद् ब्रह्मजातत्वाच्च प्राकृतः, मानवत्वाद् भगवज्जन्यत्वात्प्रत्यहंजातत्वाच्च वैकृतः। इतो वैलक्षण्यं दशधा भागवते दृश्यते। तत्र हि महत्सर्गः, अहंकारसर्गः, भूतसर्गः, इन्द्रियसर्गः, वैकारिको देवसर्गः, तमःसर्गश्चेति षट् प्राकृताः सर्गाः, वृक्षादिसर्गः, तिर्यक्सर्गः, मनुष्यसर्गश्चेति त्रयो वैकृताः सर्गाः, उभयात्मकश्च कौमारसर्गः।

इतः परं वैष्णवी, मानसी, रौद्री शाक्ती सृष्टिरपि पुराणेषु निरूपिता चास्ति। तत्र ब्राह्मी यथा-विष्णोर्नाभिकमलादुपरि विराजमानो ब्रह्माऽशरीरिण्या वाचा नियुक्तः शतवर्षाणि दुश्चरं तपस्तप्त्वा सृष्टियोग्यां विज्ञानशक्तिमवाप। तया शक्त्या तदानीं वायुवेगकम्पितं जलमासनं कमलञ्च व्यलोकयत्। ततो वायुं जलं च निपीय अवशिष्टेनाकाशव्याप्तेन कमलेन प्रकृतिलीनान् लोकान् निर्मास्ये, इति निरचिनोत्। ततोऽसौ स्वयं प्रविश्य तज्जलजं विभज्य भूर्भुवः स्वरादिलोकान् विरच्य तेषु स्थावरादिदेवपर्यन्तजीवानसृजत्। तथा तत्सृष्टिविवृद्धये स्वयमुत्पादितेभ्यः स्वसमानमानेभ्यः शक्तिसंपन्नेभ्योऽध्यात्मविद्भ्यो भृगुपुलस्त्यपुलहक्रत्वङ्गिरोमरीचिदक्षात्रिवशिष्ठेभ्यो नवभ्यो मानसपुत्रेभ्यः आत्मनैवोत्पादिताः ख्यात्यादीर्नवकन्याः प्रादात्। तत एव एताः सर्वाः सृष्टय आत्मलाभमलभन्त। एते नव प्रजापतयो ब्रह्मणो मानसपुत्रा अपि ब्रह्मनाम्ना संकीर्त्यन्ते भागवतादिषु। तस्मात्तत्कर्तृका सृष्टिरपि ब्राह्मी। अस्यां सृष्टौ स्थावरानन्तरं प्राणिसर्गे सुरासुरपितृमनुष्याणां प्राधान्यम्, तदुत्पत्तौ सृष्टिकामो ब्रह्मा स्वस्य तमः प्रधानशरीरस्योरुभागादसुरानुत्पाद्य तच्छरीरम् अत्यजत्, यत् रात्रिरूपेण परिणतम्। तदनन्तरं सात्त्विकं देहमाश्रित्य मुखाद्देवानुत्पाद्य तत्कलेवरमजहात्, यद्दिनरूपेण जातम्। ततः आंशिकसत्त्वमयदेहस्य पार्श्वभागात् पितॄनुद्भाव्य तं देहं पर्यत्यजत्, यतः सन्ध्या जाता। तदुत्तरे राजसकायमवलम्ब्य रजः प्रधानान्मानवान्निर्माय तं देहं जहौ, यस्माद्देहाद्ज्योत्स्ना प्रभातं च जाते। अयं च ब्रह्मा परमशक्तिमतो विष्णोरेव रूपम्। नह्येतन्मात्रम्, अपि तु प्रकृतिः पुरुषो व्यक्तं कालश्चापि [1]तद्रूपाण्येव।

मानसी सृष्टिः—

युग्मजाया रजोवीर्यात्मिकायाः पूर्ववर्त्तिनी केवलेन मनसा कल्पिता अरजस्का अवीर्या ध्यानस्मरणचिन्तनमात्रजन्या आद्या या सृष्टिः सा मानसी सृष्टिः।

'प्रजापतिरिदं सर्वं मनसैवासृजत्प्रभुः' (महा०)

परिचर्चितं चैतद् वैशद्येन युक्तिदीपिकायाम्—१४२ पृष्ठे ३९ कारिकाया व्याख्याने, मात्स्ये च (३/५-८)।

---

१. वि० पु० १/१/१५, १६

तत्र प्रायः ब्रह्मणा कृता सृष्टिर्मानसी एव सैव प्रथमा मानसी सृष्टिः। तदुक्तं महाभारते—

> आदिदेवसमुद्भूता ब्रह्ममूलाक्षयाव्यया।
> या सृष्टिर्मानसी नाम धर्मतन्त्रपरायणा ॥

एवं 'कश्यपादिमाः प्रजाः' इति वचनानुरोधात् 'कश्यपः पश्यको भवति' इति ब्राह्मणवचनात् देवदैत्यपशुपतङ्गोरगस्थावरजङ्गमानामुदयः प्रजापतेः कश्यपादेवेति स्मृतिपुराणेतिहासोक्तकथानकाच्च प्रतिभाति। यदयं कश्यपोऽपि दृष्ट्यैव स्रष्टा, अत एतत्कर्तृका सृष्टिरपि मानसी ज्ञेया। एवं अपरैश्च ऋषिभिर्मुनिभिर्योगिभिः सम्पादिता अन्यापि सृष्टिः मानसी अस्ति। विषयेऽस्मिन् ब्रह्मसूत्रभाष्ये (शारीरकभाष्ये) भगवता शङ्करेण प्रतिपादितम्—

'यथा लोके देवाः पितर ऋषय इत्येमादयो महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्यैव किञ्चिद् बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानि शरीराणि प्रासादादीनि च रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादे इतिहासपुराणप्रामाण्यात्।'

तत्र ब्राह्ममानससृष्टौ प्राधान्येन सनकसनन्दनसनातनसनत्कुमाराणां मरीचिनारदप्रभृतीनामृषीणां गणना वर्तते।

रौद्री सृष्टिः –

सृष्टिरियं शैवेषु पुराणेषु आगमेषु बहुधा विजृम्भते। भगवान् ब्रह्मा प्रजावृद्ध्यर्थं प्रथमं सनकादीन् चतुरः कुमारानुत्पाद्य तान् सृष्टिविमुखानुदासीनानवलोक्याक्रुध्यत्। तदादानीमेव महाक्रुद्धस्य ब्रह्मणो वक्रभृकुटिभालात् सूर्यसमानतेजा रुद्र आविर्भूतः। स च शरीरार्धेन नराकृतिः अर्धेन च नार्याकृतिः। रुद्रो ब्रह्मोपदेशात् तादृशं स्वशरीरं द्विधा विभज्य स्त्रियं पुरुषं चेति रूपद्वयमकरोत्। पुनश्च तत्पुरुषभागं एकादशधा स्त्रीभागं च साम्यक्रूरशान्ताशान्तश्यामगौराद्यनेकरूपैरनेकधा विभक्तवान्। एवं रौद्री सृष्टिः ब्रह्मविष्णुमार्कण्डेयभागवतादिषु वर्णिता।

एषा पुराणोक्ता सृष्टिप्रक्रिया प्रतिपादनसौकर्याय बहुभिर्विद्वद्भिः स्वस्वदृष्ट्या बहुविधत्वेन विभज्य निरूपिता। यथा प्रस्थानरत्नाकरे भागवताधारेण वल्लभाचार्यानुयायिगोस्वामिपुरुषोत्तमेन षोढा सृष्टिर्व्यवस्थापिता—

तत्र कारणसृष्टिरेका सच्चिदानन्दाविर्भावरूपा। कार्यसृष्टिस्त्रिविधा—एका सदसदात्मिका प्राणलोकदेवभूतमयी, द्वितीया चिदंशात्मिका जीवान्तर्यामिरूपा,

तृतीया च नामरूपात्मिका। स्वरूपसृष्टिस्तु द्विधा–१. ब्रह्मात्मिका २. तदिच्छात्मिका च। नामरूपायाः सृष्टेरपि बहवो भेदाः सन्ति। तत्र द्रव्यकर्मकालस्वभावजीव-भेदात् पञ्चधा रूपसृष्टिः, एका च नामसृष्टिरिति।

महामहोपाध्यायमधुसूदनओझामहोदयेन स्वकीयग्रन्थेषु स्रष्टव्यभेदात् पञ्चधा एव सृष्टिः प्रतिपादिता—

१. वेदसृष्टिः।
२. यज्ञसृष्टिः।
३. लोकसृष्टिः।
४. प्रजासृष्टिः।
५. धर्मसृष्टिः।

अयं महाभागो लोकसृष्टावेव भूतसृष्टिमन्तर्भावयति। महामहोपाध्याय गिरिधरशर्मचतुर्वेदमहाभागेन 'पुराणपारिजाते' अन्यैव पञ्चधा सृष्टिः वर्णिता। यथा—

१. आदिसृष्टिः।
२. भूतसृष्टिः।
३. लोकसृष्टिः।
४. प्राणिसृष्टिः।
५, धर्मसृष्टिः।

१. आदिसृष्टिः—

स्थावरजङ्गमजडचेनादिरूपस्य प्रपञ्चस्य मूलं किमपि तत्त्वमेकमद्वितीयं नित्यं निनित्तकारणोपलक्षितं सच्चिदानन्दात्मकमस्तीति वेदमूलकैः सर्वैः पुराणै-रेकस्वरेणोद्घोषितम्[१]। तदेवादिसृष्टिमूलं सत् आदिसृष्टिरूपम्। ततो जायमाना कारणात्मिका अन्याऽपि सृष्टिरादिसृष्टिपदेन गृह्यते। तथा चादिसृष्टौ पञ्चतन्मा-त्रापञ्चमहाभूतोत्पत्तेः प्राग्वर्तिनां प्राणवेदर्षिपितृदेवादीनां महदहङ्कारादीनां सृष्टिः समाविष्टा। पुराणोक्ता कौमारसृष्टिश्चापि अत्रैव संगृहीता।

२. भूतसृष्टिः—

भूतसृष्टौ पञ्चतन्मात्राणां ततो जातानां पञ्चमहाभूतानां सृष्टिर्गृहीता।

---

१. पद्म०स्वर्ग० २२/१-५१ पद्म० सृष्टि० २/८५ इत्यादिः। विष्णु० ९/२/६-१३। भाग० २/५/१४। भाग० २/६/२८-४०। भाग० ३/५/२३-२४।

३. लोकसृष्टिः—

अत्र भूर्भुवः स्वर्महः जनः तपः सत्यमिति सप्तानामूर्ध्वलोकानां अतलवितलसुतलतलातलरसातलमहातलपातालेतिसप्तानामधोलोकानां सृष्टिर्गृहीता ।

४. प्राणिसृष्टिः—

अत्र स्थावरपशुपक्षितिर्यग्मनुष्याणां सृष्टिर्गृहीता ।

५. धर्मसृष्टिः—

अत्र धर्माणां तत्प्रतिपादकवेदशास्त्राणां सृष्टिर्गृह्यते । अत्रैव पुराणोक्तोऽनुग्रहसर्गोऽपि संगृह्यते ।

महामहोपाध्याय श्रीमदन्नदाचरणशर्मतर्कचूड़ामणिना स्वकीये 'पुराणरहस्ये' सृष्टिविज्ञानवर्णनं कृतवता सृष्टेश्चत्वारो भेदा मन्यन्ते । यथा—

प्रथमा—हिरण्यगर्भसृष्टिः । यदाऽद्वितीयनिर्गुणब्रह्मदशातो जायमानसगुणभावसंवलितब्रह्मणो ब्रह्माण्डगोलकमुत्पद्यते, असौ हिरण्यगर्भसृष्टिः ।

द्वितीया—ब्राह्मी सृष्टिः । यदा पिण्डसृष्टिः प्रारभ्यते । यत्कारणं पितामहो भगवान् ब्रह्मा वर्तते, सा ब्राह्मी सृष्टिरभिधीयते ।

तृतीया—मानसी सृष्टिः । यदा दक्षप्रजापतिसंकल्पात् नानावैचित्र्यमयी सृष्टिरुपजायते, एषा मानसी सृष्टिर्मन्यते ।

चतुर्थी—मैथुनी सृष्टिः । प्रतिक्षणं स्त्रीपुरुषसम्बन्धाज्जायमाना सृष्टिर्मैथुनी सृष्टिः प्रोच्यते ।

पण्डितप्रवरेण आचार्यबलदेवोपाध्यायमहाभागेन स्वकीये 'पुराणविमर्श' नामके महनीये ग्रन्थे पौराणिक्याः सृष्टयाः समीक्षणमित्थमकारि—

यद्यपि पौराणिकी सृष्टिप्रक्रिया आपाततः सर्वेषां पुराणानां पर्यालोचनेन सांख्यसृष्टिप्रक्रियया अनुप्राणिताऽस्तीति ज्ञायते, तथापि ततो विलक्षणा स्वतन्त्रा पौराणिकी सृष्टिप्रक्रिया जागर्त्तितराम्, या न केवलं सांख्येनानुगृहीता, अपितु वैदिक्या मानव्या तान्त्रिक्या महाभारतीयया च प्रक्रियया संबद्धा चकास्ति। वैलक्षण्यश्चात्र यत् कापिलं सांख्यदर्शनं निरीश्वरं, पौराणिकं सांख्यदर्शनं सेश्वरम् । अपि च कापिलं सांख्यदर्शनं वैयासिक्यात् वेदान्तदर्शनात् पदे पदे भिन्नम् । पुराणे तु सांख्यवेदान्तयोरभेदः सामञ्जस्यं च सर्वत्र प्रतिभाति । सांख्ये तु प्रधानं पुरुषश्चेति उभे तत्त्वे नित्ये स्वतन्त्रे अनादिनी मूले स्तः । तयोः संयोगात् प्रकृतेश्च परिणामात्

सृष्टिः प्रादुर्भवति। पुराणे तु एतद्द्वयं विष्णुजातं रूपद्वयमेवाङ्गीकृतम्। यदुक्तं विष्णुपुराणे—

विष्णोः स्वरूपात्परतो हि ते द्वे
रूपं प्रधानं पुरुषश्च विप्र।
तस्यैव तेऽन्येन धृते वियुक्ते
रूपान्तरं यद् द्विज कालसंज्ञम्॥
(विष्णु० १/२/२४)

प्रसङ्गोपात्तां सृष्टिप्रक्रियां विभिन्नमतेन दिङ्मात्रमधुना निरूपयामि—

१. सांख्ययोगशास्त्रीया सृष्टिः—

अस्मिन् शास्त्रे मूलतया प्रकृतिः पुरुषश्चेत्युभे तत्त्वे स्वीकृते। तयोश्च पङ्ग्वन्धवत् संयोगात् प्रकृतेश्च परिणामात् महत्तत्त्वमुत्पद्यते। प्रकृतिश्च त्रिगुणात्मिका, अतस्तज्जातं महत्तत्त्वमपि त्रिगुणात्मकम्। महत्तत्त्वात् अहङ्कारो जातः। अहङ्कारश्चापि त्रिविधः—सात्विको राजसस्तामसश्च। क्रमशस्तेषां वैकृततैजसभूतादिसंज्ञाः सन्ति। तत्र तैजसादहङ्कारसहकृताद् वैकृताद् अहङ्कारात् पञ्च ज्ञानेन्द्रियाणि मनश्चेति एकादशकः सात्त्विको गण इन्द्रियाह्व उत्पद्यते। तैजसाहङ्कारसहकृताद्भूतादेरहङ्कारात् पञ्चतन्मात्रगणस्तामसः समुदेति। पञ्चतन्मात्रेभ्यस्तेभ्यः पञ्च महाभूतानि जायन्ते। अत्र पञ्चविंशतितत्त्वानि स्वीक्रियन्ते। तेषां चतुर्धा विभागो वर्तते। १- प्रकृतिः, २- विकृतिः, ३- उभयात्मकः, ४- अनुभयात्मकश्च। तत्र प्रकृतिः- मूलाप्रकृतिः, विकृतिः- पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनः, पञ्चमहाभूतानि, उभयात्मकः-महत्तत्त्वम्, अहङ्कारः पञ्चतन्मात्राणि च, अनुभयात्मकः पुरुषः। एष पुरुषश्चेतनः अन्यानि च सर्वाणि अचेतनानि।

योगेऽपि इयमेव सृष्टिप्रक्रिया स्वीक्रियते। तत्र ईश्वरतत्त्वमपि स्वीकृतम्। अतस्तत्र २६ तत्त्वानि सन्ति।

न्यायवैशेषिकमते सृष्टिः

ईश्वरेच्छया परमाणुषु क्रिया जायते। ततः परमाणुद्वयसंयोगात् द्वचणुकोत्पत्तिः। तद्वत् त्रयाणां द्वचणुकानां संयोगात् त्रसरेणोरुत्पत्तिः। एवं क्रमेण त्रसरेण्वादिभ्यः पञ्चानां महाभूतानामुत्पत्तिः। ततः अण्डजपिण्डजस्वेदजोद्भिज्जानां चतुर्विधानां प्राणिनां सृष्टिः।

वेदान्तमते सृष्टिः

सृष्ट्यादौ परमेश्वरः सृज्यमानप्रपञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतः माया-सहितः नामरूपसहितः सन् सर्वं प्रपञ्चं प्रथमं बुद्धौ आकलय्य इदं करिष्यामि, इति संकल्पयति। तत आकाशादीनि अपञ्चीकृतानि पञ्च तन्मात्रप्रतिपाद्यानि पञ्चमहा-भूतानि उत्पद्यन्ते। एतानि च त्रिगुणमायाकार्यत्वात् त्रिगुणानि। तैश्च सत्त्वगुणोपेतैः पञ्चमहाभूतैः व्यस्तैः पञ्च ज्ञानेन्द्रियाणि जायन्ते समस्तैश्च मनोबुद्ध्यहङ्कारचित्तानि चत्वारि अन्तःकरणानि जायन्ते। रजोगुणोपेतैर्व्यस्तैस्तैः पञ्च कर्मेन्द्रियाणि मिलितैश्च तैः पञ्च प्राणा जायन्ते। तमोगुणोपेतैस्तैः पञ्चीकृतानि पञ्चमहाभूतानि स्थूलानि जायन्ते। अपञ्चीकृतमहाभूतैर्लिङ्गशरीरं जायते। पञ्चीकृतेभ्यः पञ्चमहा-भूतेभ्यश्चतुर्दशलोकानां जरायुजादिचतुर्विधस्थूलशरीराणां चोत्पत्तिर्भवति।

आगमे सृष्टिप्रक्रिया

आगमशास्त्रे द्वैतवादाद्वैतवादात्मिका उभयरूपा प्रक्रिया उपलभ्यते। परम-शिवः, चिच्छक्तिः, बिन्दुरिति त्रयोऽपि मूलतो भिन्ना इति द्वैतिनां प्रक्रिया। तत्र शिवश्चिद्रूपः बिन्दुर्जडः चिच्छक्तिस्तूभयत्रानुगतोभयम् संयोजयति। सा च शिवगता चिद्रूपा परिणामविरहिता। बिन्दुगता तु जडेव परिणामिनीव चाभाति। महा-मायामायाप्रकृतिरिति बिन्दोरेव त्रयो विकासाः। महामाया बिन्दुरूपैव जगत्सृजति, शुद्धा च सेति तत्प्रपञ्चोऽपि शुद्धः। तज्जन्या माया तु शुद्धरूपेण स्थितस्य प्रतिबिम्ब-रूपेण विपरीतावभासिनीत्यशुद्धा सोच्यते, तज्जन्यः प्रपञ्चोऽपि गुणत्रयाविलोऽशुद्धः, इत्थं तत्र सूक्ष्मः शुद्धः, स्थूलोऽशुद्धश्चेति द्विविधः प्रपञ्चोऽभ्युपगम्यते। सूक्ष्मः प्रपञ्चः योगिनां सिद्धानामेव। स्थूलेनैव तु प्रपञ्चेन व्यवहरन्ति मायाप्रमातारः सकला जीवाः। मायाया एव कञ्चुकपञ्चकं, तेन बद्धः परिच्छिन्नः पुरुष इति जीव इति वा व्यवह्रियते, तत्सहचारिणी शक्तिश्च प्रकृतिः। सैव पुरुषभोग्यं प्रपञ्चमारचयति। तज्जन्याश्च तत्त्वानां विविधाः शक्तय इत्यादि।

अद्वैतवादिन आगमिकास्तु मूले विभक्तमेव शिवशक्तिरूपं मन्यन्ते। लीलया जगत्स्रष्टुमिच्छया भगवान् शिव एव शक्तिं पृथग् अवभासयति। तत्र च आत्मनः प्रतिबिम्बं पश्यति। ततः शिवः शक्तिश्चेति तत्त्वद्वयम्। ततः शिवस्य प्रादुर्भावः, मूलशक्तेः इच्छा ज्ञानं क्रिया चेति त्रयो विकासा भवन्ति। तत्र शिवशक्त्यंशयोः प्रतिबिम्बेन विविधाः शक्तयो जाताः। यतो जगदुत्पत्तिः।

शारदातिलके (१ पटले) सृष्टिक्रमः

सनातनो नित्यः शिवः निर्गुणः सगुणश्चास्ति। निर्गुणः प्रकृतिभिन्नस्तत्संबन्ध-

शून्यः सकलः गुणः अर्थात् प्रकृतिसहितः। इयं च प्रकृतिः सांख्यमते प्रधानापर-पर्याया, वेदान्तमते अविद्याभिधा शिवतन्त्रे शक्तिरिति। तत्र सकलात् परमेश्वरात् सच्चिदानन्दविभवात् शक्तिर्निर्गता। ततो नादः, नादाद्बिन्दुरजायत। परशक्तिमयोऽसौ बिन्दुः 'बिन्दुर्नादो बीजम्' इति त्रिधा भिन्नो जातः। तत्र बिन्दुः शिवात्मकः नादस्तूभयात्मकः। तस्माद् बिन्दो रौद्री जाता, नादाज्ज्येष्ठा अजायत, बीजाद् वामा अभूत्। ताभ्यो रुद्रब्रह्मरमाधिपा देवा ज्ञानेच्छाक्रियात्मानोऽग्निचन्द्रार्कस्वरूपिणो जाताः। भिद्यमानात्पराद्बिन्दोः अव्यक्तात्मा खोऽभवत्, यं खं वेदज्ञाः सर्वागमविशारदाः शब्दब्रह्मेति वदन्ति। तदेव शब्दब्रह्म प्राणिनां देहमध्यस्थितं कुण्डलीरूपं प्राप्य वर्णात्मना आविर्भवति। बिन्द्वात्मनः कालबन्धः कलात्मनश्च शम्भोः जगत्साक्षी सर्वव्यापकः सदाशिवोऽभवत्। तस्मादीशस्ततो रुद्रस्ततो विष्णुस्तस्माद् ब्रह्मा अभूत्। मूलभूताद्बिन्दुरूपात्सृष्ट्युन्मुखाद् महत्तत्त्वं जातम्, तस्मात् त्रिगुणोऽहङ्कारः, ततो वैकारिकात् सात्त्विकादहङ्कारात् दिग्वातार्कादयो वैकारिका दश देवा अभूवन्। तैजसाद् (राजसाद्) अहङ्कारात् पञ्चभूतानि जज्ञिरे। ततः पञ्चभूतात्मकमिदं सर्वं चराचरात्मकं जगत् जातम्[१]।

सृष्टिज्ञानसौकर्याय आवश्यकत्वेन समग्रां पौराणिकीं प्रक्रियां संक्षेपेणोल्लिख्य सापेक्षत्वेन तदितरां च सृष्टिपद्धतिं दिङ्मात्रेण प्रदर्श्य अधुना प्रकृतोपात्तां पाराशरपुराणोक्तां सृष्टिसरणिं विवेचयामः। तद्यथा द्वितीयाध्याये—

प्रलयान्ते सर्गादौ भगवतः साम्बशिवस्य मायाया महानात्मा जायते महान् च स्रष्टव्यविषयकसत्त्वजज्ञानस्वरूपमेव, एवं महान्तं सृष्ट्वा शिवः स्वयं तत्रानुप्राविशत्। स च शिवोपसृष्टो महान् ज्ञानप्राधान्यात्सर्वज्ञः, ईक्षणोपाधित्वाच्च प्रधान इति गीयते[२]।

यद्यपि सांख्येऽपि ईदृशी जनिर्जायते। तत्र सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः सैव मूला ततो महत्तत्त्वं जायते, किन्तु प्रकृतिरेव प्रधानपदाभिधेया न तु

---

१. शा० ति० प्र० प० ६/२७

२. मायायाः स्रक्फणीवायं महानात्मा प्रजायते।
स्रष्टव्यविषयं ज्ञानं सत्त्वजं मुनिपुङ्गव॥
महानात्मेति विद्वद्भिः पठ्यते वेदवित्तम।
सृष्ट्वा महान्तमात्मानं शिवोऽनुप्राविशत्स्वयम्॥
स पुनस्तत्प्रधानेन रूपेणैव द्विजोत्तम।
सर्वज्ञ इति विद्वद्भिः पठ्यते मुनिपुङ्गव।
ईक्षितेतीक्षणोपाधिप्रधानः परिकीर्तितः॥ पराशरोपपुराणे २/४-६

महत्तत्त्वम् । सांख्ये महतः स्वतः जडत्वेऽपि चेतनाशक्तेरनुग्रहत्वेन चेतनत्वाङ्गीकारेऽपि सर्वज्ञत्वं सर्वेक्षणत्वं क्वचन नोक्तं नापि तादृशं तत्र संघटते महतोऽध्यवसायलक्षणत्वेन तत्र समानासमानजातीयव्यवच्छेदकत्वात्, इत्यग्रे स्फुटीभविष्यति ।

स च महानात्मा सत्त्वादीन् गुणान् आत्मतया अङ्गीकृत्य रजसा जगदुत्पाद्य सत्त्वेन परिपाल्य तमसा च संहृत्य सर्गस्थितिसंहारकर्तृतया ब्रह्मविष्णुमहेश्वरसंज्ञाभिर्व्यवह्रियते[१] ।

नैष व्यवहारः प्रचलति महत्तत्त्वमधिकृत्य सांख्यनये, न च क्वचन सर्जनरक्षणसंहरणकर्तृतया ब्रह्मविष्णुमहेशत्वमुक्तम् ।

एवं ब्रह्मविष्णुमहेशसृष्ट्यनन्तरं मायासकाशात् नामपूर्विका भूतसृष्टिः प्रवर्तते । अत्र भूतपदेन तन्मात्राणां ग्रहणम् । सृष्टौ सृज्यमानसकलप्रपञ्चकारणस्य अधिष्ठानत्वेन साम्बो महेश्वरः उपकर्ता परिणामितया च माया उपकर्त्री[२] ।

एतदपि विचारणीयम् । यतो हि 'पङ्गु–अन्धवदुभयोरपि संयोगः तत्कृतः सर्गः' इति सांख्यसिद्धान्तः, संयोगश्च सान्निध्यं संक्रान्तत्वं वा । न ह्येतेन सकलप्रपञ्चस्य पुरुषाधिष्ठानत्वं सिध्यति, प्रकृतेश्च परिणामित्वेऽपि स्वस्य स्वपरिणतसमस्ततत्त्वस्याधिष्ठानत्वमपलपितुं न कोऽपि शक्नोति, तस्याः स्वयं मूलत्वात् ।

पञ्चतन्मात्राणां सत्त्वगुणैर्व्यष्टया ज्ञानेन्द्रियाणि समष्ट्या चतुर्विधमन्तःकरणं रजोगुणैः व्यष्ट्या कर्मेन्द्रियाणि समष्ट्या पञ्चप्राणाश्च जायन्ते ।

नैतदुपयुज्यते सांख्यप्रक्रियायाम् । यतो हि तत्र सात्विकात् वैकृतनाम्नोऽहङ्कारात् राजसाहङ्कारसहकृतात् पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि उभयात्मकं मनश्चेत्येकादशको गणो जायते, तामसाच्च भूतादिनाम्नोऽहङ्कारात् राजसाहङ्कारसहकृताद् पञ्चतन्मात्रा जायन्ते, इति सरणिर्विराजते, न तु पञ्चतन्मात्राणां गुणैः[३] ।

अतोऽस्य सृष्टिः न सांख्यानुगा, सत्यपि अंशतो बाह्यालोचनसाम्येऽपि । अपि तु श्रुत्यनुसारिणी, यां श्रौतीं प्रक्रियां वेदान्तप्रक्रियाऽपि सततमनुगच्छति ।

---

१. परा० पु० २/७-११

२. परा० पु० २/१२-१३

३. सां० का० ५–सांख्यतत्त्वकौमुदी द्रष्टव्या ।

तदित्थम्–श्रुतौ–

यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः ।
तस्मादेतद् ब्रह्म नामरूपमन्नञ्च जायते ॥
(मुण्ड० १/९)

यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति, तदभिजिज्ञासस्व ब्रह्मेति ।
(तै० ३/१)

इदं सर्वं यदयमात्मा सच्च त्यच्चाभवत्, सोऽकामयत बहुस्यां प्रजायेय ।
(तै० २/६)

तदैक्षत बहुस्यां प्रजायेय ।
(छा ६/१/३)

इत्यादीनि बहूनि सृष्टिप्रतिपादकानि वाक्यानि ब्रह्मण एव सृष्टिमामनन्ति, तदनुगामि वेदान्तशास्त्रं वदति यद् मायाशबलितं ब्रह्म सकलस्यास्य प्रपञ्चस्याभिन्ननिमित्तोपादानकारणं तत्र च ईक्षितत्त्वादितया चैतन्यं कारणम् उपादानतया माया अथवा अविद्या, अथवा अज्ञानं कारणं तच्च मायाशबलितं ब्रह्म प्राणिकर्मसहकृतं प्रथमं नामरूपात्मकं जगत् बुद्धौ आकलय्य करिष्यामीति संकल्प्य तत्संकल्पानुसारं त्रिगुणात्मिकाया अपरिमितानिरूपितशक्तिसहिताया मायायाः त्रिगुणाः पञ्चतन्मात्रा जायन्ते, यदीयसात्त्विकांशैर्व्यस्तैः पञ्चज्ञानेन्द्रियाणि समस्तैश्च चतुर्विधान्तःकरणानि व्यस्तैः राजशांशैः पञ्च कर्मेन्द्रियाणि समस्तैश्च पञ्च प्राणा जायन्ते । अत्र यादृशी रीतिः पञ्चतन्मात्राद्यारभ्य पञ्चप्राणोत्पत्तिपर्यन्तमङ्गीकृता तादृशी एव पराशरपुराणेऽप्यस्ति । अत इयं प्रक्रिया अंशतो वेदान्तानुप्राणिता इत्यङ्गीकरणीयैव ।

विचारे क्रियमाणे सति एतत्पुराणोक्तसृष्टिप्रक्रिया शैवागमोक्तसृष्टिप्रक्रिययाऽपि सह साम्यं विधत्ते । अद्वैतवादिनामागमिकानां मते अविभक्तं शिवशक्तिरूपम् एकं परं तत्त्वमस्ति तदेव लीलया जगतः सिसृक्षायां स्वशक्तिं पृथक् अवभास्य चात्मनः प्रतिबिम्बं पश्यति । ततः शिवः शक्तिश्चेति तत्त्वद्वयं जातम् । ततः सदाशिवस्य ईश्वरस्य प्रादुर्भावः इत्यादि ।

पराशरोक्तसृष्टिप्रक्रियायाः वैशिष्ट्यम्–

यद्यपि पुराणोक्तेयं सृष्टिः वेदान्तदर्शनानुगा शैवागमाद्यनुसृता सांख्येनाप्यं-

शतोऽनुगताऽस्ति किन्तु अत्र किमपि वैलक्षण्यं वर्तते, येनेयं विशिष्टा सती बुधैः सम्मान्या । तद्यथा—

अस्मिन् पुराणे भगवतः साम्बशिवस्य मायया जायमानस्त्रिगुणात्मको महानेव ब्रह्मविष्णुरुद्रपदवाच्यः, यो हि स्वयं लिङ्गादिशरीररहितोऽपि लिङ्गादीनामुत्पादयिता । अस्यैव महतः सात्त्विकराजसांशैर्जातमिन्द्रियप्राणात्मकं लिङ्गं कथं तच्छरीरं भवितुमर्हति । वेदान्ते च लिङ्गशरीरसमष्ट्यात्मका हि ब्रह्मादयः, तस्मादेव ते सर्वज्ञा इति मन्यन्ते ।

अपरञ्च वेदान्ते मायाशबलितादेव साक्षात् पञ्चतन्मात्रा उत्पद्यन्ते इति स्वीक्रियते । अत्र तु मध्ये महान्तमुत्पाद्य ततः पञ्चतन्मात्रा जायन्ते इति एका अपरा कोटिर्निवेशयते । येन सृष्टिपद्धतौ सौकर्यं समायाति ।

वाराणसीवैभवम्

विश्वस्मिन् विश्वे जनैः समादृतं वाराणसीसदृशं प्राचीनं रामणीयकं सततस्थायि किमप्यपरं नगरं नास्ति, यदस्या वैभवं हस्तयितुं समर्थं दृश्यते । सत्यपि बहुप्राचीनत्वे आधुनिकानां मतानुसारेण त्रिसहस्राब्दीकल्पादेवास्याः पावनत्वमक्षुण्णं निरन्तरं प्रवहल्लोके समागच्छति । वाराणसी–काशी–अविमुक्त–महाश्मशान–आनन्दकानन—रूद्रावाससंज्ञाभिः ख्यातेयं वाराणसी पुराणे काव्ये च सहस्राधिकैः श्लोकैर्जेगीयमाना स्वमहिमानं स्वत एव प्रकटयति ।

ऋग्वेदे,[१] शतपथे,[२] गोपथे,[३] वृहदारण्यके'[४] कौषीतक्यां,[५] रामतापनीये,[६] पाणिनीये,[७] भारते[८], हरिवंशे,[९] च बहुशः समुल्लिखितायास्तस्या ऐतिहासिकत्वं महापरिनिब्बान[१०]–महासुदस्सनसुत्त[११]जातकादिबौद्धग्रन्थेषु[१२] जैनग्रन्थेषु[१३] च सुविशदं वर्णितायास्तस्याः सातत्यमार्यसंस्कृतिमूलस्थानत्वमविच्छिन्नस्थायित्वं, वायु[१४]ब्रह्मा-[१५] [१६]ग्निविष्णु[१७]मत्स्य-[१८] स्कन्द[१९]नारदाद्य[२०]-ष्टादशपुराणेषु स्थाने--स्थाने विस्तरेण स्तुताया वाराणस्याः पावनत्वं,

१. १०/१७९/२, ४/३०/२०, २. १३/५/४/२१, १४/३/१/२२, ३. पूर्वभागे२/९, ४. २/१/१, ५. ४/१, ६. त्रिस्थली० पृ० २९१, ७. ४/२/११३, ८. अनुशासन०३०/१०/, वन०८४/७९,८०, ९. १/२९, १०. सैक्रेड बुक आफ द ईस्ट', भाग० ११, पृ० ९९, ११, सैक्रेड बुक आव दि ईस्ट, भाग० ११ पृ० २४७, १२. धर्मशास्त्र का इतिहास पृ० १३४१, १३. सैक्रैड बुक आव दि ईस्ट जि० २२, पृ० २७१ तथा २६६ १४. ४५/११० १५. अ० २०७, १६. अ० ११२/६,७, १७. ५/३४, १४,२१,२५,३०,३९. १८. १८०/४७, ७१, ७४, १९. काशी० ५/२५, १०/१०३, २०. उत्तर० अ० २९,

महाकाव्य[१]बौद्धजैनकाव्येषु[२] यथावसरं चर्चितायाः काश्याः माहात्म्यं [३]भाष्यनिबन्धादिग्रन्थेषु[४] विवेचितायास्तस्याः वैभवं सुतरां समुल्लसति ।

वस्तुतस्तु इदं नातिरिच्यते नातिसज्जते यदिदं संस्कृतवाङ्मयमामूलचूलं सर्वमपि स्वस्मिन् यथा तथा काशीवैभवं विनिवेश्य स्वकीयं गरिमाणं प्रतिष्ठापयति। धन्येयं किल वाराणसी, या स्वर्गखण्डमिव धरायां विराजते। तदुक्तं श्रीहर्षेण-

वाराणसी निविशते न वसुन्धरायां
तत्र स्थितिर्मखभुजां भुवने निवासः ।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः
स्वर्गात्परं पदमुदेतु मुदे तु कीदृक्[५] ।।

यद्यपि अविमुक्त–वाराणसी–काशी–महाश्मशान–आनन्दकाननरुद्रावासादयः[६] पर्यायशब्दाः सामान्यरूपेण प्रथिताः, किन्तु एतेषां शब्दानां निरुक्तौ तदनुरूपं वाच्ये परिधौ सीम्नि अभिधेये संज्ञायां पौर्वापर्ये च वैविध्यं वर्तत एव । तद्यथा—'काशृ दीप्तौ' इति धातोः काशते निर्माणमार्गे स्वतेजसा या सा अथवा काशते-विराजते शिवः अनिर्वचनीयज्योतिषा यत्र सा काशी इति व्युत्पत्या निष्पन्नौ काशिकाशीशब्दौ[७] जनपदनगरोभयवाचिनौ सन्तावपि जनजात्योरपि[८] बोधकौ स्तः । जनपद-

---

१. नैषधीय० ११/११६, २. बुद्धचरित० १५/१०१, ३. शारीर क० १/२/३२, ४. कल्पतरु० तीर्थ० पृ० २४, तीर्थप्रकाश० पृ० १७२, हेमाद्रौ, जाबालोपनिषदि । ५. नै० च० ११/११६, ६. वि० पु० (५/३४,१४,२१,२५,३०,३९), ब्रह्म० (७/२०७), महाभारत (सभा० १४/१८,२०,३४), काशी० (२६/२-५)-

वाराणसीति काशीतिं रुद्रावास इति प्रभो ।
अवाप नामधेयानि कथमेतानि सा पुरी ।
आनन्दकाननं रम्यमविमुक्तमनन्तरम् ।
महाश्मशानमिति च कथं ख्यातं शिखिध्वज ।
(काशी० २६/४,५)

७. काश्यादिभ्यष्ठञिठौ (४/२/११३) इति काश्यादिगणे ह्रस्वेकारान्तकाशिशब्दपाठो वर्तते, उपलभ्यन्ते च बहुशः प्रयोगाः–'एतस्य काशिनृपतेस्तमवेक्ष्य लक्ष्मीम्, निर्विश्य निर्विरति काशिनिवासिभोगान्' (नै०च०११/११३,११८), 'काशिराजश्च वीर्यवान्' (श्रीमद्भगवद्गीता० १/३), 'काशिष्वपि नृपो राजन् दिवोदासपितामहः' (अनुशासन० ३०/१०), 'ततः शतं च पाञ्चालाः शतं काशिकुशादयः' (मत्स्य० २७३/७३), 'काशिकोशलीयाः' महाभा० ४/१/५४) ।

८. 'आदत्त यज्ञः काशीनां भरतः' (शत० १३/५/४/२१)

सीमा त्वस्या यथासमयं पर्यवृतत इति न तिरोहितमितिहासविदाम् । नगरसीमा तु पञ्चयोजनात्मिका–पश्चिमे गोकर्णेश्वरः पूर्वे गङ्गाया मध्यो भागः, उत्तरे भारभूतः, दक्षिणे ब्रह्मेश्वरः । चतसृषु दिक्षु चतुर्योजनात्मिका मध्ये च योजनात्मिका सीमा[१] । नारदीये[२]पूर्वपश्चिमयोः दैर्घ्यं सार्धयोजनद्वयम् विस्तारश्च दक्षिणोत्तरयोरर्धयोजनम् । क्वचन च पञ्चक्रोशात्मिका काशीति गीयते[३] । अत्रायमितिहासः[४]—

ऐलवंशे काशनामको राजाऽभूत्, यतः काशिनामकशाखा जाता । तच्छाखाजातानां काशिजातीयजनानां निवासभूतत्वादियं काशीतिनाम्ना ख्यायते । अस्याः खलु प्राचीनं नाम काशीति प्रतिभाति । यतो हि प्राचीनग्रन्थेषु काशीत्यस्यैवोल्लेखः प्राप्यते । बौद्धकालतो विशेषरूपेण वाराणसीति प्रख्यानं जातम्[५] ।

अन्ये च वाराणसीप्रभृतयः शब्दा केवलं नगरवाचका एव, कुत्रापि काशीशब्दवत् एषां शब्दानां जनपदाभिधेयेऽवर्तमानत्वात् । वाराणस्या व्युत्पत्तिश्च–वरं च तदनः वरानः, वरानसोऽदूरभवा नगरी वाराणसी । वरानस् शब्दात् 'अदूरभवश्च' (पा० ४/२/१७) इति सूत्रादणि ङीपि च । अथवा वरणा असी नाम–नद्योर्मध्ये वसतीति वाराणसी[६] । जाबालोपनिषत्प्रभृतयस्तु वरणा–नासिनामिकेनद्यौ मन्यन्ते । तदानीं पृषोदरादित्वात् ना इत्यस्य लोपः, रेफाकारस्य दीर्घः, णकाराकारस्य ह्रस्वश्च–वसतयर्थे अण् ङीप् च । इन्द्रियकृतानां दोषाणां वारणात् वरणा, इन्द्रियकृतानां दोषाणां नाशाच्च नाशी । कुत्रचित्तु भ्रुवोर्मध्ये नासिकामूले च वाराणस्या स्थितिः स्वीकृता[७] । क्वचन तु इडा-पिङ्गला-सुषुम्नानाम नाड्यो वाराणसीति मन्यते । यथा—

---

१. लिङ्ग० (९२/९९-१००), तीर्थचि०पृ० ३४०, त्रिस्थली० पृ० १०३

२. नार० उत्तर० ४८/१८ १९

३. पद्म० सृष्टि० १४/१९४-१९६

४. हरि० । अ० २९

५. महापरिनिब्बान–सुदस्सनसुत्तयोरिदं लिखितम् ।
(सैक्रेड बुक आव दि ईस्ट, जि० ११ पृ० ९९, २४७)

६. वरणा च असी चेति द्वन्द्वे तत्र वास इत्यर्थे अण् ङीप् च । पृषोदरादित्वात् रेफाकारस्य दीर्घत्वं णकाराकारस्य ह्रस्वत्वं च ।

७. वरणा नासि यत् स्थानं तत्स्थानं सर्वदेहिनाम् ।
भ्रुवोर्घ्राणस्य यः सन्धिस्तस्मिन्नेव प्रतिष्ठितम् । पारा० पु० १५/४४

स होवाच जाबालिरारुणेऽसिरिडा स्मृता ।
वरणा पिङ्गला नाडी तदन्तस्त्वविमुक्तकम् ।
सा सुषुम्ना परा नाडी त्रयं वाराणसी त्वसौ[1] ।।

वामनपुराणे[2]—

प्रयागे वसते नित्यं योगशायीति विश्रुतः ।
चरणाद्दक्षिणात्तस्य विनिर्याता सरिद्वरा ।
विश्रुता वरणेत्येव सर्वपापहरा शुभा ।
सव्यादन्या द्वितीया च असिरित्येव विश्रुता ।
ते उभे तु सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ।
ताभ्यां मध्ये तु यो देशस्तत्क्षेत्रं योगशायिनः ।
त्रैलोक्यप्रवरं तीर्थं सर्वपापप्रमोचनम् ।
न तादृशोऽस्ति गगने न भूम्यां न रसातले ।
तत्रास्ति नगरी पुण्या ख्याता वाराणसी शुभा ।

तत्र वाराणसी द्विविधा—एका आध्यात्मिकी अपरा च आधिभौतिकी । भ्रुवोर्घ्राणस्य सन्धिदेशे स्थिता वाराणसी आध्यात्मिकी, वरणा–असिमध्ये स्थिता आधिभौतिकीति गीयते ।

सीमा चास्याः—दक्षिणे वरणा नदी, उत्तरे च असी नदी, पूर्वे गङ्गा नदी, पश्चिमे पाणिपाशगणेश्वरः[3] । अन्यत्र सार्धयोजनद्वयम् पूर्वपश्चिमयोः, दक्षिणोत्तर-

---

१. स्कन्द० काशी० ५/२५

तुलना—पिङ्गला नाम या नाडी सा सौम्या संप्रकीर्तिता ।
शुष्का सरिच्च सा ज्ञेया लोलार्को यत्र तिष्ठति ।।
इडा नाम्नी च या नाडी सा सौम्या संप्रकीर्तिता ।
मत्स्योदरी च सा ज्ञेया विषुवं तत्प्रकीर्तितम् ।।
(नार० उ० ४७/२२-२३ । तीर्थचि० पृ० ३४१, तीर्थप्रका० पृ० १७८)

२. वामन ०३/२६-३० ।

३. दक्षिणोत्तरयोर्नद्यौ वरणासिश्च पूर्वतः ।
जाह्नवी पश्चिमे चापि पाशपाणिर्गणेश्वरः ।।
(पद्म०पाता०, त्रिस्थली०पृ० १००, तीर्थप्रकाशे पृ० १७२)

योश्च सार्धयोजनं वाराणस्या परिधिः[१]। पुनश्च तत्रैव योजनद्वयात्मकं विस्तारमवर्णयद् वाराणस्याः। अग्निपुराणेऽपि एतदेवानुमोदितम्।

अविमुक्तम्

न विमुक्तं शिवशिवाभ्यां यत् तद् अविमुक्तम्[२]। यद्वा—अविः पापं, तेन मुक्तमित्यविमुक्तम्[३]। आहोस्वित्—न विमुक्तमपि तु जुष्टं शिवेन इत्यविमुक्तम्। सत्यप्यस्य वाराणसीपर्यायत्वे क्षेत्रे वैचित्र्यमेव। यद्यपि विश्वेश्वरलिङ्गमभितः शतद्वयचापपरिमिता वृत्ताकारा भूमिरविमुक्तमिति ख्यायते, तथापि सीम्नो विषये बहुशो मतभेदाः सन्ति।

आनन्दकाननम्

आ समन्तात् नन्दनमानन्दः। आनन्दस्य काननमानन्दकाननमिति। शिवस्यानन्दवनमेतत्[४]। यतो हि शिवः शिवया सह सानन्दमत्र विहरति। यथा—'सानन्दमानन्दवने वसन्तम्' इत्यादयः। सामान्यत एष शब्दो वाराणसीपर्याय एव। अस्य सीमापि तादृगेव ज्ञातव्यः।

महाश्मशानम्

इयं वाराणसी पाद्मे[५] मात्स्ये[६] स्कान्दे[७] च महाश्मशानपदेन जेगीयते। महाश्मशानत्वं चास्याः लोकविश्रुतमेव। यतो हि अत्र चरमे वयसि प्रायो हि हिन्दवो मुमूर्षन्ति। शवाः शेरते यत्र तत् श्मशानम्। महच्च तत् श्मशानं महाश्मशानमिति। श्म शब्दः शव वाचकः, शानं शयनमिति पृषोदरादित्वादस्य सिद्धिः।

रुद्रस्यावासत्वाद् 'रुद्रावास' इति नाम्नाऽपीयं ख्यायते। नहीयं वाराणसी केवलं शैवक्षेत्रम् अपि च वैष्णवक्षेत्रम्, शक्तिपीठं, गणपतिपीठश्चास्ति। किमुत वक्तव्यं आर्यधर्मेतराणां बौद्धानां जैनानाञ्च सिद्धिक्षेत्रम् तत्तत्तीर्थङ्कराणां प्रसव-

---

१. द्वियोजनमथार्धं च पूर्वपश्चिमतःस्थितम्।
अर्द्धयोजनविस्तीर्णं दक्षिणोत्तरतः स्मृतम्।
वरणा च नदी यावद्यावच्छुष्कनदी तथा।
(मत्स्य० १८४-५०-५१)

२. काशी० २६, २७; लिङ्ग० पूर्वं० ९२/४५, ४६ नारद० उ० ४८/२४, मत्स्य० १८०/५४ अग्नि० ११२/२, ३. लिङ्ग० पू० ९२/१४३, ४. काशी० ३२/१११।

५. पद्म० १/३३/१४, ६. मत्स्य० अ० १८१/श्लो० ६, ७. काशी० ३१/३१०।

भूमिश्च वैदिककालादारभ्य अद्यावधि संसारे विद्यास्थानत्वेन तत्रापि संस्कृत-भाषायाः सदनत्वेन सर्वत्रास्या वैभवमाहात्म्यं चकास्ति ।

पाराशरपुराणे वाराणस्याः स्वरूपम्

अत्राविमुक्तस्य माहात्म्यं वर्णयता शिवेनोक्तं पार्वतीं प्रति—हे देवि इदं क्षेत्रं संसारविषवृक्षस्य नाशनाय कुठार एवास्ति । ममालयोऽयं संसारविषदष्टानाम-गतीनां महौषधम् । अथ च सर्वेषां पापानां विनिवर्तकम् । अस्य क्षेत्रस्य सेवया एव नरो मां लभते नान्योपायेन । अस्य सेवनेन सर्वाणि कुरुक्षेत्रादीनि तीर्थानि सेवितानि भवन्ति ।

अत्र मासपर्यन्तं गङ्गास्नानेन मानवः सर्वपापविमुक्तो भवति । अत्र सकृदेव गङ्गास्नानेन विश्वनाथदर्शनेन दिनमात्रोपवासेन श्रद्धया चाल्पदानेन ब्रह्महत्यादि-सकलपापान्मुक्तिर्भवति । अत्र जपहवनदानादीनां शुभकर्मणामनन्तफलं भवति[१] । हे पार्वति ! वाराणस्यामेव म्रियमाणस्य प्राणिमात्रस्य मोक्षार्थं सकलवेदवेदान्त-साररूपप्रणवात्मब्रह्मणोऽर्थभूतोऽहं करुणया स्वकीयं परामृतं सच्चिदानन्दात्मकं तारकं ददामि, येन त्वरया स प्राणी महादुःखकरं संसारं परित्यज्य परानन्दो भवति । अत्र श्रुतिः—

'अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती-भूत्वा मोक्षीभवति । तस्मादविमुक्तमेव निषेवेत[२] ।

अत्रोक्तं तारकं ब्रह्म किमिति जिज्ञासायां श्रीरामोत्तरतापिन्युपनिषद् आह । तत्र श्रीरामो वृषभध्वजमुवाच —

'क्षेत्रेऽत्र तव देवेश यत्र कुत्रापि वा मृताः ।
कृमिकीटादयोऽप्याशु मुक्ताः सन्तु न चान्यथा ॥
अविमुक्ते तव क्षेत्रे सर्वेषां मुक्तिसिद्धये ।
अहं सन्निहितस्तत्र पाषाणप्रतिमादिषु ॥

---

१. अत्र जप्तं हुतं दत्तं यत्किञ्चिदपरं कृतम् ।
अनन्तं तद्भवेत्सर्वं नात्र सन्देहकारणम् ॥
(पारा० १५/१९)

तुलना— दत्तं जप्तं हुतं चेष्टं तपस्तप्तं कृतं च यत् ।
ध्यानमध्ययनं ज्ञानं सर्वं तत्राक्षयं भवेत् ॥
(मत्स्य० १८०/९, कूर्म० पूर्व० ३१/२९)

२. जाबालोपनिषद् ।

मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् ।
उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिव ॥"

अर्थात् मुमूर्षोः प्राणिनो दक्षिणे कर्णे शिवो रामस्यैव मन्त्रमुपदिशति । स एव तारको मन्त्र इति ।

अन्यत्रोक्तम्

अनिलो मृगनाभिरेणुगन्धी हरवामाङ्गकुचोत्तरीयजन्मा ।
हरते मरणश्रमं नराणामधिकाशि प्रणवोपदेशकाले ॥

तात्पर्यमिदं यत्काश्यां म्रियमाणं प्राणिनं भगवान् शङ्करः प्रणवस्योपदेशं करोति । अत्र तारकमन्त्रत्वेन प्रणव उक्तः । तथा चास्मन्मातामहचरणाः श्रीमन्तोऽवधनाथपाण्डेयाः स्वकीये 'दुर्गाशतके' तारकस्येत्थं व्याख्यानं कृतवन्तः—

तन्मन्त्रस्ते परमगतिदस्तारको यः प्रसिद्धः,
ताराशब्दादणि तदनु के प्रत्यये सिद्धिमाप्तः ।

भूतेशे या शवपरिवृते शङ्करे शक्तिरेषा,
मन्ये सा त्वद्ग्रहणफलिका मन्त्रजापूर्वशक्तिः ॥

तात्पर्यमिदं यत् काशीमृतेभ्यो मोक्षप्रदायकस्तारको मन्त्रो भगवत्या दुर्गाया मन्त्रोऽस्ति । दुर्गाया एकं नाम—ताराऽस्ति । ताराशब्दादिदमर्थे अण् प्रत्यये कृते स्वार्थे च क प्रत्यये कृते 'तारक' इति शब्दो निष्पद्यते । अतस्तारकस्ताराया (दुर्गायाः) एव मन्त्रः ।

'अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे' इत्यादिश्रुत्या तारकोपदेशो मुक्तय आवश्यकः प्रतिभाति । विभिन्नसम्प्रदायानुसारेण तारकस्य विभिन्नं स्वरूपं प्रतिपादितम् । 'एकं सद् विप्रा बहुधा वदन्ति' इति श्रुत्या सर्वे देवा नामरूपभिन्ना अपि एकस्यैव परब्रह्मणो रूपम् । अतस्तेषां मन्त्राः स्वरूपतो भिन्नाः सन्तोऽपि परमार्थतः तस्यैव ब्रह्मणो वाचकाः । अतः यः कोऽपि सम्प्रदायानुसारी मन्त्रस्तत्तत्सम्प्रदायदीक्षितानां कृते तारको भवितुमर्हति । वस्तुतस्तु श्रुतिमूलकत्वाद् भगवतो रामस्यैव मन्त्रस्तारको मन्त्रः । यथाह श्रुतिः—

'यत्र कुत्रापि वा काश्यां मरणे स महेश्वरः ।
जन्तोर्दक्षिणकर्णे तु मत्तारं समुपादिशेत् ॥
निर्धूताशेषपापौघो मत्सारूप्यं भजत्ययम् ।
सैव सालोक्यसारूप्यमुक्तिरित्यभिधीयते ॥'

—इति रामो मारुतिमाह—(मुक्तिकोपनिषद्-२१, २२)

काशीरहस्येऽपि भगवतो रामस्यैव मन्त्रः तारकत्वेनोपदिष्टः । यथा—

पेयं पेयं श्रवणपुटके रामनामाभिरामं
ध्येयं ध्येयं मनसि सततं तारकं ब्रह्मरूपम् ।
जल्पन् जल्पन् प्रकृतिविकृतौ प्राणिनां कर्णमूले
वीथ्यां वीथ्यामटति जटिलः कोऽपि काशीनिवासी[1] ॥

एवंभूतस्य भगवतः शङ्करस्य क्षेत्रत्वाद् विज्ञानोत्पत्तेः कारणत्वात् पापानां नाश। तदुच्चेदमविमुक्तं मुमुक्षिभिः सदा सेव्यम् ।

अस्मिन्नविमुक्ते सेवाहीनोऽपि जनः मुक्तो भवति अस्य क्षेत्रस्य माहात्म्यं शिवेनापि न वक्तुं पार्यते । जाबालोपनिषदपि अस्य वैभवं जानातीत्यत्र सन्देहः । अस्य सेवनेन विना वेदजन्यं विज्ञानं नोत्पद्यते । विज्ञानेन विना मुक्तिर्न सिध्यति । सहस्रजन्मार्जितपुण्यबलादेव ब्रह्मविज्ञानं जायते ज्ञानाच्च तेषां मुक्तिर्भवति । किन्तु येषां देहिनामत्र मरणं सिध्यति तैः सर्वं विज्ञानसाधनं पूर्वमनुष्ठितम् । अतस्तेऽनायासं मुक्ता भवन्तीति तात्पर्यम् । तस्मात्सर्वं परित्यज्य भगवता शङ्करेण भवान्या च सेवितमिदं क्षेत्रं समाश्रयणीयम् ।

अविमुक्तमिदं स्थानं 'वरणानासि' इति संज्ञया प्रथितम् । वरणानासि इति स्थानं भ्रुवोर्घ्राणस्य सन्धिरेवोक्तः । अत्र अविमुक्तनामकं सुप्रतिष्ठितं शिवलिङ्गं मुमुक्षुभिः सदा चिन्तनीयम् ।

शिवः शिवां स्वयं कथयति—

अविमुक्तं यदध्यात्मं मदीयं क्षेत्रमुत्तमम् ।
अत्राहं देवि सुप्रीतस्त्वया सन्निहितः सदा ॥

अतः पापविशुद्धये मानवो मामत्र ध्यायेत् । अत्रायं निष्कर्षः—भ्रुवोर्घ्राणस्य सन्धिरूपा वाराणसी आध्यात्मिकी योगिगम्या, अथ च वरणा-नास्योर्नद्योर्मध्ये स्थिता वाराणसी भूमिगता—आधिभौतिकी सर्वजनसुलभा चास्ति ।

शिव उवाच—हे पार्वति पूर्वकाले अत्रिर्याज्ञवल्क्यं प्रति विज्ञान-साधनमपृच्छत् । योगीश्वरो याज्ञवल्क्योऽविमुक्ते मदीयक्षेत्रे मम ध्यानमेव विज्ञान-साधनमाह । अन्ये च योगिनोऽध्यात्मे भ्रुवोर्मध्ये वरणानासिसंज्ञकं शुद्धं प्रकाशमण्डलं केवलं भावनागम्यमेवोपदिश्य ततः परं सर्वातीतं चैतन्यं सुखस्वरूपं सकलोत्पत्तिस्थितिसंहारकारणं वेदवाचोऽविषयं सोमार्धकृतशेखरं वरदाभयहस्तं त्रिनेत्रं विष्णवादिभिरुपास्यमानमोमर्थं परानन्दं प्रकाशमयं साम्बं शिवमेव मोक्षैक-साधनं प्राहुः । अन्ये चैश्वर्यशालिनः ऐश्वर्यसाधनं मामाहुः । केचन मुनिश्रेष्ठाः क्रममुक्तेः साधनं मामाहुः । भ्रुवोर्घ्राणस्य सन्धिरेव द्युलोकस्यापि सन्धिरुक्तः । तत्र

१. रामायणमीमांसा—(ले० स्वामी करपात्री जी महाराज) पृ० ८०४ ।

सन्धिभूतं मां पूर्वं वैदिकब्राह्मणाः सादरमचिन्तयन् । अस्मिन्नविमुक्ते सदाऽहं संनिहितोऽतोऽस्याविमुक्तसंज्ञा । अतो वाराणस्यां मुमुक्षुभिः साम्बोऽहमत्र सदोपास्यः । प्रसन्नोऽहमुपासकेभ्योऽविमुक्तनामकं स्वात्मविषयज्ञानं ददामि । जाबालोपनिषदपि मम ज्ञानस्य सिद्धये-अविमुक्तं मम क्षेत्रं, परमशुभं मन्नाम, शतरुद्रीयम्, उत्तमः संन्यास,ः भस्मोद्धूलनं, त्रिपुण्ड्रधारणं, रुद्राक्षधारणं, शिवशब्दजपः, मम ध्यानञ्च प्रधानसाधनानि प्राह[१] । उक्तधर्मेषु यो द्विजोत्तमः नित्यं श्रद्धां कुर्यात्स संसारोच्छेदकारणं ज्ञानमचिरादेव लभते । यथाऽह जाबालश्रुतिः--

अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं य एषो अनन्तोऽव्यक्त आत्मा तं कथमहं विजानीयामिति । स होवाच याज्ञवल्क्यः सोऽविमुक्त उपास्यो य एषोनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति । सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां नाश्यां च मध्ये प्रतिष्ठित इति । का वै वरणा का च नाशीति-सर्वानिन्द्रियकृतान् दोषान्वारयतीति तेन वरणा भवति सर्वानिन्द्रियकृतान्पापान्नाशयतीति तेन नासी भवतीति । कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीति । एतद् वै सन्धिं संध्यां ब्रह्मविद उपासते इति सोऽविमुक्त उपास्य इति । सोऽविमुक्तं ज्ञानमाचष्टे यो वैतदेतदेवं वेदेति ।

अथ हैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति । स होवाच याज्ञवल्क्यः शतरुद्रियेणेत्येतान्येव ह वा अमृतनामधेयानि एतैर्ह वा अमृतो भवतीति । एवमेवैतद् याज्ञवल्क्यः ।

अथ ह जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच-भगवन् संन्यास मनुब्रूहीति । स होवाच याज्ञवल्क्यः-ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् ।"[२]

---

१. पारा० पु० १५/७१-७५ ।   २. जाबालोपनिषद् २, ३, ४ ।

तुलना—पार्थिवलिङ्गमाहात्म्यप्रस्तावे लैङ्गे—

जाबालोपनिषत्साध्वी मम ज्ञानस्य सिद्धये ।
प्रधानसाधनान्याह द्विजानामादरेण तु ।।
अविमुक्तं मम क्षेत्रं मन्नाम परमं शुभम् ।।
शतरुद्रीयजाप्यं च तथा संन्यासमुत्तमम ।।
भस्मनोद्धूलनं चैव त्रिपुण्ड्रस्य च धारणम् ।
रुद्राक्षधारणं साक्षाद् भक्त्या पार्थिवपूजनम् ।।
भस्मसंपादनं ध्यानं ममैव परमस्य च ।
एतानि साधनान्याह प्रधानानि यथा यथा ।। आ० भू० पृ० २२५

वाराणसी वैभवमुपवर्ण्यात्रैव अन्यानि तत्सदृशानि तीर्थानि पापप्रायश्चित्त-साधनानि प्राह शिवः—

पुण्डरीकपुरं (मदीयनर्तस्थानं) वा मुमुक्षुभिः समाश्रयणीयम् । अथवा कालहस्तिनामके पर्वते, सुवर्णमुखरी नद्यां स्नात्वा मदीयलिङ्गदर्शनं कृत्वा स्वर्णमन्यद् वा दत्वा सर्वपापप्रायश्चित्तं कर्त्तव्यम् । अथवा गन्धमादननामके पर्वते, सेतुबन्धे महातीर्थे, यत्र दाशरथी रामो मूर्खं रावणं निहत्य तत्पापविनिवृत्तये स्व-नाम्ना मम लिङ्गं (रामेश्वरं) स्थापयामास, स्नानदानपूर्वकं लिङ्गस्थं करुणाकरं महादेवं दृष्ट्वा प्रदक्षिणानमस्कारादिकं कृत्वा आस्तिको निखिलपापानां प्रायश्चित्तं कुर्यात् । अथवा सर्वपापापनोदनाय भक्त्या धनेन च ज्ञानिनं संपूजयेत् । ज्ञानी शिवोऽस्ति । तस्य प्रसन्नतया अहमपि प्रीतियुक्तो भवामि । यत्र ज्ञानी वसति तत्र तीर्थानि वर्तन्ते । तस्मै यः कौपीनाच्छादनादिकं ददाति स मम वल्लभोऽस्ति ।

एवं निखिलपापप्रायश्चित्तवर्णनप्रसङ्गेनात्र पराशरो मुनिः वाराणसी-स्वरूपं वर्णयन् अन्यान्यपि शैवानि तीर्थानि समाहात्म्यमुपवर्णितवान् । 'ऋते ज्ञानान्न मुक्तिः' इति श्रुतिरपि ज्ञानमेव मुक्तिसाधनमाह । तर्हि काश्यां वाराणस्यां वा मरणात् कथं मुक्तिः सिध्येत् ? अत्र मृतानां प्राणिनां तारकब्रह्मोपदेशेन शिवस्तस्मै ज्ञानमेव पूर्वं ददाति, तज्ज्ञानादेव तस्य मुक्तिरग्रे धावति इति फलितार्थः ।

प्रायश्चित्तविचारः

प्राचीना खलु एषा भारतीया प्रायश्चितविधानपरम्परा । इयं ज्ञानादज्ञानाद् वाऽचरितगर्हितकर्मजन्यानां दुरितानां निवृत्यर्थम् आत्मनश्च विशुद्धयर्थं वैदिक-कालादेव प्रचलिता समादृता च वर्तते । समाजे समानादरस्थानादिप्राप्त्यर्थं कलुष-कर्मवशाद् बहिष्कृतानां जनानां प्रायश्चित्तमेव एका सरणिः । अस्य विषयस्य निरूपणं वेदेषु,[१] पुराणेषु[२] स्मृतिषु,[३] निबन्धग्रन्थेषु[४] च विस्तरेण विद्यते । तत्र ब्रह्म-हत्या--सुरापान--सुवर्णस्तेयगुरुदाराभिगमनानां महापातकानां प्रायश्चित्तं सर्वत्र बहुशो वर्णितम् । विशेषतश्च तत्र मृत्युदण्डो विहितः । किन्त्वत्र पराशरपुराणे

१. कौशातकी० ५/९/६/१२, जैमिनि० ६/३/४,६/४/१०,६/५/४५, १२/३/१६

२. अग्नि अ० १६८, १७४, गरुड० अ० ५२, कूर्म० उ० अ० ३०–३४, वराह० अ० ३३१–१३६, ब्रह्माण्ड० उप० अ०, ९, वि० धर्म० ३/७३, ३/२३६–२३७ ।

३. मनु० अ० १०/४४–२६५, याज्ञ० ३/२०६–३३४, एवं शंखे, वृहद्यमे, शातातपे च प्रायश्चित्तसम्बन्धिनो बहवः श्लोकाः सन्ति ।

४. पारा० १३/२–९ ।

सरलोपायेन तन्निर्वाहः कृतः। एष प्रायश्चित्तपन्थाः समाजोपयोगी सामयिकः शक्तियोग्यो लोकयात्रानिर्वाहको मान्यश्चापि वर्तते शास्त्रदृष्ट्या। यथा—

'कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः।
द्वापरे शंखलिखिताः कलौ पाराशरा स्मृताः॥'

पाराशरोपपुराणे ब्रह्महत्यारूपपापस्य प्रायश्चित्तमित्थमुपवर्णितम्—

(१) अबुद्धिपूर्वकस्य कृते—

ब्रह्महा निर्जने शुद्धे नदीतीरेऽथवा वने।
कुटीं कृत्वा तृणैः शुष्कैः काष्ठैः शुष्कैरपि स्थिरम्॥
भिक्षामादाय विप्रेभ्यः कृत्वा शवशिरोध्वजम्।
अपराह्णे सकृन्मौनी भुञ्जीयादतिपापवान्॥
स्नानं त्रिषवणं कुर्याद् ब्राह्मणानर्चयेत्सदा।
गवां शुश्रूषणं कुर्यादश्वत्थमभिरक्षयेत्॥
दोषं प्रशंयन्नृणां निर्लज्जो विजितेन्द्रियः।
वने तु वर्तमानोऽयं फलमूलाशनो भवेत्॥
ब्रह्महत्याकृतं पापं द्वादशाब्देन नश्यति।
अबुद्धिपूर्वकस्येदं प्रायश्चित्तं मुनीश्वर॥

(२) बुद्धिपूर्वकस्य कृते—

भस्मशायी भवेन्नित्यं भस्मच्छन्नस्त्रिपुण्ड्रधृक्।
रुद्राध्यायी भवेद् भक्त्या मासमेकमतन्द्रितः॥
प्रणवं वा जपेन्नित्यं सदा पञ्चाक्षरं तु वा।
प्रायश्चित्तं भवेदेतद् रहस्यस्य न संशयः॥
महत्तराणामन्येषां रहस्यानां तथैव च।
कामतश्चेन्नृणां शुद्धिः पूर्वोक्तेनैव वर्त्मना॥
चरतां मरणादेव नैव मार्गान्तरेण तु।

प्रायो हि पराशरपुराणोक्तब्रह्महत्याप्रायश्चित्तमेव शङ्खस्मृतौ,[१] मनुस्मृतौ,[२] हेमाद्रौ, प्रायश्चित्तविवेकस्य तत्त्वार्थकौमुदीटीकायां च न्यूनाधिकभेदेन प्राप्यते।

१. १७/१-३, २. ११/७२

एवमेव सुरापानस्यापि यत्प्रायश्चित्तमुक्तं पाराशरोपपुराणे[१] तदेव दृश्यते आपस्तम्बे[२] गौतमे[३] मिताक्षरायाम्[४] अपरार्के[५] वशिष्ठे[६] बौधायने[७] मनौ[८] च ।

स्तेयस्य प्रायश्चित्तमपि अंशभेदेन पराशरोक्तमेव अन्यत्रापि वर्णितम् ।

पाराशरपुराणे[९] — स्तेयी प्रकीर्णकेशोऽथ आदाय मुशलं ततः ।
उक्त्वा स्वकर्म राजानं गत्वा तेन हतस्ततः ।
स्तेयदोषाद्विमुच्येत नात्र कार्या विचारणा ।।

मनुस्मृतौ[१०] — गृहीत्वा मुसलं राजा सकृद् हन्यात्तु तं स्वयम् ।
वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव तु ।।

गुरुदाराभिगमनस्य यत्प्रायश्चित्तमुक्तं पाराशरोपपुराणे[११] तदेव विकल्पेन न्यूनाधिकभेदतः मनौ[१२], वशिष्ठे[१३], आपस्तम्बे[१४] संवर्त्ते[१५] च दृश्यते । यथाह—

पाराशरपुराणे—

गुरुदाराभिगामी च तत्पापविनिवृत्तये ।
स्वयं सवृषणं शेफं ब्रह्मन्नुत्पाट्य चाञ्जलौ ।।
निधायानशनो गच्छेद् वाग्यतो दक्षिणां दिशम् ।'
(पारा० १३/१६-१७)

मनौ—

स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ ।
नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मगः ।
(मनु० ११/१०४)

एवमन्यासामगम्यानां गमने एकैकशः प्रायश्चितं प्रतिपादितं पाराशरे; तदेव शङ्खे[१६], नारदे[१७], आपस्तम्बे[१८], पाराशरे[१९], संवर्त्ते[२०], व्याघ्रे[२१], चतुर्विंशतिमते[२२], देवले[२३], गौतमे[२४] मार्कण्डेये[२५] च अल्पाधिकत्वेन वर्तते ।

---

१ सुरापी तु सुरापानमग्निवर्णं धृतं तु वा । गोमूत्रं वा मृतः पीत्वा मुच्यते पानदोषतः (पारा १३/१०), २. १/९/२५/३, ३. २३/१, ४. ३/२५२, ५. पृ० १०७१, ६. २०/२२, ७. २/१/२१, ८. ११/९०,९१, ९. १३/१४,१५, १०. ११/१००, ११. पारा० १३/१६,१७, १२. ११/१०३, १०४, १३. २०/१३,१४, १४. १/९/२५/१-२, १५. १२९, १६. स्मृति-मुक्ताफले पृ० ८८७, १७. १२/७३-७५, १८. २/१०/२७/११-१३, १९. १०/१३-१४, २०. स्मृ० मु० पृ० ८८७, २१. स्मृ० मु० पृ० ८८८, २२. स्मृ० मु०पृ० ८८८, २३. स्मृ० मु० पृ० ८८९, २४. स्मृ० मु० पृ० ८८९, २५. स्मृ० मु० पृ० ८९० ।

अतः परं पुराणेऽस्मिन् इदं लिखितं यत् सर्वपापप्रायश्चित्तार्थं चन्द्रशेखरं नीलग्रीवं साम्बं शिवं हृदयाम्भोजमध्ये ध्यायेत्, अथ च पञ्चाक्षरं मन्त्रं प्रणवेन सह जपेत्। स च मन्त्रो यथा 'ॐ नमः शिवाय' इति[1]।

भूयश्च सर्वपापानामनुत्तमं प्रायश्चित्तं ज्ञानमेव निर्दिष्टमत्र पुराणे[2]।

ज्ञानञ्चात्र श्रौतं स्मार्तञ्च। अतः पुराणमिदं श्रुतिमूलकं स्मृत्युपबृंहितञ्चास्ति। ज्ञानतुल्यं प्रायश्चित्तं श्रुतौ स्मृतौ च नापरम्। अतः सर्वैः ज्ञानमेव सदाश्रयणीयम्। तच्च शिवश्रुतिगुरुप्रसादेन पुण्यकर्मणा च सिध्यति। अतः पुराणमिदं श्रुतिमूलकं वर्तते। अपि च प्रायश्चित्तमपि यदत्र निर्दिष्टं तदपि लोककालसमाजानुकूलमेव। यद्यपि मरणान्तप्रायश्चित्तमन्यधर्मशास्त्रीयग्रन्थेषु यत्र यत्र प्रकरणे संगृहीतं तत्र तत्र अस्मिन् पुराणे तत्स्थाने अन्यदेव प्रायश्चित्तं विहितं न च विकल्पेन तदुपगृहीतम्–कलौ मरणान्तप्रायश्चित्तस्य निषेधात्।

भस्मत्रिपुण्ड्ररुद्राक्षधारणम्

पाराशरेऽस्मिन् पुराणे भस्मत्रिपुण्ड्ररुद्राक्षमहिमवर्णनं बहुत्र दरीदृश्यते। तत्र भस्मत्रिपुण्ड्रविषये पुराणेषु निबन्धग्रन्थेषु च बहवः श्लोकाः प्राप्यन्ते। स्नानं कृत्वा आचम्य मस्तके तिलकमूर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा धारयेदिति विधिः। अयं विषयो ब्रह्माण्डपुराणे[3], शिवपुराणे[4], वीरमित्रोदयस्याह्निकप्रकाशे[5], स्मृतिमुक्ताफले[6], आचारमयूखे[7], मदनपारिजाते[8], स्मृतिचन्द्रिकायां[9], नित्याचारप्रदीपे[10], विधानपारिजाते[9] च विस्तरेण प्रतिपादितः।

तत्र ऊर्ध्वपुण्ड्रं पर्वतशिखर–नदीतीर–वैष्णवस्थल–वल्मीक–तुलसीमूलस्थ-मृदा[11] कार्यम्, त्रिपुण्ड्रञ्च अग्निहोत्राग्निज–अग्निकार्योद्भव–औपासनोत्पन्न-लक्ष-होमोद्भव–महारुद्राग्निज–रुद्रस्थानोद्भवभस्मना[12] विधेयम्। यथा—

ऊर्ध्वपुण्ड्रं मृदा कुर्यात् त्रिपुण्ड्रं भस्मना तथा।
तिलकं वै द्विजः कुर्यात् चन्दनेन यदृच्छया॥

(आह्निक० पृ० २५०, मदन० पृ० २७९)

---

१. पारा० १३/३०-३४, २. अ० १४, ३. ब्रह्माण्ड० (स्मृतिचन्द्रिका-१ पृ० ११५), ४. विद्येश्वर० अ० २४, ५. पृ० २४८-२५२, ६. आह्निक० पृ० २९२-३१०, ७. पृ० ३६-३८, ८. पृ० २७९, ९. १ पृ० ११५, १०. पृ० ४२, ४३, ११. पृ० १९९-२०७ (तृतीयस्तवके), १२. विधान० ३ पृ० २०१ (ब्रह्माण्ड०), १३. विधान० ३ पृ० २०६ (स्कन्द०)।

त्रिपुण्ड्रस्य परिभाषा

भ्रुवोर्मध्यं समारभ्य यावदन्तो भवेद् भ्रुवोः ।
मध्यमानामिकाङ्गुल्योर्मध्ये तु प्रतिलोमतः ।
अङ्गुष्ठेन कृता रेखा त्रिपुण्ड्राख्याभिधीयते[१] ॥

भस्मधारणप्रदेशः

ललाटे हृदये नाभौ गलेंऽशे बाहुसन्धिषु ।
पृष्ठदेशे शिरस्येवं स्थानेष्वेतेषु धारयेत् ॥[२]

भस्मधारणमन्त्राः

अग्निरित्यादिभिर्मन्त्रैः शुद्धं भस्माभिमन्त्रितम् ।
शिवमन्त्रेण तद्धार्यं मन्त्रेणाष्टाक्षरेण वा ॥
गायत्र्या वाऽथ देवर्षे मन्त्रेण प्रणवेन[३] वा ।

कालाग्निरुद्रोपनिषदि मन्त्रा एवमुक्ताः—

यद् द्रव्यं तदाग्नेयं भस्म सद्योजातादिपञ्चब्रह्ममन्त्रैः परिगृह्य अग्निरिति भस्मेत्यादिनाऽभिमन्त्र्य मानस्तोके इति समुद्धृत्य, मानो महान्तमिति जलेन संसृज्य त्रियायुषमिति शिरोललाटवक्षःस्कन्धेषु त्रियायुषैस्त्र्यम्बकैस्त्रिशक्तिभिस्तिर्यक् तिस्रो रेखाः प्रकुर्वीत । अग्निरित्यादयो मन्त्राः—

१. 'अग्निरिति भस्म । वायुरिति भस्म । जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वं ह वा इदं भस्म[४] ।'

२. 'मा नस्तोके तनये मा न आयुषि मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनी बधीर्हविष्मन्तः सदसि त्वा हवामहे[५] ॥

३. 'त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।'

४. कश्यपस्य त्र्यायुषं जमदग्नेस्त्र्यायुषं यद्देवानां त्र्यायुषं तन्मेऽस्तु त्र्यायुषमेवं रूपैः ।

५. ॐ नमः शिवाय ।

---

१. धर्मशास्त्र का इतिहास पृ० ३७२, २. आचार० पृ० ३८ (स्मृतिरत्ना०) ।
३. आचार० पृ० ३८ (पुलस्त्यः), ४. जाबालोपनिषदि, ५. यजु० १६/१६

भस्मत्रिपुण्ड्रमहिमा—

वर्णानामाश्रमाणां च मन्त्रतोऽमन्त्रतोऽपि च ।
त्रिपुण्ड्रोद्धूलनं प्रोक्तं जाबालैरादरेण तु[1] ॥
सितेन भस्मना कुर्यात् त्रिसन्ध्यं यस्त्रिपुण्ड्रकम् ।
सर्वपापविनिर्मुक्तः शिवेन सह मोदते[2] ॥
सर्वागमेषु निष्ठानां शम्भोर्लिङ्गमनुत्तमम् ।
सितेन भस्मना कार्यं ललाटे च त्रिपुण्ड्रकम्[3] ॥
ब्राह्मणाः क्षत्रिया वैश्या शूद्राश्चापि च संकराः ।
स्त्रियोऽथ विधवा बालाः प्राप्ताः पाषण्डिनस्तथा ॥
ब्रह्मचारी गृही वन्यः संन्यासी वा व्रती तथा ।
नार्यो भस्मत्रिपुण्ड्राङ्काः मुक्ता एव न संशयः ॥
त्रिपुण्ड्रं कुरुते यस्तु भस्मना विधिपूर्वकम् ।
महापातकसङ्घातैर्मुच्यते चोपपातकैः[4] ॥

पाराशरपुराणे भस्मत्रिपुण्ड्रस्य महात्म्यं बहुशो गीयते । यथा–

श्रौतं लिङ्गं तु विज्ञेयं त्रिपुण्ड्रोद्धूलनात्मकम् ।
अश्रौतमूर्ध्वपुण्ड्रादि नैव तिर्यक् त्रिपुण्ड्रकम्[5] ॥

त्रिपुण्ड्रोद्धूलनमत्र श्रौतं लिङ्गमीरितम् । लोकानामुपकाराय उमार्धविग्रहः चन्द्रार्धकृतशेखरो महादेवः श्रौतं लिङ्गमादरेण दधाति । वेदसिद्धो विष्णुर्ब्रह्मा च श्रौतमेव त्रिपुण्ड्रं धारयतः । यस्तु तन्त्रसिद्धो महादेवः, सोऽपि तिर्यक्त्रिपुण्ड्रमेव भस्मना दधाति । अन्ये ब्रह्मविष्णुप्रभृतयो देवास्तन्त्रसिद्धाः भस्मना त्रिपुण्ड्रं न दधाति । अतो महादेवभक्तैरपि भस्मना तिर्यक्त्रिपुण्ड्रमेव धार्यं नान्यत्[6] । वेदमन्त्रेण भस्मना यः त्रिपुण्ड्रं दधाति, तस्य ब्राह्मण्यं पुष्कलं भवति । वेदवेदान्तनिष्ठानां कृते त्रिपुण्ड्रं शीघ्रम् ज्ञानप्रदमित्यत्र नास्ति सन्देहलवः । वेदमन्त्रेण त्रिपुण्ड्रधारणं महापातकसङ्घाततमसो भास्करः प्रोक्तः[7] । अथ च भस्मना

---

१. शिव० विद्येश्वर० २४/९ (अत्र जाबालैरिति पदेन 'बृहज्जाबालोपनिषद्' ग्रन्थो बोध्यः)
२. शिव० विद्ये० २४/२०, ३. स्मृतिमुक्ता०आह्निक० पृ० २९६ (कौर्म)
४. शिव० विद्ये० २४/४०, ४१, ५२, ५. पारा० अ० ४/६
६. पारा० ४/७-२१ ७. पा० ४/३२-३५ ।

वेदमन्त्रेण त्रिपुण्ड्रस्य धारणं शिवस्य विष्णोर्ब्रह्मणः पार्वत्या भारत्या लक्ष्म्याश्च तृप्तिकारणं भवति। त्रिपुण्ड्रधारणं विना देवानां मनुष्याणाञ्च मुक्तिर्न सिध्यति, तथा च वेदान्तविज्ञानमपि न जायते। भस्मना विना श्रौतःस्मार्तश्चाचारोऽनर्थ-हेतुर्भवति। सर्वेषामाश्रमाणां धर्मत्वेनोक्तं भस्मत्रिपुण्ड्ररक्षार्थं मङ्गलार्थं चापि उक्तं महर्षिभिः। किं बहुनोक्तेन-त्रिपुण्ड्रधारणं सर्वसिद्धिकरं मुक्तिमिच्छद्भिर्नरैः सदा धार्यम्[१]। यथा—

अतस्त्रिपुण्ड्रं रचयेत वैष्णवं
ब्राह्मं च शैवं मनुजः सदैव तु।
विमुक्तिकामस्तु सितेन भस्मना
श्रुतिप्रसिद्धेन हि वर्त्मना मुदा[२]॥

अथ रुद्राक्षमहिमा

रुद्राक्षस्योत्पत्तिधारणभेदादिकथा शिवपुराणे, रुद्राक्षजाबालोपनिषदि च विस्तरेण प्रतिपादिता। आह्निकप्रकाशे[३], स्मृतिमुक्ताफले (आह्निककाण्डे[४]) जपस्य प्रकरणे रुद्राक्षस्य चर्चा आयाति। तत्र कालिकापुराणस्य स्कन्दपुराणस्य च श्लोकाः संगृहीताः। तत्र कालिकापुराणे—

स्फटिकेन्द्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः।
सुवर्णमणिभिः सम्यक्प्रबालैरथवाब्जकैः[५]॥
अक्षमाला तु कर्तव्या देवीप्रीतिकरी सदा॥

स्कन्दपुराणे

उच्छिष्टो वापि कर्मस्थः संयुक्तः सर्वपातकैः।
लिप्यते न स पापेन रुद्राक्षस्य तु धारणात्।
कण्ठे रुद्राक्षमादाय यश्चापि म्रियते यदि।
सोऽपि रुद्रत्वमाप्नोति किं पुनर्मानुषादयः।[६]

रुद्राक्षोत्पत्तिविषयिणी कथा रुद्राक्षजाबालोपनिषदि विस्तरेण प्रतिपादिता यथा—

---

१. पारा० पु० ४/३६-४८ २. पारा ४/४८
३. पृ० ३२६, ४. पृ० ३४३
५. आ०प्र० पृ० ३२६ ६. स्मृ०मु०फ० पृ० ३४३

"अथ हैनं कालाग्निरुद्रं भुसुण्डिः पप्रच्छ--कथं रुद्राक्षोत्पत्तिः ? तद्धारणात् किं फलमिति ? तं होवाच भगवान् कालाग्निरुद्रः--त्रिपुरवधार्थमहं निमीलिताक्षोऽभवम् । तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षा जाताः । सर्वानुग्रहार्थाय तेषां नामोच्चारमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलमत ऊर्ध्वं वक्तुं न शक्नोमि । तत्रैते श्लोका भवन्ति ।" इत्यादयः ।

शिवपुराणेऽपि तादृशी एवापरा कथा रुद्राक्षोत्पत्तेरुक्ता । तत्र रुद्राक्षधारणस्य महामहिमा उद्घाटितः । तस्य विविधानि प्रमाणानि अपि कथितानि यथा—

धात्रीफलप्रमाणं यच्छ्रेष्ठमेतदुदाहृतम् ।
बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः ।
अधमं चणमात्रं स्यात्प्रक्रियैषा परोच्यते[1] ॥

तथा चापरा प्रक्रिया—

बदरीफलमात्रं च यत्स्यात्किल महेश्वरि ।
तथापि फलदं लोके सुखसौभाग्यवर्धनम् ।
धात्रीफलसमं यत्स्यात्सर्वारिष्टविनाशनम् ।
गुञ्जया सदृशं यत्स्यात्सर्वार्थफलसाधनम् ।
यथा यथा लघुः स्यात्तु तथाधिकफलप्रदः[2] ॥

एवमेव तत्र रुद्राक्षस्य विविधा भेदा अपि वर्णिताः । तेषां फलान्यपि दर्शितानि । यथा—

एकवक्त्रः शिवः साक्षात् भुक्तिमुक्तिफलप्रदः ।
तस्य दर्शनमात्रेण ब्रह्महत्यां व्यपोहति ॥
यत्र सम्पूजितस्तत्र लक्ष्मीः दूरतरा नहि ।
नश्यन्त्युपद्रवाः सर्वे सर्वकामा भवन्ति हि[3] ॥

एवं रुद्राक्षस्य चतुर्दश भेदास्तत्र कथिताः—एकमुखतो चतुर्दशमुखपर्यन्ता रुद्राक्षा भवन्ति। एकैकस्य पृथक् पृथक् फलमपि तत्रोक्तम्। धारणमन्त्रा अपि तेषामुक्ताः—

१– ॐ ह्रीं नमः, २– ॐ नमः, ३– ॐ क्लीं नमः, ४– ॐ ह्रीं नमः, ५– ॐ ह्रीं नमः, ६– ॐ ह्रीं हुं नमः, ७– ॐ हुं नमः, ८– ॐ हुं नमः, ९– ॐ ह्रीं हुं नमः, १०– ॐ ह्रीं नमः, ११– ॐ ह्रीं हुं नमः, १२– ॐ क्रौं क्षौं रौं नमः, १३– ॐ ह्रीं नमः, १४– ॐ नमः ।

---

१. रुद्राक्षजा० ६, ७, शिव०पु०वि०सं० २५/१४, १५ ।
२. शिव० विद्ये० २५/१६-१८।
३. शिव० वि० २५/६४-६५ ।

पाराशरोपपुराणे रुद्राक्षधारणमाहात्म्यं षड्भिः श्लोकैः वर्णितम्[१]। येषामयमाशयः—

त्रिपुण्ड्रभस्मसहितं रुद्राक्षधारणं सर्वैः श्रेयोऽर्थिभिर्नृभिः आदरात् कर्णपाशे शिखायां कण्ठे हस्तेषु च कार्यम्। महादेवविष्णुब्रह्मादयो देवा अपि रुद्राक्षधारिणः सन्ति। वेदसिद्धे मुक्तिदे रुद्राक्षे पापिष्ठानां रतिर्न जायते। कूटस्था महान्तो गोत्र-प्रवर्तका ऋषयोऽपि वेदोक्तमार्गेण रुद्राक्षधारिणः, तेषां वंशप्रसूता मुनयोऽपि श्रौतधर्मपरा रुद्राक्षधारिणः सन्ति। अनेकजन्मनामन्ते महादेवप्रसादात् निसर्गतो रुद्राक्षधारणे श्रद्धा संजायते।

पराशरपुराणे भस्मत्रिपुण्ड्ररुद्राक्षमहिमानमुपवर्णयता पराशरेण भस्मना त्रिपुण्ड्रस्य रुद्राक्षस्य च वैदिकत्वं प्रतिपादितम्। वेदोतरो मार्गः (तन्त्रमार्गः) अत्र गर्हितः। यथा—

यथा माता स्वपुत्राणां केवलं कृपयैव तु।
रक्षिता तद्वदेवेयं श्रुतिः सर्वजनस्य तु॥
यथा शत्रुजनः साक्षाद् बाधकः सर्वदेहिनाम्।
तथा वेदेतरो मार्गो वैदिकस्य तु बाधकः॥

(पारा० ६/२७, २८)

आह्निककृत्यविचारः।

पाराशरोपुराणस्य नवमेऽध्याये आह्निककृत्यानां सम्यक् विचारः कृतः। अस्मिन् विषये अन्यत्र पुराणेषु धर्मशास्त्रादिग्रन्थेषु विस्तरेण विचारः कृतः। सर्वेषां गृहस्थानां कृते नित्यकृत्यानां सम्पादनं श्रेयस्करं भवति इत्यस्माकं धर्मव्यवस्था। तदनुकूलमाचरणेन मानवता विकसति। अन्तर्ज्ञानञ्च दृढीभवति। नित्यकर्माणि ज्ञानार्थं सम्पादनीयानि। वेदादन्यत्र विज्ञानं नास्ति। अथ च शुभा क्रियाऽपि ततोऽन्यत्र नास्ति[२]। अतो वेदाः, मन्वादीनि धर्मशास्त्राणि, पुराणेतिहासम्, पाणिनीय-न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्तादीनि वेदमूलकतया ग्राह्यानि। तत्र तत्र श्रुतिविरुद्धोंऽशः सर्वथा त्याज्यः[३], अर्थात् धर्मशास्त्रपुराणोपवर्णितानां नित्यकर्मणां सम्पादनं वेदसम्मतमस्ति।

प्रातःकृत्यम्

ब्राह्मे मुहूर्त्ते उत्थाय साम्बं शिवं ध्यात्वा समाहितो भूत्वा धर्ममर्थं च

---

१. पारा० ६/१७-२२

२. ज्ञानार्थंनित्यकर्माणि प्रकुर्याद् ब्राह्मणोत्तमः।
वेदादन्यत्र विज्ञानं नास्ति-नास्ति क्रिया शुभा॥ (पारा० ८/२३)

३. पारा० ८/२८-३०

चिन्तयेत्[१]। कूर्मपुराणमुद्धृत्य स्मृतिचन्द्रिकायां भगवतः स्मरणमुल्लिखितम्[२]। आह्निकप्रकाशे[३] प्रातरुत्थाय पठनीयाः वामनपुराणस्य पञ्चश्लोका उद्धृताः।

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम्[४]॥

इत्यादयः। अन्यत्र महाभारतस्य स्वर्गारोहणपर्वणः 'भारतसावित्री' नाम्ना विख्यातास्चत्वारः श्लोकाः प्रातः पठनीयत्वेन समुद्धृताः[५]। एषां पाठेन महाभारतश्रवणस्य फलं भवति। आह्निकतत्त्वे महाभारतस्य एकः श्लोकः उद्धृतः, यस्य पाठेन कलिप्रभावान्मुक्तिर्भवति[६]। 'आचाररत्ने' केषांचित् चिरञ्जीविनां नामानि उद्धृतानि, यथा–अश्वत्थामा बलिर्व्यासो हनुमान् विभीषणः कृपः परशुरामो मार्कण्डेयश्च। अद्यापि एषां नामानि आस्तिकैः प्रातरुत्थाय गृह्यन्ते।

अनन्तरं कालेन विण्मूत्रं त्यक्त्वा वारिणा प्रक्षाल्य गण्डूषैरम्भसा च मुखं प्रक्षालयेत्। ततः प्राङ्मुख उदङ्मुखो वा भूत्वा मध्यमाङ्गुलिसदृशस्थूलेन द्वादशाङ्गुलपरिमितदीर्घेण त्वक्सहितेनार्द्रेण मालतीकरवीरापामार्गबिल्वजानां क्षीरिणां काष्ठेन दन्तधावनं काष्ठान्तरेण च जिह्वाशुद्धिं कुर्यात्। ततो महानदीषु तडागे वा आचम्य प्रयतः स्नायात्। एतद् वारुणनामकं स्नानम्। जलस्नानाशक्तौ आर्द्रवाससा उत्तमाङ्गादिपादान्तं मार्जनं विधेयम्। एतद् ब्राह्मनामकं स्नानम्। एतदभावे अग्निमूर्धेत्यादि जाबालोक्तसप्तमन्त्रैः त्रिपुण्ड्रधारणपूर्वकं भस्मना स्नायात्। इदञ्चाग्नेयं स्नानम्। गवाङ्घ्रिरजसा वायव्यनामकं स्नानं कुर्यात्। अथवा सातपेन वर्षेण दिव्यनामकं स्नानं कार्यम्। उताहो आत्मविद्यारूपेण जलेन मानसं स्नानं विधेयम्। मानसस्नानात्परं नान्यत् किमपि स्नानम्। तस्मात्स्ना-

---

१. पारा० ९/१, २, २. स्मृति० (१ पृ० २८), ३. पृ० १६, ४. वामन० १४/२३,

५. नित्याचार० पृ० १५, १६, आह्निक० पृ० १६,
भारतसावित्री-श्लोकानां प्रथमपादाः—
१—मातापितृसहस्राणि।
२—हर्षस्थानसहस्राणि।
३—ऊर्ध्वबाहुर्विरौम्येष।
४—न जातुकामान्न भयान्न लोभात्। महा० स्वर्ग० १/६०-६३

६. अह्निक० पृ० ३२७, श्लोकः—
कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम्॥
—महा० वन० ७९/१०

नादात्यन्तिकी शुद्धिर्भवति[१]। अत्र वारुणब्राह्माग्नेयवायव्यदिव्यमानसभेदात् षड्-विधं स्नानं वर्णितम्। आचारमयूखे[२] गौणस्नानप्रकरणे-आग्नेयवारुणबाह्य-वायव्यदिव्यानि स्नानानि निरूपितानि। आर्द्रवाससा अङ्गमार्जनमत्र कापिलं स्नान-मुक्तम्। यथा—

'आर्द्रेण वाससा चाङ्गमार्जनं कापिलं स्मृतम्'।

आचारभूषणे[३]—अशक्तौ मन्त्रस्नानमपि विहितम्।

यथाह वृद्धमनुः—

असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया।
मन्त्रस्नानादिकं प्रोक्तं मुनिभिः शौनकादिभिः॥

मन्त्रस्नानम्-आपो हिष्ठादिभिर्मन्त्रैः करणीयम्। आदिपदेनान्यान्यपि आग्ने-यादिस्नानानि ज्ञेयानि। सारस्वतं गायत्रश्चोभयमपि स्नानमत्रोपर्णितम्। यथा—

'विद्वत्सरस्वतीप्राप्तं स्नानं सारस्वतं विदुः।
विद्वत्सरस्वतीशुद्धोऽसीत्यादिवचः ।'
'गायत्र्या जलमादाय दशकृत्वोऽभिमन्त्र्य च।
शिरश्चाङ्गानि सर्वाणि प्रोक्षयेत्तेन वारिणा।
स्नानं गायत्रकं नाम सर्वपापप्रणाशनम्॥'

प्रातः स्नातुमशक्तः पूर्ववस्त्रं परित्यज्य गौणस्नानेन शुध्यति[४]।

एवं स्नात्वा देवर्षिपितृतर्पणं विधाय पुनराचम्य गायत्र्या सूर्यायार्घ्यं दत्वा प्रदक्षिणां कुर्यात्[५]। ततो नदीतीरे शुद्धदेशे वा दर्भासने उपविश्य सन्ध्यामभिध्या-येत्। सन्ध्यावन्दनहीनः पुरुषः श्रौतस्मार्तसदाचारे नाधिकारी भवति। सन्ध्या-वन्दनमाश्रित्यैव बहवो मुक्ता जाताः। ततोऽष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिकं वा गायत्रीमादराज्जपेत्। अर्धोदयवेलायां प्राणायामपूर्वकं स्वसूत्रोक्तेन मन्त्रेण श्रौतैः सूक्तैः स्मार्तैः स्तोत्रैः सूर्यमुपस्थाय शिरसा प्रणतिं कुर्यात्[६]। ततः स्वसूत्रेण पावके समिदाधानं (होमं) कुर्यात्। यथाऽह दक्षः—

सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते[७]।

ततो मेधावीत्यादिमन्त्रेण तत्सिद्धभस्मना त्रिपुण्ड्रधारणं वेदोक्तवर्त्मना पत्रपुष्पादिभिर्नित्यं शिवलिङ्गार्चनं तच्छेषत्वेनान्यान् देवांश्च प्रपूजयेत्[८]। ततो गुरु-पूजनपूर्वकम् वेदाध्ययनं करणीयम्। अध्ययनवदध्यापनमपि करणीयम्। धर्मशास्त्रं पुराणं वेदाङ्गमपि चिन्तनीयानि, न्यायेन तेषामर्थोऽपि साधनीयः, अतिथयो ब्राह्म-

---

१. पारा० अ० ९ श्लो० २-२०, २. पृ० ३५, ३. पृ० १५६, ४. आचारमयूखे पृ० ३६। ५. पारा० ९/२१-२६, ६. पारा० ९/२७-३७, ७. दक्ष० २/२०, ८. पारा० ९/३८-४२।

णाश्च प्रसन्नमनसा सत्कार्याः[१]। स्वसूत्रोक्तविधानेन एवमेव मध्याह्नकृत्यान्यपि सायंकृत्यानि च सम्पादनीयानि।

नित्यकर्मानुष्ठानफलम्—

प्रत्यहं नित्यकर्मानुष्ठानेन दुरितक्षयो भवति चित्तशुद्धिश्च जायते। चित्तशुद्ध्या संसाराद् विरक्तिरुत्पद्यते। विरक्तिश्च द्विधा भवति। एका तीव्रा अपरा च तीव्रतरा। तत्राद्यायां जायमानायां योगी कुटीचक नाम्नि संन्याससम्प्रदाये न्यसेत् शक्तौ च बहूदके। तीव्रतरायां विरक्तौ विज्ञानसाधने हंस नाम्नि संन्याससम्प्रदाये संन्यसेत्, अथ च मुमुक्षुणा परमहंससंज्ञके सन्याससम्प्रदाये संन्यासः कार्यः[२]। महाभारतेऽपि—

चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ।
हंसः परमहंसश्च यो यः पश्चात्स उत्तमः[३]॥

'तत्र कुटीचको नाम स्वगृहे वर्तमानः शुचिरकलुष आहिताग्निषु भिक्षां भुञ्जानो व्यपगतकामक्रोधलोभमोहाहङ्कार आत्मानुग्रहं कुरुते[४]।'

'बहूदको नाम त्रिदण्डकमण्डलुपद्मपवित्रपात्रकाषायवस्त्रधारी वेदान्तार्थवबोधकः साधुवृत्तेषु भैक्ष्यचर्यां चरन् आत्मानं मोक्षयते[५]।'

'हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैव च।
कन्थां कौपीनमाच्छाद्यमङ्गवस्त्रं बहिः परम्।
एकं तु वैणवं दण्डं धारयेन्नित्यमादरात्[६]।'

परमहंसः—

कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम्।
अक्षमालां च गृह्णीयात् वैणवं दण्डमव्रणम्॥
माधूकरमथैकान्नं परहंसः समाचरेत्[७]॥

तत्र परमहंसः मोक्षैकसाधनं ब्रह्मविज्ञानं वेदान्तश्रवणादिना अभ्यसेत्। ब्रह्मविज्ञानलाभाय परमहंसाख्य एव संन्यासः[८]। कर्मणा विना विज्ञानं न सिध्यति। पापापनोदनार्थं नैमित्तिकमपि कर्म सम्पादनीयम्[९]। नित्यनैमित्तिककर्मभ्यां श्रेष्ठं नापरं कर्म। तस्मात्तत्सम्पादनं ज्ञानार्थिभिः सदा करणीयम्[१०]।

नित्यनैमित्तिकर्मानुष्ठानविधिरत्र संक्षेपेण प्रतिपादितः पराशरपुराणोक्तः। एतद्विषयको विस्तारो विविधेषु धर्मशास्त्रनिबन्धेषु द्रष्टव्यः।

---

१. परा० ९/४३–५२, २. परा० ९/७९–८२, ३. अनु० प० १४१/८९,
४. प्रजापतिः (परा० मा० पृ० १६१), ५. वृद्धपराशरः (परा० मा० पृ० १६१)।
६. स्कन्दपुराणे (परा० मा० पृ० १६१), ७. स्कन्दपुराणे (परा० मा० पृ० १६१),
८. परा० ९/८३–८४, ९. परा० ९/९५, १०. परा० ९/९७–९८।

अभक्ष्यविवेचनम् —

किं भक्ष्यं, किमभक्ष्यं, कस्य भक्ष्यं, कस्य च न भक्ष्यमिति विषये धर्मशास्त्रे पुराणे च विस्तृतरूपेण विधिनिषेधा उपवर्णिताः। अस्मिन् विषये सामान्य चर्चा तु सर्वत्रास्ति, किन्तु विशेषरूपेणायं विषयो गौतमे,[१] आपस्तम्बधर्मसूत्रे,[२] वशिष्ठधर्मसूत्रे,[३] मनुस्मृतौ,[४] याज्ञवल्क्यस्मृतौ[५] च प्राप्यते। महाभारतस्य शान्तिपर्वणि[६] कूर्मपुराणे,[७] पद्मपुराणे,[८] स्मृतिचन्द्रिकायां,[९] गृहस्थरत्नाकरे,[१०] मदनपारिजाते,[११] स्मृतिमुक्ताफले,[१२] आह्निक[१३] प्रकाशेऽपि विषयोऽयं विस्तरेण चर्चितः।

पाराशरपुराणे द्वादशेऽध्याये समासेन अभक्ष्यान्नमुपवर्णितम्। तद्यथा–

अन्नदोषात् चित्तस्य कालुष्यं जायते। कलुषितचित्तानां जनानां धर्मो न सम्यग् भासते। अधर्म एव धर्मतया विभाति। स्वयं प्रकाशमानं ब्रह्मापि न भासते, नापि कदाचिद् ब्रह्मविद्यानुराग एव जायते। अन्नदोषादेव भगवद्भक्तौ, यज्ञदानतपःकर्मसु च श्रद्धा न जायते। अतो निषिद्धमन्नं सर्वथा परिवर्जनीयम्।

निषिद्धमन्नं यथा–

अनुपनीत-यति- यतिप्रेरित-नेत्रहीन- पतित-वेदविहीन- वेदबाह्यावलम्बि-वेददूषक-दैवत-श्रौतस्मार्तसदाचारविमुख -कृतघ्न- महारोगाक्रान्त- परदारलम्पट-पिशुन-कन्याविक्रयि- यतिनिन्दक-पापप्रसक्त-श्रद्धाविहीनभार्या- श्वशुर-दरिद्र-मूक-निर्मयाद-मूर्ख-प्रजारक्षाविमुखनृपति-पुरोहित-शान्तिरहित-वैश्य - मरणाशौचाक्रान्ता-भिशप्त-पाषण्डि-शूद्र- तक्ष-विट-नर्तक- कर्षि-गण-गणिका-शस्त्रोपजीवि- ध्वजि-रजक-गन्धर्वायस्कार-सूतकि-याज्येतरयाजक-रक्षाविहीनबाल- तैलकार-चित्रकार-चिकित्सक-पौनर्भव-मूढ-वार्धुषिक-स्वर्णकार- किरातदूतिक-देवतानिन्दकानामन्नं निषिद्धं, तन्न भक्षणीयम्। भक्षणे कृते सति प्रायश्चित्तं विधेयम्।

सोमसुरामांसविक्रयिणां शिवद्रोहियतिनिन्दकदेवभस्मत्रिपुण्ड्रदूषक-भ्रातृदूषक-दिव्यायुधदग्धानामन्नभक्षणे सद्यः पतितो भवति मानवः। अतस्तत्त्याज्यम्। आपत्तावपि द्विजैर्दास-गोपाल-कुधनि-कुंभकाराणामन्नं न भोक्तव्यम्। सति भक्षणे प्रायश्चित्तं विधेयम्।

पिण्याक (तिलखलिः)-सक्तु-तैल-गव्यतक्रादीनि वस्तूनि शूद्रादेव संग्राह्याणि न द्विजेभ्यः। वृन्ताक-गृञ्जन-लशुन- ग्रामकुक्कुटानां भक्षणं ब्राह्मणैर्न

---

१. १७, २. १/५/१६/१७-१/६/१९, ३. १४, ४. ६/२०७-२२३, ५. १/१६७-१८१
६. अ० ३६, ७३, ७. उत्तर० अ० १७, ८. आदि० अ० ५६, ९. २, पृ० ४१८-४२९
१०. पृ० ३३४-३९५, ११. पृ० ३३७-३४३, १२. आह्निक० पृ० ४३३-४५१,
१३. पृ० ४८८-५५०।

कर्तव्यम् । व्रतिभिश्च औदुम्बरालाबुगुम्फलकिंशुकादीनि न भक्ष्याणि । केशकीटादिदुष्टं श्वकाकादिदूषितं भस्मसंस्कृतञ्चान्नं न भक्षणीयम् । रजस्वलाचाण्डालप्रमुखैरपवित्रैर्जनैर्दृष्टमन्नं, पर्युषितं, विवत्सायाः गोः क्षीरं, सन्धिनीक्षीरमौष्ट्रमाविकञ्च क्षीरं ब्राह्मणैर्न भोक्तव्यम् । रोगिणां कृते त्वभक्ष्यमपि भक्ष्यं भवति सुरां विहाय ।

भक्ष्यस्य भक्षणेन चित्तशुद्धिर्जायते, पारमेश्वरज्ञानं भवति । अतो यत्नतोऽभक्ष्यमन्नं त्यक्त्वा भक्ष्यस्यैवान्नस्य भक्षणं श्रेयोर्थिभिः सदा करणीयम् ।

अपरार्केण[१] भविष्यपुराणोद्धृतवचनैर्वर्जितान्नविषये विस्तृत उल्लेखः कृतः । तदनुसारेण स्वभाव-काल-सम्पर्क-क्रिया-भाव-परिग्रहदोषैर्भोजनं दूषितं भवति । यथा-लशुनपलाण्डुप्रभृतीनि स्वभावतो दुष्टानि, पर्युषितं, ग्रहणादिपक्वंम, सद्यःप्रसूतायाः गोःक्षीरं[२] च कालतो दुष्टानि, श्व-मद्य-लशुन-कीटादिसंपृक्तानि संसर्गतो दूषितानि, रिक्तहस्तपरिवेशित- पतितचाण्डालादिदृष्टपंक्तिदूषितानि क्रियादुष्टानि, पतितव्यभिचारिप्रभृतीनामन्नानि परिग्रहदूषितानि च भवन्ति । इक्षुरसेन मद्यनिर्माणं भवतीति ज्ञात्वा तस्य पानं भावदुष्टं भवति । किन्तु गौतममते[३] भावदुष्टमन्नमनादरेण प्रदत्तमेवास्ति । अपरार्कोद्धृतवचनं यथा भविष्यपुराणे—

जातिदुष्टं क्रियादुष्टं कालाश्रयविदूषितम् ।
संसर्गाश्रयदुष्टं च सहृल्लेखं स्वभावतः[४] ॥

तुलना-वृद्धहारीतवचनेन, यथा–

भावदुष्टं क्रियादुष्टं कालदुष्टं तथैव च ।
संसर्गदुष्टं च तथा वर्जयेद्यज्ञकर्मणि[५] ।

अपरार्के—अन्नस्य च निन्दितत्वं स्वभाव-काल-सम्पर्क- क्रिया-भाव-परिग्रहैः षोढा भवति[६] ।

आपस्तम्बधर्मसूत्रे[७] माषस्य श्राद्धे निषेधः । महाभाष्येऽपि[८] विशिष्टावसरेषु माषस्य निषेध उद्घोषितः । ब्रह्मपुराणे, गृहस्थरत्नाकरे[९], आह्निकप्रकाशे[१०] च कोद्रव-चणक-माष-मसूर-कुलत्थोद्दालकानां यज्ञेषु निषेध उल्लिखितः ।

एवमेव गौतमे (१७/१४), आपस्तम्बे (१/५/१७/१७-१९), मनौ (१४/२८,२९ एवं ३७, ३८), याज्ञवल्क्ये (१/१६७) च पर्युषितपक्वपदार्थानां निषेधः कृतः ।

---

१. अपरार्क पृ० २४१, २. दशदिनपर्यन्तम्, ३. १७/१०, ४. अपरार्के पृ० २४१
५. वृद्धहारीतः ११/१२२-१२३, ६. अपरार्के पृ० ११५७ । ७. २/८/१८/२,
८. जि० १ पृ० १२७, ९. गृ० रत्ना० पृ० ३५९, १०. पृ० ३९४ ।

शिवपूजाविधिः

पराशरपुराणमते सच्चिदानन्दरूपस्य परमात्मनः शिवस्य परा पूजा केवलं ज्ञानमेव। सा च नास्तिकस्य कृते नास्ति, आस्तिकस्यापि रुद्रप्रसादादेव सिध्यति। योगिन इमामेव पूजां सदा कुर्वते। पूजेयमावाहनविसर्जन-कर्तृ-क्रिया-फलरहिता योगिनामात्मसंवेद्या विश्वविश्रान्तिरूपिणी चास्ति। प्रमाता प्रमाणं प्रमेयं प्रमितिरित्येतच्चतुष्टयं परं चैतन्यमेवास्ति, अथ च एतच्चराचरं देवदेवस्य भगवतो विग्रहभूतमिति, ज्ञानमेवास्याः पूजायाः स्वरूपम्[१]।

ये च योगिनो न सन्ति, तेषां सामान्यजनानां कृते लिङ्गे शिवार्चनं विहितमत्र। लिङ्गार्चनं मुक्तिं, शुद्धज्ञानं, ब्रह्मविष्णवादिपदप्राप्तिमणिमाद्यष्टसिद्धिं, सार्वभौमत्वं, पुरुषार्थचतुष्टयं च ददाति[२]।

शिलामयं रौद्रम् लिङ्गं समभ्यर्च्य विष्णुः परमं पदं प्राप्तवान्, लक्ष्मीश्च विष्णुवल्लभा जाता। सर्वजगत्कर्ता ब्रह्मा लिङ्गार्चनेनैव भारतीं प्राप्तवान्। लिङ्गार्चनेनैव शची देवी अन्याश्च स्त्रियो भर्तुर्वल्लभा अभूवन्। लिङ्गे शिवपूजा एककालं द्विकालं त्रिकालं वा करणीया[३]।

तत्रावाहनासनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतभूषणगन्धपुष्पधूपदीपमाल्यानुलेपननमस्कारविसर्जनादिकं सर्वं समाचरणीयं श्रद्धया। एतत्सर्वं प्रणवेन, पञ्चाक्षरेण त्रियम्बकेन, अन्यैरपि श्रौतैर्मन्त्रैर्वा अभीष्टार्थसिद्धये प्रतिदिनं कर्तव्यम्[४]।

पर्वतवननदीतीरादिषु मनुष्यमुनिगन्धर्वादिभिः प्रतिष्ठितानि लिङ्गानि प्रणतिपूर्वकं प्रदक्षिणात्रयेण पूजनीयानि। सापि महती पूजा। अग्निहोत्रादिमध्ये, सूर्यसोमयोर्मण्डले, हृदये, ब्रह्मरन्ध्रे वा ईश्वरमर्चयेदित्यपि विधिः[५]।

भवानीसहितस्य रुद्रस्य लिङ्गे ध्यानं, वाराणस्यां, व्याघ्रपुरे, कालहस्तिगिरौ निवासः, शिवशङ्करुद्रादिनामानि त्रिनेत्रा साम्बमूर्तिश्च साक्षात् परमात्मन एवेति ज्ञानम्, एकस्य देवदेवस्य ब्रह्मविष्णुमहेश्वरा अंशाः, अमी जीवा अपि तस्यैवांशभूता अत उपास्या इति ज्ञानं महतस्तपसः फलमस्ति। अतो यथाधिकारं विप्रादिभिः ज्ञानक्रियाभ्यां शङ्करः पूज्यः[६]।

लिङ्गपूजाया विषये शिवपुराणे[७], लिङ्गपुराणे[८] अन्येषु च शैवपुराणोपपुराणेषु विस्तारेण वर्णितम्। तत्र सूक्ष्मं लिङ्गं प्रणवरूपं स्थूलं च पञ्चाक्षररूपमुक्तम्। अन्यानि स्वयम्भू-बिन्दु-प्रतिष्ठित-चरगुरुलिङ्गानि भवन्ति। एतेषां

---

१. पारा० अ० १६/२-९ परा. अ. १६/२-९। २. परा० अ० १६, १०-१४ ३. तत्रैव १५-२१ ४. तत्रैव २२-२८ ५. तत्रैव २९-३४ ६. तवेव ३५-४३, ७. विद्ये अ० १८/२०, ८. पू० अ० २७।

विस्तृतं वर्णनं तत्र तत्र द्रष्टव्यम् । पार्थिवलिङ्गपूजनमाहात्म्यादिकमपि शिवपुराणे यथावत्प्रपञ्चितम् । कलियुगे पार्थिवलिङ्गस्याधिकं महत्त्वमुररीकृतम् ।

यथा—

कृते रत्नमयं लिङ्गं त्रेतायां हेमसंभवम् ।
द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे ।।

(शिव० वि० १९/१७)

देवेषु महेश्वरः, नदीषु गङ्गा, वर्णेषु ब्राह्मणः, पुरीषु काशी, व्रतेषु शिवरात्रिव्रतं, देवीषु शैवीशक्तिः यथा श्रेष्ठा तथा लिङ्गेषु पार्थिवं लिङ्गं श्रेष्ठम्[१] । वैदिकः पार्थिवलिङ्गपूजनप्रकारो विस्तृतः संक्षिप्तश्चात्र समुपवर्णितः । तत्र संक्षिप्तो विधिरित्थम्[२] —

सद्योजातेति मन्त्रेण मृदाहरणं, वामदेवाय इति मन्त्रेण जलप्रक्षेपः, अघोरेतिमन्त्रेण लिङ्गनिर्माणं, तत्पुरुषायेति मन्त्रेणावाहनमीशानेतिमन्त्रेण वेदिकायां संस्थापनं च कृत्वा संक्षेपतः पञ्चाक्षरेण मन्त्रेण षोडशोपचारपूजां विदध्यात् ।

अथवा—

'भवाय भवनाशाय महादेवाय धीमहि ।
उग्राय उग्रनाशाय शर्वाय शशिमौलिने[३] ।।'

इति मन्त्रेण सुभक्त्या शिवं पूजयेत् । यतो हि शिवो भक्त्या एव फलदः ।

सर्वजनसुलभोऽन्योऽपि पूजाविधिर्लिङ्गस्यात्र वर्णितः, स चेत्थम्[४]—

'ह्रीं हराय नमः' इति मन्त्रेण मृदाहरणम्, 'ओं महेश्वराय नमः' इति मन्त्रेण लिङ्गनिर्माणम्, 'ओं शम्भवे नमः' इति मन्त्रेण लिङ्गप्रतिष्ठा, 'ओं शूलपाणये नमः' इत्यनेनावाहनम्, 'ओं पिनाकिने नमः' इत्यनेन स्नानम्, 'ओं शिवाय नमः' इत्यनेन पूजनम् 'ओं पशुपतये नमः' इत्यनेन क्षमा-प्रार्थनम्, 'ओं महादेवाय नमः' इति मन्त्रेण विसर्जनं कुर्यात् । अत्र पूजनान्ते ध्यानं, पञ्चाक्षरमन्त्रजपः स्तुतिपाठः, क्षमापनं, साष्टाङ्गप्रणतिः, गलरवश्चापि कर्माणि विधेयानि । तत्र ध्यानमन्त्रो यथा —

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्[५] ।

---

१. शिव० वि० २०/९–१५, २. शिव० वि० २०/३९–४२, ३. शिव० वि० २०/४३,
४. शिव० वि० २०/४६–५२, ५. शिव० वि० २०/५२ ।

शास्त्रविमर्शः—

शास्त्रं हि शासनात् शंशनाद् वा भवति। तत्र शासनं द्विविधं प्रोक्तम्– १—विधिमुखेन २—निषेधमुखेन। शंसनं तु भूतवस्तुविषयकं भवति। उक्त शास्त्रस्याधिकारी अज्ञ एव न तु प्राज्ञः[१]। तद्धि शास्त्रमापाततो बहुमुखं भाति, न्यायत एकमुखं विभाति। न्यायश्च शास्त्रनिर्णायकोऽस्ति, तन्न्यायकलापानां स्फुरणं शिवाज्ञया सूत्ररूपेण जातम्[२]। **तत्र सूत्रस्य लक्षणम्—**

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः[३]॥

तेषां सूत्राणामर्थं शङ्करस्य प्रसादान्मुनयो मनुष्याश्च भाष्यरूपेण व्याख्यानरूपेण, वार्तिकरूपेण, प्रकरणरूपेण च प्रकटयन्ति—

भाष्यलक्षणम्—

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः[४]॥

व्याख्यानलक्षणम्—

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्[५]॥

वार्तिकलक्षणम्—

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः[६]॥

प्रकरणलक्षणम्—

शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम शास्त्रभेदविचक्षणाः[७]॥

एतत्सूत्रभाष्यादिरूपं शास्त्रं साक्षाद् वेदनसाधनमस्ति। अतः स्वात्मस्वरूपप्रतिपत्तये स्वगुरोः तच्छ्रोतव्यम्। यतो हि आत्मलाभात्परं नास्ति किञ्चित्। आत्मलाभस्तु आत्मज्ञानोत्पत्तिरेव[८]।

मुक्तिस्वरूपम्

भारतीयचिन्तनधारायां मोक्ष एव परमपुरुषार्थः कथितः। अन्ये च धर्मार्थकामास्त्रयः पुरुषार्थास्तस्य साधनभूताः, मोक्षस्तेषां साध्यः। मोक्षस्यापरपर्यायो मुक्तिरिति। अत्र पुराणे मुक्तिस्वरूपं वर्णयन्नाह पराशरः—

१. पाप० १८/२–५, २. पारा० ११–१२, ३. तत्रैव १३, ४. तत्रैव १५, ५. तत्रैव १७, ६. तत्रैव १९, ७. तत्रैव २१, ८. तत्रैव २२, २३, २७।

स्वस्वरूपस्य लाभेन स्वात्मानन्दो महत्तमः ।
अपरोक्षतया भाति सा परा मुक्तिरात्मनः[१] ॥

अथ च— स्वभावादेव यः साक्षी स एव परमः शिवः ।
तदैक्यं हि परा मुक्तिर्जीवसंज्ञस्य देहिनः[२] ॥

अन्यत्रापि — विश्वमायानिवृत्तिस्तु मुक्तिः परतरा मता[३] ।

एतेषामयमाशयो यत् आत्मा समस्तं जगद् व्याप्य संतिष्ठते, तस्मात्केवलमात्मैव भावो नापरः । स्वस्वरूपलाभेन महानात्मानन्दो जायते, सैव परा मुक्तिरिति ।

अथ च यथा बिम्बभूतो भानुः प्रतिबिम्बात् श्रेष्ठस्तदपेक्षया विशिष्टोऽस्ति, तथैव ईश्वरोऽपि जीवेभ्यः श्रेष्ठो विशिष्टश्च, साक्षित्वात् स्वभावत्वाच्च । तद्यथा– आत्मनः साक्षित्वं जीवापेक्षया यद् वर्तते, तत् साक्ष्यभावेऽपगच्छति, किन्तु तत्र यन्नैसर्गिकं साक्षित्वं तत्तु कदापि न गच्छति । एवं सूर्यस्य भासकत्वं सूर्ये वर्तते, तद् भास्यापेक्षया वर्तते, तत्तु भास्याभावेऽपगच्छति, किन्तु नैसर्गिकं यद् भासकत्वं सूर्ये वर्तते तत्तु कदापि न गच्छति । अतः आत्मनः स्वाभाविकं साक्षित्वं सार्वकालिकं, व्यावहारिकं तु साक्ष्यापेक्षया वर्तते । स्वाभाविकं साक्षित्वं साक्ष्याभावे व्यपदेश्यं विनैव केवलं स्वरूपेण तिष्ठति । एवं स्वाभाविकं भासकत्वं भास्याभावे व्यपदेश्यं विना सूर्यस्य स्वरूपेणैव वर्तते । तथैव स्वभावाद् यः साक्षी स एव परमः शिवः तदैक्यमेव जीवस्य परा मुक्तिः कथ्यते ।

अन्यत्र विश्वमायानिवृत्तिरेव मुक्तिरिति कथितं पराशरेण । तस्यायमाशयः भोगेन प्रारब्धकर्मणि क्षीणे सति विद्यया मायालेशो निवर्तते । माया स्वयमेकापि विविधाकाराऽस्ति । जगद्विवर्तने सैव एकमात्रहेतुः । तस्या एक आकारो वस्तुनः सत्यत्वप्रतिभासने, द्वितीयो जगतोऽर्थक्रियाकारित्वे, तृतीयः परतत्त्वापरोक्षस्य प्रतिबन्धकत्वे, चतुर्थः आत्मस्वरूपस्याच्छादकत्वे, पञ्चमो जगत्प्रतीतिमात्रस्य हेतुत्वे, अन्ये च तस्याः सूक्ष्माः स्थूला बहव आकारा वक्तुमशक्याः सांसारिकविभिन्नकार्येषु हेतुभूताः, ते सर्वे मायाकाराः कार्यानुगुण्येन कल्प्याः सन्ति । प्रारब्धकर्मणि क्षीणे एव विश्वमायानिवृत्तिरूपा मुक्तिर्विद्यया सिध्यति । विद्या च वेदान्तवाक्याज्जायते । सा विद्या मुमुक्षोरेव वेदान्तवाक्याद् भवति नान्यस्य । मुमुक्षुत्वञ्च मन्द–मन्दतर–तीव्र–तीव्रतरोत्तरादिभेदेन बहुविधम् । विद्यासाधनबाहुल्ये महत्तरमुमुक्षुत्वे सति सा विद्या देव–त्रिमूर्ति–वेद–गुरु–साम्बशिवचिच्छक्ति–स्वविलक्षणशून्यस्वयंभातसर्वसाक्षिप्रत्यगात्मनां प्रसादादुदेति । जातायां च तस्यां विद्वान् विद्वत्तां विहाय स्वयं परं पदं भवति । इयमेव परतरा मुक्तिः ।

---

१. तत्रैव २९, २. तत्रैव ५८, ३. तत्रैव ९८ ।

मुक्तिरियं वेदान्तमूलिका उपनिषद्रूपा चात्र प्रदर्शिता भगवता पराशरेण। यथाऽऽह श्रुतिः—

ब्रह्मविद् ब्रह्मैव भवति' (मु० उ० ३/२/९)
'तरति शोकमात्मवित्' (छा० उ० ७/१/३)

अद्वैतवेदान्तिनः—आनन्दात्मकब्रह्मावाप्तिः शोकनिवृतिश्च मोक्ष इत्याहुः।

औपनिषदाः—निरतिशयाद्वयानन्दबोधरूप आत्मैव अनाद्यविद्यानिवृत्त्युपलक्षितो मोक्ष इत्याहुः।

शैवाः (लिङ्गायताः)—शिवैकभावेन शिवत्वप्राप्तिः (शिवानन्दानुभवः) एव मोक्ष इत्याहुः।

नकुलीशदर्शने—परमैश्वर्यप्राप्तिर्मोक्षः।

प्रत्यभिज्ञादर्शने—पूर्णात्मतालाभो मोक्षः।

रसेश्वरदर्शने—पारदरसेन देहस्थैर्ये जीवन्मुक्तिरेव मोक्षः।

पाराशरपुराणोक्ता मुक्तिरपि वेदान्तौपनिषदशैवप्रत्यभिज्ञादर्शनोक्तां मुक्तिसरणिमनुसरति।

पाराशरोपपुराणे शिवस्वरूपम

भारते रुद्र–शिवविषयिणी कल्पना प्राचीनतमाऽस्ति । यजुर्वेदस्य शतरुद्रियाध्याये रुद्रस्य महिमा गीतः । तैत्तिरीयारण्यके समस्तं जगद् रुद्रस्यैव [१]रूपमुक्तम । श्वेताश्वतरे भगवान् शिवः सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः सर्वव्यापी सर्वगतिः [२]कथितः । अथर्वशिरस उपनिषदि सर्वप्रथमं पशुपतिव्रत--पशुपाशादितन्त्रस्य पारिभाषिकशब्दाः [३]प्राप्यन्ते । महाभारते [४]वनपर्वणि, [५]द्रोणपर्वणि सौप्तिकपर्वणि[६] च शिवकथा कथिता । वामनपुराणे[७] शैवपाशुपतकालिदमनकापालिकेति 'चत्वारः सम्प्रदाया निर्दिष्टाः । शङ्कराचार्यो ब्रह्मसूत्रभाष्ये माहेश्वराणां तेषां पञ्चपदार्थानाञ्चोल्लेखं कृतवान्[८] । माहेश्वरमतस्य प्रचारो देशस्य भूभागेषु विभिन्नरूपेणाभवत् । अस्य मूलतः चत्वारि क्षेत्राणि [९]सन्ति–

१. पाशुपतमतम्—गुर्जरे, राजस्थाने ।

२, शैवसम्प्रदायः—तमिलप्रदेशे ।

३. वीरशैवसंप्रदायः—कर्नाटके ।

४. प्रत्यभिज्ञासंप्रदायः—काश्मीरे ।

लिङ्गपूजाया उल्लेखः सर्वप्रथमं महाभारतस्यानुशासनपर्वणि प्राप्यते । ततः पूर्ववर्त्तिनि साहित्ये लिङ्गपूजाया उल्लेखो न प्राप्यते । पुराणेषु विशेषतो वायु–स्कन्द – मत्स्य—कूर्म—लिङ्ग — शिव—भविष्य–मार्कण्डेय–वामन–वाराहेषु शिवसंबन्धीनि वर्णनानि सन्ति ।

समालोचनीये पाराशरोपपुराणे अम्बया सहितस्य (साम्बस्य) शिवस्य बहुश उल्लेखो दरीदृश्यते । तत्र मङ्गलाचरणे एव साम्बः शिवो नमस्कृतः । यथा–

सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥

अन्यत्रापि साम्बस्य शिवस्यानेकधा उल्लेखो[१०] वरीवर्ति । अन्ते च शिवा-

---

१. १०/१६, २. ३/११, ३. भा० द० (बलदेवोपाध्यायः) ४. अ० ३८–४०, ५. अ० ८०-८१, ६. अ० ७, ७. ६/८६–९१, ८. भा० द० (बलदेव उपाध्यायः) ९. भा० द० (बलदेव उपाध्यायः), १०. परा० पु० १/४,२/३३,३७,३८, ४२,४६,५०,५१,५२,५४, ३/७, १०,१२, ९/१, ११/५, १३/३१, १६/३८, १७/२७, १८/१०४ ।

शिवयोर्नमस्कारः कृतः पराशरेण मुनिना ।[१] पुराणस्यास्य वैशिष्ट्यमिदमेव यत् शक्त्या सहितः शिवोऽत्र वर्णितः । शक्तिं विना शिवः किमपि कर्तुमसमर्थः–

'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि[२] ।'

स्वात्मभूतमहामायाशक्तिसाक्षी स्रष्टा भर्त्ता संहर्त्ता चास्ति । वरदाभयहस्तस्त्रिमूर्तिभिस्त्रिनेत्रो नित्यश्च । अयं वेदमार्गातिवर्त्तिनामगम्यो वेदवेदान्तवेदिनां सुगम्यश्चास्ति[३] । अयमेव साम्बः स्वमायाशक्त्या लोकानसृजत्[४] ।

तारतम्यविवेचनावसरे पराशरेणात्र साम्बस्य शिवस्यैव श्रेष्ठता[५] समुद्घोषिता तत्पराण्येव वेदान्तवाक्यानि सन्ति । स्मृतिपुराणमहाभारतादीनि शास्त्राणि श्रुत्यनुग्राहकास्तर्काश्च साम्बशिवमेव परमतत्त्वं प्रवदन्ति[६] । पुरा अहमहमिकयोत्कृष्टं मन्यमानौ ब्रह्मविष्णू मिथो युध्यमानौ क्रोधेन परस्परं शप्तवन्तौ । तत्र ब्रह्मा विष्णुमेवं शशाप–त्वं गर्भस्थो भव, तव भक्ता वेदमार्गविमुखाः शङ्खचक्राद्यङ्किता पाञ्चरात्रादितन्त्रे दीक्षिताः श्रौतस्मार्तसदाचारे विमुखाश्च भवेयुः । विष्णुश्च ब्रह्माणमेवं शशाप–त्वदीयं पञ्चमं शिरः शङ्करेण छिन्नं भवेत् । त्वद्भक्ता अपि सङ्करा भवेयुः, त्वदीयं तन्त्रं विच्छिन्नं प्रतिष्ठा च भ्रष्टा भवेताम् । एवं तौ मोहात् प्रस्खलितावभवताम्[७] । अतो निर्बाधं शिवस्यैवाधिक्यं वर्तते देवानाम्[८] ।

देवा द्विविधाः प्रोक्ताः १–श्रौताः, २–अश्रौताश्च । तत्र श्रुतिधर्मैकनिष्ठाः श्रौतास्तद्भिन्ना अश्रौताः । श्रौतानां श्रौतं लिङ्गम्, तच्च त्रिपुण्ड्रम् । अश्रौतानामश्रौतमूर्ध्वपुण्ड्रादिकं लिङ्गम् । उमार्धविग्रहो महादेवः श्रौतं लिङ्गं त्रिपुण्ड्रं दधाति । वेदसिद्धस्य विष्णोर्ब्रह्मणश्चापि त्रिपुण्ड्रमेव लिङ्गम्[९] । अनेन शैवस्य त्रिपुण्ड्रस्य वैदिकता सिध्यति शिवस्य चापि वैदिकत्वं सिध्यति ।

मानवश्रेष्ठताक्रमविचारावसरेऽत्र शिवस्य ब्राह्मणत्वं, विष्णोः क्षत्रियत्वं, पितामहस्य वैश्यत्वं, पुरन्दरस्य च वृषलत्वं प्रतिपादितम्[१०] ।

---

१. १८/१३३, १३४ २. सौन्दर्यलहरी ३. पारा० १/१०-२० ५. तत्रैव २/३० ।
४. तत्रैव २/३० माययाऽस्माच्छिवादेव साम्बात्सत्यादिलक्षणात् ।
अण्डभेदाश्च जायन्ते लोकभेदास्तथैव च ॥
५ तत्रैव ३/६–विष्णोरपि हरस्तस्मान्मायी साक्षान्महेश्वरः ।
ततोऽधिकतरः साक्षाच्छिवः साम्बः सनातनः ॥
६. तत्रैव ३/७,९, ७. तत्रैव ३/२४, ३६, ८. तत्रैव ३/४०–
आधिक्यं सर्वमानानां यथा वेदस्य विद्यते ।
तथा रुद्रस्य देवानामाधिक्यं विद्यतेऽनघ ॥
९. पारा० ४/२-९, १०. तत्रैव ५/१८-१९

'ब्राह्मणो ब्राह्मणमेवोपधावति' इति न्यायेन वेदविद्भिर्ब्राह्मणैः शिव एवोपगन्तव्यः, तच्छेषत्वेनैव विष्णवादिदेवानामुपाश्रयणं न तु प्रधानत्वेन[१]।

प्रायश्चित्तनिरूपणावसरे सर्वपापप्रायश्चित्तत्वेन परमज्ञानस्य श्रेष्ठता प्रतिपादिता। सर्वमेतज्जगदखिलेश्वरः शिवः केशवादयो देवाः त्वमहं सर्वं परब्रह्मेतिविषयकं ज्ञानमेव परं ज्ञानम्। तच्च शिवपादस्मरणादेव भविष्यति[२]।

वाराणसीमाहात्म्यप्रसङ्गे सर्वत्र शिवस्यैव महिमा समुद्गीतः। शिव एव तत्र म्रियमाणस्य जन्तोः परामृतं सच्चिदानन्दस्वरूपं स्वकीयं तारकं ददाति, येन त्वरया स प्राणी महाकष्टकरं संसारं परित्यज्य परानन्दो भवति। अत्र तारकः प्रणव एव।

नहि शिवं विनाऽन्यः कश्चित्संसारमोचको वर्तते[३]। वाराणसीमाहात्म्यं वदता भगवता शिवेन पार्वतीं प्रति उक्तम् यद् हे देवि त्वया मया सेवितमिदं क्षेत्रं समाश्रयणीयमेव जनैः सर्वं परित्यज्य। अथ च पुरा मुनिरत्रिः याज्ञवल्यक्यं प्रति विज्ञानस्य साधनमपृच्छत्, तत्र योगीश्वरो याज्ञवल्क्योऽविमुक्ते शिवध्यानमेव विज्ञानसाधनमब्रवीत्[४]।

पूजाविधिवर्णनावसरे 'चराचरमेतज्जगद् देवदेवस्य रुद्रस्य शरीरमेव' इति ज्ञानमेव शिवस्य महती पूजा प्रतिपादिता[५]।

तत्रैव शिवलिङ्गपूजामाहात्म्यं वर्णयता पराशरेणोक्तं यत् विष्णुः शिलामयं लिङ्गं समभ्यर्च्य परमं पदं प्राप्तवान्, लक्ष्मीर्विष्णुवल्लभा जाता, ब्रह्मा च भारतीं लब्धवान्, शचीन्द्राणी जाता, मरुतश्च परमां श्रियं लेभिरे[६]।

परमतत्त्वविवेचनावसरे कथितं यत्--चैतन्याधिष्ठानमेव जगत्, चैतन्यं विना जगत्प्रतीतिरेव न भवति अपि च तस्मादेव जगतः सत्ता। तत्तु सत्यं ज्ञानमनन्तं सुखस्वरूपं परं पदं वर्तते। सजातीयविजातीय--स्वगतभेदशून्यत्वात्तस्य चैतन्यस्य कश्चन धर्मो न भवति। इदं द्वैतं जगत् मायामात्रमेव वर्तते, वस्तुतस्तु अद्वैतमेवेति वदति सत्यार्थवादिनी श्रुतिः। स्वतः प्रमाणतया वेदो यत्प्रकाशयति तदेव सत्यं वस्तु नापरं किञ्चित्।

उक्तलक्षणस्य तस्य तत्त्वस्य विशेषनामानि शिवशम्भुपरब्रह्मसत्येशानेश्वरादीनि रूढ्या भवन्ति[७]। वस्तुतः सर्वसाक्षिणः परतरस्य मूर्तिः शुद्धा पापनाशिनी स्वतन्त्रास्ति, सा च साम्बचन्द्रशेखरस्यैव, सैव सदा ब्रह्मादिभिर्ध्येया। सा मूर्तिर्जगतः सृष्टौ स्थितौ चाम्बया सह वर्तते संहारे च केवला

---

१. तत्रैव ५।२७-२८, २. तत्रैव १४।९६-९९, ३. पारा० १५/२०-२२, ४. तत्रैव १५/३९-५२, ५. तत्रैव १६/२, ६. पारा १६/१४-१९, ७. पारा० १७/११-२१।

भवति। शिवतत्त्वं स्वभावादेव निर्मलं जन्मादिरहितं पूर्णमद्वैतं स्वतन्त्रं प्रकृतितज्जन्यकार्यातीतं लक्ष्यलक्षणहीनं बन्धमोक्षशून्यं बन्धमोक्षदायकं परशक्तिसमन्वितं पराहन्तानुसन्धानं परमविलासविभूषितं कालकलातीतं कालग्रासवर्जितं सकलाधार परिच्छिन्नवैभवं परतत्त्वानुसन्धानंविद्यावेद्यं सकलोल्लासविलासपरिवृंहितं परमाचार्यानुग्रहेण साम्बशिवप्रसादेन च ज्ञात्वा जनाः संसारबन्धनाद्विमुच्यन्ते।[१]

आत्मस्वरूपविमर्शावसरे कथितं यत्—आत्मा नाम जडस्य तत्प्रकाशस्य प्रकाशकः स्वयं ज्योतिः सच्चिदानन्दस्वरूपः। तस्योपाधिभेदात्कल्पितो भेदो न तु स्वाभाविकः। दृश्यमानो हि नैल्यादिधर्मो दृश्यस्यैव नचात्मनः। संसारधर्मो नात्मधर्मो भवति। तस्मादात्मा सर्वदाऽद्वयः, औपाधिकभेदेन जीवेश्वरेत्यादिविशेषस्वरूपभाग् वर्तते, अतो भिन्नं परं पदं चास्ति। तत्र जीवः संसारदोषेण व्यवहार दशायां दृष्टवद् भासते, परमार्थतस्तु स न दृष्टः। किन्तु परमेश्वरो व्यवहारदशायामपि न दृष्टः[२]।

ब्रह्मात्मैक्यविज्ञानं वेदान्तादेवोपजायते। जाते हि तस्मिन् हृदयग्रन्थिर्भिद्यते, सर्वसन्देहो दूरीभवति, सञ्चितादीनि सकलानि कर्माणि नश्यन्ति[३]।

एतज्जगदवभासनं प्रारब्धफलभोगपर्यन्तं, सन्तिष्ठते, तद्दग्धुं वेदान्तविद्यापि न सक्ता। यतो हि देहोत्पादकानि कर्माणि ज्ञाने स्वतन्त्रतया सम्पूर्णं दाहकस्वरूपं प्रतिबध्नन्ति। परतत्त्वसमुत्पन्ना संसारविनिर्वर्तिका विद्या स्वोदयमात्रेण अखिलसत्यतां दहति। दग्धेऽपि जगत्सत्यत्वे फलदायकानि प्रारब्धकर्माणि फलं भोजयन्ति। अत एव तदानीं जगत्सत्यत्वस्य दग्धत्वेन प्रारब्धभोगस्य शेषत्वेन च स प्रारब्धकर्मफलभोगपर्यन्तं जीवन्मुक्त इति कथ्यते। जीवन्मुक्तस्य पुरुषस्य कर्मणः कर्तृता संभवति न तु ज्ञानिनः[४]। सम्पूर्णेषु सञ्चितेषु कर्मसु यत् प्रबलं कर्म तदेव नानाविधान् भोगान् देहञ्चारभते। माहेश्वरी या शक्तिः सैव जडा माया सकलं दुर्घटं घटयति, नात्र कश्चन सन्देहः। भोगेन कर्मणि क्षीणे सति विद्यया मायालेशो निवर्तते। विश्वमायानिवृत्तिरेव परा मुक्तिः[५]।

एवमुक्त्वा शक्तिपुत्रः पराशरः सच्चिदानन्दे परमाद्वैते प्रत्यगात्मनि निमग्नो बभूव। ततस्तत्र आत्मानुभूतिदायिनी देवी पार्वती आविरभूत्, किन्तु आत्मानुभूतिलीनत्वात् पराशरस्तां देवीं नाविन्दत्। एवंभूतमात्मलीनं पराशरं विलोक्य देवी शुकदेवं प्रेम्णाऽब्रवीत्[६]—

अनेन मुनिना यदुक्तं तत्सर्वं सत्यं, त्वं तु अस्य पौत्रो व्यासस्य च पुत्रः, अतः किं ते न सिध्यति? मत्प्रसादाद् भाग्यवैभवाच्च वेदान्तजन्यं ज्ञानं त्वया लब्धम्।

---

१. तत्रैव १७/२६-३८, २. तत्रैव १८/३०-३९, ३. तत्रैव १८/६२-६३,
४. पारा० १८/६२-६३, ५. तत्रैव १८/८७-९८, ६. तत्रैव १८/१०८-११२।

सद्योमुक्तिकरं ज्ञानं मत्प्रसादादेवोपलभ्यते। अतो मत्प्रसादावाप्तये निरालसो भूत्वा आदरेण हृदयाम्भोजे, वाचि, ब्रह्मरन्ध्रे मूलाधारे, भ्रूमध्ये वा यथाशक्ति नित्यं मां पूजयेत्। मम निष्कलं रूपं वर्णयुतविग्रहं हस्ताद्यवयवसंयुतं ब्राह्मणात्मकं लौह पाषाणजन्यं वा विग्रहं भक्त्या नित्यं गुरूपदिष्टरीत्या अर्चेत्। इत्युक्त्वा पार्वती तत्रान्तर्दधौ। अन्तर्हितायां तस्यां स्वानुभूतिगलितः पराशरः शुकदेवमालोक्य गणेशषडाननन्दीश्वरसहितं साम्बं शिवं प्रणम्याब्रवीत्—

महादेवः परं तत्त्वं विद्या वेदान्तवाक्यजा।
विद्याङ्गेषु समस्तेषु वरिष्ठं भस्मधारणम्॥
गुरुः संसारिणां नृणां संसारोदधितारकः।
श्रद्धा धर्मस्य मोक्षस्य कारणं सकलस्य च[१]॥

हे शुक। इतः परं मया किमपि न वक्तव्यं श्रोतव्यं चास्ति। महादेवप्रसादेन मया पाराशरपुराणमिदमीरितम्[२]।

ततो व्यासपुत्रः शुकदेवो निजपितामहात् पराशरात् पाराशर्यपुराणं श्रुत्वा गुरोश्चरणयोर्भूमौ निपत्य दण्डवत्प्रणाममकरोत्। अन्ते च रुद्रं नमस्कृत्य आनन्द-दायिनीं शिवामपि नमश्चकार। उपसंहारे चास्य पुराणस्य स्वरूपमुक्तम्। तद् यथा—

अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितम्।
इदमष्टादशाध्यायैः शिवोऽत्रैव च दर्शितः[३]॥

---

१. तत्रैव १८/११३-१२९, २. पारा० १८/१३०-१३१, ३. तत्रैव १८/१३२-१३५।

पाराशरोपपुराणत उद्धृतवचनानि

(१) पराशरसंहितायां—माधवाचार्यकृतटीकायां प्रायश्चित्तकाण्डे द्वादशाध्याये—

तत्र सुकृतप्रवृत्तान्यपि फलानि प्रतिबध्य स्वफलं प्रयच्छति। प्रतिबद्धश्च फलशेषः स्वप्नादौ जन्मान्तरे वा उपभुज्यते। एतत्सर्वमुपपुराणे पराशरेण[१] प्रपञ्चितम्—

'शरीरारम्भकं कर्म योगिनो भोगिनोऽपि[२] च।
विना फलोपभोगेन न च नश्यत्यसंशयम्॥
वर्तमानशरीरेण सम्पन्नं कर्म देहिनः।
इह वा[३] ऽमुत्र वाऽज्ञस्य ददाति स्वफलं शुक[४]॥
इहैव फलदं कर्म प्रारब्धं प्रतिबन्ध्य[५] च।
फलं ददाति स्वप्ने वा जाग्रत्काले ऽथवाऽनघ॥
निवृत्तप्रतिबन्धं[६] तु प्रारब्धं कर्म सत्तम।
निरुद्धांशफलं[७] स्वप्ने ददाति स्थिरमुत्तमम्॥
निरुद्धांशसमो भोगो यथोद्भूतश्च जाग्रति।
तथा निरुद्धं तेनैव सह कर्म ददाति वै॥
एवं निरुद्धभोगं तु स्वप्ने जाग्रति वा फलम्।
आरब्धस्यानुगुण्येन भुङ्क्ते देही न संशयः॥
अत्युत्कटैरिहत्यैस्तु पुण्यपापैः शरीरभृत्।
प्रारब्धं कर्म विच्छिद्य भुङ्क्ते तत्तत्फलं बुधः॥
भुङ्क्ते देही ततो भुङ्क्ते तल्लंघयति कः पुमान्?।
अवश्यमनुभोक्तव्यं प्रारब्धस्य फलं जनैः।
देहेनैकेन[८] वाऽन्येन युगपद् वा क्रमेण वा॥
श्वसूकरखरोष्ट्रादिविरुद्धैर्विग्रहैरपि ।
भोक्तव्यस्य फलस्यैव शुक कर्माणि च क्रमात्॥

---

१. पाराशरे, क्वचित् नास्ति, २. वा, ३. च, ४. कुतः, ५. प्रतिपद्यते, ६. बद्धं, बद्धे, ७. विरुद्धांशफलम्, ८. देहेनानेन।

कारणानि भवन्तीह चक्रवत्परिवर्तने ।
आरभन्ते क्रमेणैव तेषां नाशस्तु भोगतः ॥
सञ्चितेषु समस्तेषु प्रबलं कर्म देहिनः[१] ।
फलमारभते[२] देहमपि तत्साधनं बुधः ॥
दुर्घटं सकलं शक्तिर्माया माहेश्वरी जडा ।
घटयत्येव सन्देहो नास्ति सा तादृशी[३] गतिः[४] ॥ इति ।

प्रबलेन कर्मणा प्रारब्धफलस्य प्रतिबन्धाङ्गीकारे नैसर्गिकाः कुनाखित्वादयोऽपि क्वचित्प्रतिबध्येरन्—प्रतिबध्यतां नाम ।

(२) **वैद्यनाथदीक्षितीय-स्मृतिमुक्ताफले**—आह्निककाण्डे क्रियास्नानप्रकरणे (पृ० २९५) तथाहि पराशरोपपुराणे—

श्रौतं लिङ्गं च विज्ञेयं त्रिपुण्ड्रोद्धूलनात्मकम् ।
अश्रौतमूर्ध्वपुण्ड्रादि नैव तिर्यक् त्रिपुण्ड्रकम्[५] ॥
'नराणामुत्थिता जातिर्येषां तन्त्रोक्तवर्त्मना ।
ललाटे तैः सदा धार्यं मृदा पुण्ड्रान्तरं द्विज ॥
जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः ।
पुण्ड्रान्तरं भ्रमाद् वापि ललाटे नैव धारयेत्[६] ॥

पुराणान्तरेऽपि (पृ० २९६)

'ऊर्ध्वपुण्ड्रं त्रिशूलं च श्रद्धया श्रुत्यचोदितम् ।
धारयन्ति ललाटे तु मनुष्याः पापकर्मिणः[७] ॥'

पुराणान्तरे (पृ० ३००)

'वेदमूलतया नित्यं प्रवृत्ता अपि सत्तमाः[८] ।
क्वचित्कदाचित्स्मर्त्तारस्तन्त्रार्थं च ब्रुवन्ति वै ॥
क्वचित्तन्त्रानुरोधेन[९] धर्मं पौराणिका अपि ।
वदन्ति तादृशोंऽशस्तु ग्राह्यस्तन्त्रावलम्बिना ॥
पुराणे धर्मशास्त्रे वा योंऽशः श्रुत्या विरुध्यते ।
स तन्त्रार्थ इति ज्ञेयः समासेन महर्षिभिः[१०] ॥'

(पराशर० पु० १०/७१-७३)

---

१. देहिनाम्, २. भोगानारभते, ३. खलु, ४. पाराशरोपपुराणे-अ० १८ श्लोक ७६-९०, ५. पाराशर० ४/६, ६. पाराशर० ६/१३-१४ ('अत्र 'नराणामुद्धृता' तथा 'भक्त्या-लिङ्गान्तरं द्विज' इतिपाठभेदः), ७. पाराशर० ११/१० ('श्रद्धया श्रुत्यचोदितम्' इत्यस्य स्थानेऽत्र 'वर्तुलं चतुरस्रकम्' इति पाठः, ८. सत्तम, ९. तन्त्रानुसारेण, १०. स तन्त्रार्थस्तु विज्ञेयः समासेन मनीषिभिः ।

यश्च वेदविरुद्धोऽर्थः पुराणेष्वखिलेषु च ।
तदंशस्तु परित्याज्यः सर्वथा सकलैरपि ।।

पाराशरे (पृ० ३०४)—

भस्मना वेदमन्त्रेण त्रिपुण्ड्रं चावकुण्ठनम्[1] ।
यस्य सिध्येत्प्रयत्नेन ब्राह्मण्यं तस्य पुष्कलम् ।।

(पारा० पु० ४/३२)

भस्मना वेदमन्त्रेण त्रिपुंड्रस्य च धारणम् ।
आश्रमाणां च सर्वेषां धर्मत्वेनाहुरास्तिकाः ।।

(पारा० पु० ४/४३)

शिवस्य विष्णोर्देवानां ब्रह्मणस्तृप्तिकारणम् ।
पार्वत्याश्च महालक्ष्म्याः भारत्यास्तृप्तिकारणम् ।।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य तु धारणम् ।

(पारा० ४/३६, ३७१)

भस्मसंछन्नसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ।।
ये निन्दन्ति नरा[2] राजा हन्यात्तानविचारतः ।।

(पारा० ७/२६)

वैणवीं[3] धारयेद् यष्टिं सोदकं च कमण्डलुम् ।
पवित्रमुपवीतं च त्रिपुण्ड्रोद्धूलनं द्विजः ।।

(पारा० ७/२९)

यथा विशिष्टे मानुष्ये ब्राह्मणे पशुविग्रहे ।
यज्ञदानाद्यनुष्ठानं दुर्लभं सर्वदेहिनाम्[4] ।।
तथा श्रौतेषु धर्मेषु त्रिपुण्ड्रं भस्मकुण्ठनम्[5] ।
रुद्रलिङ्गार्चनं चापि दुर्लभं हि शरीरिणाम् ।।
त्रिपुण्ड्रधारणं तिर्यक् भस्मनैवावकुण्ठनम्[6] ।
सुदुर्लभमिति ज्ञात्वा खलु सर्वेश्वरोऽकरोत् ।।

(पारा० १४/२५-२८)

अनिष्पन्नस्य[7] कर्तव्यं त्रिपुण्ड्रादेस्तु[8] धारणम् ।
विशेषेण स्वलाभाय नान्यलाभाय सत्तम ।।

---

१. चावगुण्ठनम्, २. द्विजं, ३. वैष्णवीं, ४. खलु देहिनाम्, ५. भस्मगुण्ठनम्, ६. भस्मना चावगुण्ठनम्, ७. अनिष्पन्नेन ८. च, ।

स्वलाभमन्तरेणापि पराचारार्थमास्तिकः[१] ।
निष्पन्नेनापि कर्तव्यं यथा सर्वेश्वरेण[२] तत् ॥
(पारा० १४/३१ख-३३क)

श्रौतधर्मैकनिष्ठानां लिङ्गं तु श्रौतमेव हि ।
अश्रौतधर्मनिष्ठानां लिङ्गं त्वश्रौतमेव[3] हि ॥
श्रौतं लिङ्गं च[४] विज्ञेयं त्रिपुण्ड्रोद्धूलनात्मकम् ।
पाराशरे (पृ० ३०५)
अश्रौतमूर्ध्वपुण्ड्रादि नैव तिर्यक् त्रिपुण्ड्रकम् ॥
वेदसिद्धो महादेवः साक्षात्संसारमोचकः ।
उभार्धविग्रहः शुक्लश्चन्द्रार्धकृतशेखरः[५] ॥
लोकानामुपकाराय श्रौतं लिङ्गं दधाति च ।
वेदसिद्धस्य विष्णोश्च श्रौतं लिङ्गं न चेतरत् ।
प्रादुर्भावविशेषाणामपि तस्य तदेव हि ॥
(पारा ४/४, ६-८, ९क)

(३) महाभाष्यस्य (नवाह्निकस्य) वैद्यनाथकृतच्छायाटिप्पण्याः प्रारम्भे-

वैद्यनाथः पायगुन्डो ध्यात्वा ध्यात्वा परं गुरुम् ।
भाष्यप्रदीपसूद्योतान् व्याचष्टे गूढसंविदे ॥
'शास्त्रं निर्णायकं न्यायकलापं मुनिसत्तमाः[६] ।
सूत्ररूपेण कुर्वन्ति शिवस्यैवाज्ञयैव तु ॥
अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
मुनयश्च मनुष्याश्च प्रसादादेव शूलिनः ।
सूत्रव्याख्यां प्रकुर्वन्ति वार्तिकानां स्वरूपतः[७] ॥
'उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः ॥'
सूत्रार्थं भाष्यरूपेण यथावद् दर्शयन्ति च ॥
'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥'

---

१. परिचारार्थमास्तिक, २. तु, ३. अश्रौतं लिङ्गमीरितम्, ४. तु ।
५. शुद्धः, ६. शास्त्रनिर्णायकं न्यायकलापं, ७. इयं पंक्तिर्नास्ति पुराणे ।

प्रसादादेव रुद्रस्य भवानीसहितस्य तु ।
कुर्वन्ति केचिद् व्याख्यानं भाष्यस्यैव तपोबलात् ।।
पदच्छेदः पदार्थश्च विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं षड्विधं मतम्[१] ।।
स्वबुध्यतीतभाष्यार्थसंग्रहेणैव वाऽथवा[२] ।
विस्तरेण प्रकुर्वन्ति केचित्प्रकरणात्मना ।।
शास्त्रैकदेशसंसिद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम शास्त्रभेदविचक्षणाः ।।
सूत्रभाष्यादिभिः शास्त्रं साक्षाद् वेदनसाधनम् ।
श्रोतव्यं स्वगुरोः स्वात्मस्वरूपप्रतिपत्तये ।।
आत्मलाभात्परं नास्ति किञ्चिन्मात्रमपि द्विजाः[३]।'
पराशरपुराणे वै स्पष्टमेतन्निबोधत ।।
जीर्णैरनुक्तमत्रोक्तं सूत्रार्थप्रतिपत्तये ।।

(पारा० १८/१२-२३)

(४) पराशरसंहितायां माधवाचार्यकृतव्याख्यासहितायां द्वादशाध्याये--

शासनाच्छास्त्रमिति तद्व्युत्पत्तिः। ननु शंसनाच्छास्त्रमिति अपि तद्व्युत्पत्तिरस्ति, तदुक्तं पुराणे—

'शासनाच्छंसनाच्चैव शास्त्रमित्यभिधीयते[४] ।

(५) तत्वकौतुभे—

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन[५] ।।

(६) सांख्यसूत्रविज्ञानभिक्षुभाष्ये (प्रथमाध्याये प्रथमे सूत्रे)--

अक्षपादप्रणीते च काणादे सांख्ययोगयोः ।
त्याज्यः श्रुतिविरुद्धोंशः श्रुत्येकशरणैर्नृभिः ।।
जैमिनीये च वैयासे विरुद्धांशो न कश्चन ।
श्रुत्या वेदार्थविज्ञाने श्रुतिपारङ्गतौ हि तौ[६] ।।'

(७) याज्ञवल्क्यस्मृति-मिताक्षराया बालम्भट्टीटीकायाम् उपोद्घाते (श्लोक ३)—

आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ।
नादाख्यं (नान्दाख्यं) शिवधर्माख्यं दौर्वासं नारदीयकम् ।।

---

१. आक्षेपस्य समाधानं व्याख्यामं पञ्चलक्षणम्, २. स्वबुद्ध्यधीनं भाष्यार्थम्, ३. द्विज ।
४. शास्त्रमित्युच्यते बुधैः, ५. पारा० ८।२९, ६. पारा० ८।२९, ३०,

कापिलं मानवं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणं कालीपुराणाख्यं तथैव च ।।
वाशिष्ठं लैङ्गसंज्ञं च साम्बं सौरं तथैव च ।
पाराशरसमाख्यं च मारीचं भार्गवाह्वयम् ।।
पाराशरसमाख्यं तु पुराणमिदमुत्तमम्[१] ।।
इति पाराशरोपपुराणे प्रथमाध्यायेऽपि ।

(८) ओकोपाह्वत्र्यम्बविरचिते—आचारभूषणे (पृ० ८४)—

तदयं निर्गलितार्थः पराशरपुराणे भगवता पराशरेण दर्शितः—

भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ।
वर्णधर्मतया प्राज्ञाः प्रवदन्ति मनीषिणः ।
आश्रमाणां च सर्वेषां धर्मत्वेनाहुरास्तिकाः ।।

विस्तरतस्तु तत्रैव बोध्यमित्यलं पल्लवितेन ।

१. पारा० १।२८-३१

पाराशरोपपुराणसम्पादनाय संगृहीतानामालोचितानां हस्तलिखितपुस्तिकानां परिचयः—

सम्पूर्णानन्दसंस्कृविश्वविद्यालयस्य सरस्वतीभवनग्रन्थागारात् षट् चतस्रः पूर्णाः, (द्वे च अपूर्णे) हस्तलिखितपुस्तिकाः समानाय्य पर्यालोच्य च सम्पादितमिदं पाराशरोपपुराणम् । आलोचनसौकर्यार्थमुक्ता हस्तलिखितपुस्तिका यथाक्रमं क ख ग घ ङ च इतिरूपेणाभिधीयन्ते । अधुना आसां हस्तलिखितपुस्तिकानां संक्षिप्तः परिचयः प्रदीयते ।

(क) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयसरस्वतीभवनग्रन्थागारस्य हस्तलिखितग्रन्थविवरणपञ्जिकायाः चतुर्थो भागः । क्रमसंख्या-१५७६१, सम्पूर्णपत्रसंख्या -४८, आकारः-९-५, ४. १, पंक्तिसंख्या (पृष्ठे)-१० अपरसंख्या (पंक्तौ)-३५, लिपितः- देवनागरी, आधारः-प्राचीनं देशजपत्रम्-लिपिकालः- १८७२, पूर्णमिदं पुस्तकम् ।

आरम्भः—

ॐ श्रीगणेशाय नमः ।। श्रीसांबसदाशिवाय नमः ।। सौरमण्डलमध्यस्थं सांबं संसारभेषजं नीलग्रीवं विरुपाक्षं नमामि शिवमव्ययं । मेरुश्रृंगे समासीनं संसारोदधितारकं शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् २

अन्तिमः अंशः—

या विभाति सदासाक्षिस्वरूपेण स्वभावतः तां नमाम्यादरेणैव शिवामानन्ददायिनीं ३४ अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितं इदमष्टादशाध्यायैः शिवोत्रैव च दर्शितः १३५ इत्युपपुराणे पाराशरे अष्टादशोध्यायः १८ सं० १८७२ श्री साम्बसदाशिवार्पणमस्तु ।। आषाडि सुदी तृतीया शनिवारे लिखि करि समाप्त किया त्रिलोचनायार्पणमस्तु । श्री महादेवाय नमो नमः शिव शिव शिव श्री महादेवाय श्रीमहादेवाय श्री शिवाय श्री शिवाय शिव ।

(ख) सम्पूर्णानन्द संस्कृतविश्वविद्यालयसरस्वतीभवनहस्तलिखितविवरणपंजिकायाश्चतुर्थो भागः । क्रमसंख्या-१५३०८, सम्पूर्णपत्रसंख्या-४७, आकारः-१२.७ × ४. ८, पंक्तिसंख्या (पृष्ठे)-९, अक्षरसंख्या (पंक्तौ)-३९, लिपिः-देव०, आधारः-प्राचीनं देशजपत्रम्, पूर्णमिदं पुस्तकम् ।

आरम्भः

श्रीगणेशाय नमः ।। सौरमण्डलमध्यस्थं सांबं संसारभेषजम् ।। नीलग्रीवं विरूपाक्षं नमामिशिवमव्ययम् ।। १ ।। मेरुशृंगे समासीनं संसारोदधितारकम् ।। शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ।। २ ।।

अन्तिमः अंशः—

या विभाति सदा साक्षिस्वरूपेण स्वाभावतः ।। तान्नमाम्यादरेणैव शिवामानन्दायिनीम् ।। ३७ ।। अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितम् ।। इदमष्टादशाध्यायैः शिवोत्रैव च दर्शितः ।। ३८ ।। इति श्री उपपुराणे पाराशरे अष्टादशोध्यायः ।। १८ ।। राम ।। राम ।। १८ ।। राम ।।

(ग) सं, सं० वि० वि०, सरस्वतीभवनहस्तलिखित-विवरणपञ्जिकायाः चतुर्थो भागः । क्रमसंख्य-१४३९६, पत्रसंख्या- ४८ आकारः १०.८ × ४,८, तंक्तिसंख्या (पृष्ठे)९, अक्षरसंख्या (पंक्तौ)-३३, लिपिः-देवनागरी, आधारः-प्राचीनं देशजपत्रम्, पूर्णमिदं पुस्तकम्-

आरम्भः—

श्रीगणेशाय नमः ।। सौरमण्डलसमध्यस्थं सांबं संसारभेषजं । नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययं ।। १ ।। मेरुशृंगे समासीनं संसारोदधितारकं । शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ।। २ ।।

अन्तिमः अंशः—

या विभाति सदा साक्षिस्वरूपेण स्वभावतः । तां नमाम्यादरेणैव शिवामानन्ददायिनीं ।। ३६ ।। अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितं । इदमष्टादशाध्यायैः शिवोत्रैव च दर्शितः ।। १३७ ।। इत्युपुराणे पाराशरे अष्टादशोध्यायः ।। १८ ।। सं० १७१८ पुष्यशुद्ध १० भृगौ ।। इदं पुस्तकं यडगी भैर (व) भट्टेन लिखितं ।। स्वार्थं परार्थं च ।।

(घ) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयसरस्वतीभवनग्रन्थागारस्य हस्तलिखितविवरणपञ्जिकायाश्चतुर्थो भागः । क्रमसंख्या–१४९१२, पत्रसंख्या–४७, आकारः ८.८ × ३.७, पंक्तिसंख्या (पृष्ठे)–१०, अक्षरसंख्या (पंक्तौ)–३२, लिपिः देवनागरी, आधारः–प्राचीनतरं देशजपत्रम्, पूर्णमिदं पुस्तकम् ।

आरम्भः—

श्री गणेशाय नमः । श्री शिवाय नमः ।। सौरमंडलमध्यस्थं सांबं संसारभेषजं नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ।। १ ।। मेरुशृंगे समासीनं संसारोदधिताकम् ।। शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ।। २ ।।

अन्तिमः अंशः—

या विभाति सदा साक्षिस्वरूपेण स्वभावतः । तां नमाम्यादरेणैव शिवामानन्ददायिनीम् ।। १३६ ।। अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितम् ।। इदमष्टादशाध्यायैः शिवोत्रैव च दर्शितः ।। १३७ ।। इत्युपपुराणे पाराशरे अष्टादशोध्यायः ।। पाराशरं समाप्तं ।। श्रीरस्तु ।।

(ङ०) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयसरस्वतीभवनग्रन्थागारहस्तलिखितविवरणपंजिकायाश्चतुर्थो भागः १ क्रमसंख्या–१५४१६, पत्रसंख्या–५, आकारः ११.१ ÷ ६.२, अक्षरसंख्या (पंक्तौ)–५–०, पंक्तिसंख्या (पृष्ठे) ११, आधारः प्राचीनं देशजपत्रम्, लिपिः–देवनागरी केवलमष्टादशाध्यायः, अपूर्णमिदंपुस्तकम् ।

आरम्भः–

श्री गणेशाय नमः ।। पराशरोवाच ।। अथशास्त्रार्थसंक्षेपं प्रवक्ष्यामि समासतः मुमुक्षुभिर्महाप्राज्ञैर्वेदितव्यो विशेषतः ।। शासनाच्छंसनाच्चैव शास्त्रमित्युच्यते बुधैः ।। शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवादिभिः ।। २ ।।

अन्तिमः अंशः–

या विभाति जगत्साक्षिस्वरूपेण स्वभावतः ।। तां नमाम्यादरेणैव शिवामान्ददायिनीं ।। ३७ ।। अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितं ।। इदमष्टादशाध्यायैः शिवोत्रैव च दर्शितः ।। १३८ ।। इति श्री उपपुराणे पराशरे अष्टादशोध्यायः ।।१८।। कार्तिकशुक्लसप्तमी ।। संवत् :। १८ ।। ५७ ।। शनिवारे ।

(च) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयसरस्वतीभवनग्रन्थागारस्य हस्तलिखितविभागे अमुद्रितपुराणपञ्जिकायां (१/६५) प्राप्तविवरणानुसारेण–क्रमसंख्या–(१/६५), पत्रसंख्या–४७ (१–४५, तथा ५०,५१), पंक्तिसंख्या (पृष्ठे)–९, अक्षरसंख्या (पंक्तौ) ३६, लिपिः–देवनागरी, आधारः प्राचीनं देशजपत्रम्, अपूर्णमिदं पुस्तकम् (मध्ये पृ०: ४६–४९ न सन्ति) ।

आरम्भः–

श्री महागणपतये नमः ।। श्री दक्षिणामूर्तये नमः ।। ॐ सौरमंडलमध्यस्थं सांबं संसारभेषजं । नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययं ।। १ ।। मेरुशृंगे समासीनं संसारोदधितारकं ।। शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ।। २ ।।

अन्तिमः अंशः–

या विभाति सदा साक्षिस्वरूपेण स्वभावतः । तां नमाम्यादरेणैवशिवामानन्ददायिनीं ।। अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितं । इदमष्टादशाध्यायैः शिवोत्रैव प्रदर्शितः ।। ।। इत्युपुराणे पाराशरे अष्टादशोऽध्यायः । समाप्तमिदं पाराशरं ।। श्री शिवार्पणमस्तु । शिवाभ्यां नमः ।।

अथ पाराशरोपपुराणम्

॥ श्रीगणेशाय नमः ॥

श्रीसाम्बसदाशिवाय नमः[1]

सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥ १ ॥

मेरुश्रृङ्गे समासीनं संसारोदधितारकम् ।
शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ॥ २ ॥

पप्रच्छ[2] परमं गुह्यं भक्त्या परमया मुदा[3] ।
भवपाशेन बद्धानां भवपाशविमोचनम् ॥ ३ ॥

पराशरोऽपि भगवान् भवानीपतिवल्लभः[4] ।
प्राह कारुणिकः श्रीमान् ध्यात्वा साम्बं त्रिलोचनम् ॥ ४ ॥

श्रीपराशर उवाच

पुरा पुराणमखिलं व्यासः सत्यवतीसुतः ।
कृत्वा शिवप्रसादेन मुनीनां भावितात्मनाम् ॥ ५ ॥

दर्शयित्वा मुनीन्द्रैस्तु[5] सुप्रसन्नैर्महात्मभिः ।
पूजितो भवदत्यर्थं पुरजित्पादवल्लभः ॥ ६ ॥

अस्मिन्नवसरे श्रीमान् महाकारुणिकोत्तमः ।
महादेवो महादेव्या सह सन्निहितोऽभवत् ॥ ७ ॥

तं दृष्ट्वा देवदेवेशं त्रिनेत्रं चन्द्रशेखरम् ।
प्रणम्य मुनयः सर्वे दण्डवत्पृथिवीतले ॥ ८ ॥

---

१. ख ग ×, घ श्रीशिवाय नमः, २. क पपृछ, ३. घ सदा, ४. ख घ वल्लभम्,
५. ख ग घ स्तैः, ङ मुनीन्द्रैस्तु तैः

प्रदक्षिणत्रयं कृत्वा प्रपूज्य परमेश्वरम् ।
तुष्टुवुर्हृष्टमनसो विस्मिता विवशाः शुक ।। ९ ।।

मुनय ऊचुः[1]

शिवाय सत्यविज्ञानमहानन्दस्वरूपिणे ।
सर्वविलक्षणहीनाय स्वयंवेद्याय ते नमः ।। १० ।।

स्वात्मभूतमहामायाशक्तिवैभवसाक्षिणे ।
स्रष्ट्रे भर्त्रे च संहर्त्रे सर्वस्य जगतः सदा ।। ११ ।।

शक्त्याकारे तु मायायाः[2] स्वयं चिच्छक्तिरूपतः ।
संस्थिताय स्वतन्त्राय नमः साम्बाय शम्भवे ।। १२ ।।

महदाद्यणुपर्यन्तमायाचित्रस्य सर्वदा ।
भित्तिभूताय[3] रुद्राय नमः संसारहारिणे ।। १३ ।।

रुद्रविष्णवादिरूपेण विभक्ताय स्वमायया ।
सत्वादिगुणदेहाय निर्गुणाय नमो नमः ।। १४ ।।

वरदाभयहस्ताय त्रिनेत्राय त्रिमूर्तिभिः ।
हृदि ध्येयाय नित्याय नमः साम्बाय साक्षिणे ।। १५ ।।

वेदवेदान्तसंस्थाय वेदमार्गातिवर्तिनाम्[4] ।
अगम्याय सुगम्याय नमो वेदान्तवेदिनाम्[5] ।। १६ ।।

स्वस्वरूपातिरेकेण किञ्चिदप्यविजानताम् ।
आत्मयाथात्म्यनिष्ठानामात्मभूताय वै नमः ।। १७ ।।

श्रुतिस्मृतिपुराणादिप्रमाणानां तथैव च ।
प्रत्यक्षादिप्रमाणानां प्रमेयाय नमो नमः ।। १८ ।।

---

१. क उवाच, २. क तूर्यायाः, ३. क भिति, ४. क वर्तिने, ५. क ग वेदिने ।

अप्रमेयाय शान्ताय स्वप्रकाशाय साक्षिणे ।
स्वस्वरूपैकनिष्ठानां[1] मुक्तिदाय नमो नमः ॥ १९ ॥
आत्मयाथात्म्यविज्ञानविहीनानां दुरात्मनाम् ।
दुःखदाय नमस्तुभ्यं भक्तिगम्याय शूलिने ॥ २० ॥

श्रीपराशर उवाच

इत्येवं मुनिभिः साक्षाच्छङ्करोऽभिष्टुतः[2] प्रभुः ।
प्रसन्नः पार्वतीनाथः प्राह गम्भीरया गिरा ॥ २१ ॥

ईश्वर उवाच

मुनीन्द्रा ब्रह्मविच्छ्रेष्ठाः प्रसन्नोऽहमतीव वः[3] ।
अयं सत्यवतीसूनुरत्यन्तं मम वल्लभः ॥ २२ ॥
मत्प्रसादेन विप्रेन्द्रास्तपसा च ममाज्ञया ।
निर्ममे च पुराणानि लोकानां हितकाम्यया ॥ २३ ॥
मत्प्रियार्थं मुनिश्रेष्ठा पुराणं सकलं तु तत् ।
श्रुत्वा सत्यवतीसूनोर्[4]र्लोकानां हितकाम्यया ॥ २४ ॥
अन्यान्युपपुराणानि यथेष्टं यूयमास्तिकाः ।
कुरुध्वं संग्रहेणैव ममाज्ञा परमा कृता ॥ २५ ॥

श्रीपराशर[5] उवाच

एवमाज्ञां महादेवः कृत्वा वेदविदां वरः ।
प्रसन्नः परया शक्त्या[6] तत्रैवान्तरधीयत ॥ २६ ॥
एवमाज्ञापितास्तेन शिवेन मुनयः पुरा ।
श्रुत्वा सत्यवतीसूनोः पुराणं सकलं[7] मुदा ॥ २७ ॥

---

१. क ख निष्ठाय, २. क भीष्टदः, ३. क च, ४. क ख सूनु ५. ग ङ ×,
६. क ख ङ भक्त्या, ७. ग सफलं

अन्यान्युपपुराणानि चक्रुःसारतराणि वै ।
आद्यं सनत्कुमारोक्तं नारसिंहं ततः परम् ॥ २८ ॥

नान्दाख्यं शिवधर्माख्यं दौर्वासं नारदीयकम् ।
कापिलं मानवं[1] चैव तथैवोशनसेरितम् ॥ २९ ॥

ब्रह्माण्डं वारुणं कालीपुराणाख्यं तथैव च ।
वाशिष्ठं[2] लिङ्गसंज्ञं च साम्बं सौरं तथैव च ॥ ३० ॥

पाराशरसमाख्यं[3] च मारीचं भार्गवाह्वयम् ।
पाराशरसमाख्यं[4] तु पुराणमिदमुत्तमम् ॥ ३१ ॥

मयैव कथितं तत्र स्थितः श्रुत्यर्थ आस्तिके[5] ।
इदं पुराणमत्यर्थं पुरं[6]जित्प्रीतिकारणम् ॥ ३२ ॥

श्रोतव्यं पठितव्यं च लेखनीयं तु[7] पुस्तके[8] ।
रक्षणीयं द्विजं[9]श्रेष्ठैरन्यैरप्यादरेण तु ॥ ३३ ॥
पठतां शृण्वतां वापि वाग्देवी च विजृम्भते ।

इत्युपपुराणे पाराशरे प्रथमोऽध्यायः ॥ १ ॥

---

१. क पावकं, २. ङ वाशिष्ठलङ्ग्यसंज्ञं, ३. क ख घ ङ पराशर, ४. ग ङ पराशर, ५. क घ आस्तिकाः, ६ क पुरु, ७. क ख ङ च ८. क पुस्तकम्, ९. घ द्विजाः

अथ द्वितीयोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि तव सृष्टिक्रमं द्विज ।
श्रद्धया शृणु वेदोक्तं ब्रह्मविज्ञानसिद्धये ॥ १ ॥

इदं सर्वं जगत्पूर्वं प्रलये परमेश्वरे ।
मायाभिन्ने स्वमायाख्यकारणाभिन्नरूपतः ॥ २ ॥

वर्तते वासनारूपेणैव नाभावरूपतः ।
कालकर्मविपाकेन वासनाबलतोऽपि च ॥ ३ ॥

मायाया[1]: स्त्रक्फणीवायं महानात्मा प्रजायते ।
स्रष्टव्यविषयं ज्ञानं सत्वजं मुनिपुङ्गव ॥ ४ ॥

महानात्मेति विद्वद्भिः पठ्यते वेदवित्तमैः ।
सृष्ट्वा महान्तमात्मानं शिवोऽनुप्राविशत्स्वयम् ॥ ५ ॥

स पुनस्तत्प्रधानेन रूपेणैव द्विजोत्तम ।
सर्वज्ञ इति विद्वद्भिः पठ्यते मुनिपुङ्गव ॥ ६ ॥

ईक्षि[2]तेतीक्षणोपा[3]धिप्रधानः परिकीर्तितः ।
स पुनश्चेक्षिता सत्त्वं गुणमात्मतयैव तु ॥ ७ ॥

मनुते सर्वसंहर्ता तमसा भवति स्वयम् ।
तथैवात्मतया नित्यं मनुते च तमोगुणम् ॥ ८ ॥

पालकश्च भवेन्नित्यं सत्त्वेनैव गुणेन तु ।
रजसा केवलेनैव सर्वस्रष्टा भवे द्विज ॥ ९ ॥

---

(१) ङ मायया, (२) क ख ईक्षके, (३) क ख ङ पाधिः ।

स्रष्टा ब्रह्मा हरिः प्रोक्तः पालकः सत्यवादिभिः ।
संहर्ता च[1] महेशानः शिवः साधारणः परः ॥१०॥
रजः सर्वत्र चोत्पत्तौ सत्त्वं सर्वत्र पालने ।
तमः सर्वत्र संहारे हेतुः स्यान्नात्र संशयः ॥११॥
यस्य यत्कारणं प्रोक्तं तस्य साक्षान्महेश्वरः ।
अधिष्ठानतया स्थित्वा[2] सदैवोपकरोति हि ॥१२॥
यस्य यत्कारणं प्रोक्तं तस्य माया जडात्मिका ।
परिणामितया विप्र सदैवोपकरोति हि ॥१३॥
पुण्यपापे च कालश्च वासना च मुनीश्वर ।
सृष्टिस्थित्यन्तकार्येषु सदैवोपकरोति हि ॥१४॥
त्रिमूर्तीनां[3] च सर्गस्यानन्तरं शब्दपूर्विका[4] ।
भूतसृष्टिर्यथापूर्वं मायया च[5] प्रवर्तते ॥१५॥
शब्दादिपञ्चभूतेभ्यो जायते कृतिशक्तयः ।
यथापूर्वं द्विजश्रेष्ठ रजसा[6] कालकर्मतः[7] ॥१६॥
शब्दादिपञ्चभूतेभ्यः पञ्च सत्त्वगुणेन तु ।
जायन्ते च यथापूर्वं मुनीन्द्र ज्ञानशक्तयः[8] ॥१७॥
शब्दादिपञ्चभूतेषु विजाता[9] ज्ञानशक्तयः ।
स्वकारणैकमायाख्याविद्यया कवलीकृताः ॥१८॥
एकाकारत्वमापद्य कालकर्मविपाकतः ।
व्यष्ट्यन्तःकरणानां तु समष्टिः स्यान्न संशयः ॥१९॥

---

(१) ग घ ङ तु, (२) ख विप्र, (३) ख त्रिमूर्तिना, (४) ग पूर्वका, घ पूर्वकात्, (५) ख ग घ तु ङ मायायास्तु, (६) जरसा, (७) क घ कामकारतः (८) ख ग घ ज्ञात, (९) ख विज्ञाना ।

शब्दादिपञ्चभूतेषु विजाताः [१]कृतिशक्तयः ।
एकाकारत्वमा[२]पद्य पूर्ववत् कालकर्मतः ॥२०॥
[३]व्यष्टिप्राणस्य सर्वस्य समष्टिः स्यान्न संशयः ।
शब्दादिपञ्चभूतस्थाः [४]सत्त्वजा ज्ञानशक्तयः ॥२१॥
ज्ञानेन्द्रियाणां सर्वेषां भवन्ति च समष्टयः ।
तथा शब्दादिभूतस्थाः क्रियारूपा[५]स्तु शक्तयः ॥२२॥
कर्मेन्द्रियाणां सर्वेषां भवन्ति च समष्टयः ।
चतुर्विधं समष्ट्यन्तःकरणं भवति द्विज ॥२३॥
मनोबुद्धिरहङ्कारश्चित्तं चै[६]त्तत्तथैव च ।
प्राणापानादिभेदेन पञ्चधा भवति द्विज ॥२४॥
समष्टिप्रा[७]णसंज्ञाश्च तेषामेवाभिमानिनः ।
हिरण्यगर्भसू[८]त्रात्मदिग्वास्वादित्यसंज्ञिताः ॥२५॥
वरुणश्च तथा भूमिस्तथा देवस्त्रिविक्रमः ।
इन्द्रश्चाग्निः प्रजानाथो मृत्यु[९]श्चन्द्रो बृहस्पतिः ॥ २६ ॥
कालाग्निरुद्रो भगवान् शिवा भोगप्रदायिनी ।
विशिष्टा विश्वसृष्टिश्च विश्वयोनिरजा जया[१०]॥ २७ ॥
सर्वाभिमानी भगवान् साम्बः सत्यादिलक्षणः ।
सर्वाभिमानिनं साम्बं संसारोदधितारकम् ॥ २८ ॥
स्वनाथं सु[११]प्तधीगम्यं विदित्वा मुच्यते जनः ।
तस्य देवस्य साम्बस्य ब्रह्मणा विष्णुनापि वा ॥ २९ ॥

---

(१) ग णेक्य, (२) ग कृत, क पाद्य, (३) क व्यष्टिः (४) क सत्वजातान, (५) घ च, (६) क ग घ चैव, (७) क शब्दश्च, (८) क ख सूत्रात्मा, (९) ङ घ मित्रः (१०) ग ज्ञया (११) ख सत्य ।

रूद्रेण वा स्मृतिः पूर्वैः[1] क्रियते च निरन्तरम् ।
माययास्माच्छिवादेव साम्बात्सत्यादिलक्षणात् ।। ३० ।।
अण्डभेदाश्च जायन्ते लोकभेदास्तथैव च ।
भोक्तृभोग्या[2]दिभे[3]दाश्च देवादीनां भिदा अपि ।। ३१ ।।
वर्णाश्रमादिभेदाश्च धर्माधर्मभिदा अपि ।
सुखदुःखादिभेदाश्च स्वर्गभूमिभिदा अपि ।। ३२ ।।
सर्वकारणमीशानः साम्बः सत्यादिलक्षणः ।
न विष्णुर्न विरिञ्चिश्च[4] न रुद्रो नापरःपुमान् ।। ३३ ।।
स एव सर्व वेदान्तैः सादरं प्रतिपाद्यते ।
वेदानुसारस्मृतिभिः पुराणैर्भारतादिभिः ।। ३४ ।।
श्रौतस्मार्तसमाचारैः स एवाराध्यते द्विजैः ।
तच्छेषत्वेन चाराध्यास्तदन्याः सकला अपि ।। ३५ ।।
क्वचित्कदाचिद्वे[5]देषु तदन्याः सर्वदेवताः ।
ज्ञेयत्वेनैव चोच्यन्ते ध्येयत्वेन तथैव च ।। ३६ ।।
तच्च तद्रूपतस्तेषामुच्यते न कदाचन ।
किन्तु साम्बस्य रुद्रस्य शिवस्यैवान्वयेन हि ।। ३७ ।।
स्मृतयश्च पुराणानि भारतादीनि सत्तम ।
शिवमेव सदा साम्बं हृदि कृत्वा ब्रुवन्ति हि ।। ३८ ।।
शिवशङ्कररुद्रेशब्रह्मेशानादिनामभिः ।
श्रुतिस्मृतिपुराणाद्यैरुच्यते परमं पदम् ।। ३९ ।।
विष्णुनारायणाद्यैस्तु नामभिः सकलैरपि ।
श्रुतिस्मृतिपुराणाद्यैर्नोच्यते परमं पदम् ।। ४० ।।

---

(१) ङ सर्वैः (२) क भोग्चाश्च (३) क भेदादि (४) ख स्यात्
(५) ख देशेषु ।

रूढ्या [1]रुद्रादिशब्दास्तु वर्तन्ते परमेश्वरे ।
योगवृत्त्यैव [2]विष्ण्वादिशब्दाः सत्यमुदीरितम् ।। ४१ ।।

सर्वमूर्तिष्वयं [3]साक्षी साम्बः सत्यादिलक्षणः ।
[4]लक्ष्यभूतस्थितः साक्षात् तदधीनमिदं जगत् ।। ४२ ।।

विहाय तं महाभ्रान्त्या ब्रह्मविष्ण्वादिदेवताः ।
परतत्त्वतया वेदा वदन्तीति ब्रुवन्ति च ।। ४३ ।।

तथा स्मृतिपुराणानि भारतप्रमुखानि च ।
वदन्ति मायया मर्त्याः सा माया दुस्तरा खलु ।। ४४ ।।

महापापवतां नृणां शिवः सत्यादिलक्षणः ।
परतत्त्वतया साम्बः सर्वथा[5] न विभासते ।। ४५ ।।

अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम् ।
परतत्त्वतया भाति शिवः साम्बः सनातनः ।। ४६ ।।

शिवदृष्टिस्तु सर्वत्र कर्तव्या सर्वजन्तुभिः ।
राजदृष्टिर्यथामात्ये क्रियते सर्वजन्तुभिः ।। ४७ ।।

राजाधिराजः सर्वेषां त्र्यम्बकस्त्रिपुरान्तकः ।
तस्यैवानुचराः सर्वे ब्रह्मविष्ण्वादयः सुराः ।। ४८ ।।

मुक्तिहेतुपरिज्ञानं तत्प्रसादेन केवलम् ।
नैव विष्ण्वादिदेवानां प्रसादेन न संशयः ।। ४९ ।।

विहाय साम्बमीशानं यजन्ते ये विमुक्तये ।
ते महातमसाक्रान्ता न तेषां परमा गतिः ।। ५० ।।

विहाय साम्बमीशानं यजन्ते देवतान्तरम् ।
ते महाघोरसंसारे पतन्ति परिमोहिताः ।। ५१ ।।

---

१. ख शिवादि २. ख विद्यादि, ३. क साक्षात्, ४. क लक्ष ५. ख सर्वस्थाने,

महादेवस्य साम्बस्य शेषत्वेनैन केवलम् ।
देवताः सकला ध्येया सुविज्ञेया मनीषिभिः[1] ॥ ५२ ॥

सर्वमन्यत्परित्यज्य शिव एव शिवङ्करः ।
ध्येय इत्याह परमा श्रुतिराथर्वणी खलु ॥ ५३ ॥

अथ किं बहुनोक्तेन शिवः साम्बः सनातनः ।
साक्षान्निष्ठा हि शास्त्राणां नापरः सत्यमीरितम् ॥ ५४ ॥

तदन्यत्सकलं विश्वं स हि विश्वाधिकः शिवः ।
स एव [2]जगतां नाथः स हि संचारमोचकः ॥ ५५ ॥

इति सकलं कथितं मया तथैव,
श्रुतिवचसा कथितं यथा तथैव ।
यदि विदितं भवता विमुक्तिसिद्धिः,
[3]परमतराभिमता [4]करस्थितैव ॥ ५६ ॥

इत्युपपुराणे पाराशरे द्वितीयोऽध्यायः ॥ २ ॥

१. ङ महामुने । २. ङ ग घ जगतो, ३. ख तराधिगता, ४. घ करस्थ एव

अथ तृतीयोऽध्यायः

[1]श्रीपराशर उवाच

अथातः संप्रवक्ष्यामि देवताधिक्यमादरात् ।
यस्य विज्ञानमात्रेण प्रसीदति महेश्वरः ॥ १ ॥
अचेतनेभ्यः सर्वेभ्यश्चेतना अधिका [2]मुने ।
चेतनेषु [3]मनुष्याश्च मनुष्येष्वधिका द्विजाः ॥ २ ॥
द्विजेषु ब्राह्मणास्तेषु कुलीना अधिकाः स्मृताः ।
तेभ्यो [4]मनुष्यगन्धर्वा अधिका [5]वेदवित्तम ॥ ३ ॥
तेभ्योऽपि देवगन्धर्वाः पितरश्च ततः [6]परम् ।
कर्मदेवसमाख्याश्च तथा देवास्ततः [7]परम् ॥ ४ ॥
तेभ्य इन्द्रोऽधिकस्तस्मादधिकस्तु वृहस्पतिः ।
वृहस्पतेरपि प्राज्ञः प्रजानाथोऽधिकस्ततः ॥ ५ ॥
प्रजापतेरपि ब्रह्मा ब्रह्मणो विष्णु[8]रास्तिक ।
विष्णोरपि [9]हरस्तस्मान्मायी साक्षान्महेश्वरः ॥ ६ ॥
ततोऽधिकतरः साक्षाच्छिवः साम्बः सनातनः ।
तदन्यद्विश्वमीशानः स तु विश्वाधिकः शिवः ॥ ७ ॥
यानि वेदान्तवाक्यानि तानि सर्वाणि सत्तम ।
विश्वाधिकपराण्येव नैव विश्वपराणि हि ॥ ८ ॥
तथा स्मृतिपुराणानि भारतादीनि चास्तिक ।
शास्त्रान्तराणि तर्काश्च श्रुत्यनुग्राहकास्तथा ॥ ९ ॥

---

१. क ख ग पराशर, २. क स, ३. कमे मनुष्याश्च, ख मनुष्याश्च मनुष्येभ्योऽधिका, ४. क मनुष्या गन्धर्वाः, ५. क वेदवित्तमाः, ६. क ख परे, ७. क परे, ८. घ रास्तिकाः, ९. ग घ हरे ।

विना साक्षाच्छिवं साम्बं प्रमाणान्यखिलान्यपि ।
विश्वाधिकतया नान्यं प्रवदन्ति कदाचन ॥ १० ॥

माहेश्वरपुराणानि समस्तानि महामुने ।
असाधारणया मूर्त्या नाम्ना साधारणेन च ॥ ११ ॥

वदन्ति परमं तत्त्वं शिवं साम्बं त्रिलोचनम् ।
नृत्यन्तं स्वपरानन्द [1]प्रमोदं चन्द्रशेखरम् ॥ १२ ॥

त्रिमूर्त्तीनां हरं [2]वापि तदंशं तस्य वैभवम् ।
तदंशस्यापि मानं च वदन्ति च महामुने ॥ १३ ॥

वैष्णवानि पुराणानि समस्तानि महामुने ।
त्रिमूर्तीनां हरेर्नाम्ना मूर्त्या तस्य परं पदम् ॥ १४ ॥

प्रवदन्ति पुराणे द्वे ब्राह्मे चैवानया दिशा ।
आग्नेयं च तथा सौरं पुराणं पण्डितोत्तम ॥ १५ ॥

अष्टादशपुराणानां निष्ठा काष्ठा महेश्वरः ।
गुणाभिमानिनो नैव ब्रह्मविष्णुमहेश्वराः ॥ १६ ॥

वैष्णवानि पुराणानि त्रिमूर्तीनां हरेरपि ।
तदंशस्य तदंशस्य वैभवं च वदन्ति वै[3] ॥ १७ ॥

योऽपकर्षो हरेर्दृष्टः शाम्भवेष्वखिलेषु च ।
पुराणेषु हरेः साक्षान्मूलभूतस्य सत्तम ॥ १८ ॥

वैष्णवेषु पुराणेषु योऽपकर्षस्तु[4] दृश्यते ।
रुद्रस्यासौ हरस्यास्य [5]विभूतिरेव [6]केवलम् ॥ १९ ॥

उत्कर्षो यः पुराणेषु [7]दृश्यते शाम्भवेषु च ।
रुद्रस्यासौ स्वरूपेण मुने तत्त्वात्मनापि च ॥ २० ॥

---

१. ङ ग प्रमोदात्, २. ङ ग घ चापि, ३. ङ हि, ४. ग घ सु, ५. ङ ग घ विभूतेरेव, ६. क केवला, ७. क वैष्णवेष्वखिलेषु च ।

उत्कर्षो यः पुराणेषु वैष्णवेष्वखिलेषु च ।
असौ तत्त्वात्मना विष्णोर्न स्वरूपेण सत्तम ।। २१ ।।

एवं पुराणयोः साक्षाद् ब्रह्मणो दर्शिता च दिक् ।
पावकस्य पुराणे च तथा सौरे च [1]सत्तम ।। २२ ।।

आधिक्यं देवदेवस्य शिवस्य परमात्मनः ।
अविज्ञाय [2]नरो विष्णुं वरिष्ठं मन्यते [3]भ्रमात् ।। २३ ।।

रुद्राधिक्यमविज्ञाय ब्रह्मनारायणौ पुरा ।
अहं ब्रह्म त्वहं [4]चेति विभ्रान्त्या [5]कुरुतां रणम् ।। २४ ।।

क्रोधेन महता युक्तो ब्रह्मा सर्वजगत्पतिः ।
शशाप विष्णुं गर्भस्थो भव त्वमिति मोहितः ।। २५ ।।

तद्भक्ता ब्राह्मणाः साक्षात् त्रिपुण्ड्रे भस्मगुण्ठने ।
भवेयुर्विमुखा नित्यं वेदसिद्धे विमुक्तिदे ।। २६ ।।

त्रिशूले चतुरस्रे च वेणुपत्रोपमे तथा ।
पुण्ड्रान्तरे रता नित्यं भवेयुस्तान्त्रिका द्विजाः ।। २७ ।।

आयुधैः शङ्खचक्राद्यैस्त्वदीयैरङ्किता द्विजाः ।
अग्नितप्तैर्महामोहात् भवेयुश्चांसयोर्द्वयोः ।। २८ ।।

वेदसिद्धेन मार्गेण त्वदीयाराधने द्विजाः ।
त्वद्भक्ता विमुखा नित्यं भवेयुः परिमोहिताः ।। २९ ।।

त्वदीये पञ्चरात्रे च तन्त्रे भागवते तथा ।
दीक्षिताश्च द्विजा नित्यं भवेयुर्निर्भया हरे ।। ३० ।।

श्रौतस्मार्तसदाचारे सद्यो मुक्तिकरे शुभे ।
त्वद्भक्ता विमुखा नित्यं भवेयुः परिमोहिताः ।। ३१ ।।

---

१. ख सत्तमाः, २. ङ नरा, ३. ङ मन्वते, ४. क वेति, ५. क कुरुतो ।

[१]श्रीपराशर उवाच

इति शप्तो विरिञ्चेन विष्णुर्मोहवशङ्गतः ।
महाक्रोधेन संयुक्तः शशाप चतुराननम् ॥ ३२ ॥

श्रीविष्णुरुवाच

शङ्करेण भवेच्छिन्नं त्वदीयं पञ्चमं शिरः ।
पङ्कजोद्भव केनापि कारणेनाचिरेण तु ॥ ३३ ॥
त्वद्भक्ता ब्राह्मणा लोके क्षत्रिया वैश्यसम्भवाः ।
शूद्राश्च सङ्करा नित्यं भवेयुश्च पितामह ॥३४ ॥
तन्त्रं त्वदीयं विच्छिन्नं भवेत्सर्वत्र सर्वदा ।
न भवेत् त्वत्प्रतिष्ठा च स्वतन्त्रा पद्मसम्भव ॥ ३५ ॥

[२]श्रीपराशर उवाच

एवं प्रस्खलितौ मोहात्तावप्यभवतां द्विज ।
अविज्ञाय शिवाधिक्यमहो मोहस्य वैभवम् ॥ ३६ ॥
आधिक्यं सर्वदेवेभ्यो मनुते शङ्करस्य यः ।
[३]संसारसागरं [४]तीर्त्वा मुक्तिपारं स गच्छति ॥ ३७ ॥
रुद्रं विश्वाधिकं साक्षात्सर्वदा सर्वसाक्षिणम् ।
सर्वस्मादधिकं चैव मनुते स तु शङ्करः ॥ ३८ ॥
सर्वस्मादधिकत्वं ये न वदन्ति पिनाकिनः ।
सममन्यैर्वदन्त्येनं ते महापातकैर्युताः ॥ ३९ ॥
आधिक्यं सर्वमन्त्राणां यथा वेदस्य विद्यते ।
तथा रुद्रस्य देवानामाधिक्यं विद्यतेऽनघ ॥ ४० ॥

१. क ख ग पराशर, २. ख ×, ३. घ सागरे, ४. ख घ ङ तीर्णः ।

इति सकलश्रुतिसार आदरात्,[1]
तव कथितः कृपयैव केवलम् ।
शुक हृदये प्रतिभाति चेदयं,
तरति जनः स्वकशोकसागरम् ॥ ४१ ॥

इत्युपपुराणे पाराशरे तृतीयोऽध्यायः ॥ ३ ॥

(१) क ग तरतो

अथ चतुर्थोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि देवतालिङ्गमादरात् ।
यस्य विज्ञानमात्रेण प्रसीदति महेश्वरः ॥ १ ॥
देवता द्विविधाः प्रोक्ताः श्रौताश्रौतविभागतः ।
[1]श्रौतधर्मैकनिष्ठानां श्रुतिसिद्धा हि देवताः ॥ २ ॥
अश्रौतधर्मनिष्ठानां श्रुतिसिद्धाः न देवताः ।
अश्रौतधर्मनिष्ठानां अश्रौता एव देवताः ॥ ३ ॥
श्रौतधर्मैकनिष्ठानां लिङ्गं तु श्रौतमेव हि ।
अश्रौतधर्मनिष्ठानामश्रौतं लिङ्गमीरितम् ॥ ४ ॥
देवता वेदसिद्धा यास्तासां लिङ्गं तु वैदिकम् ।
[2]अश्रौततन्त्रनिष्ठा यास्तासामश्रौतमेव हि ॥ ५ ॥
श्रौतलिङ्गं तु विज्ञेयं त्रिपुण्ड्रोद्धूलनात्मकम् ।
अश्रौतमूर्ध्वपुण्ड्रादि नैव तिर्यक् त्रिपुण्ड्रकम् ॥ ६ ॥
वेदसिद्धो महादेवः साक्षात्संसारमोचकः ।
उमार्धविग्रहः शुद्धश्चन्द्रार्धकृतशेखरः ॥ ७ ॥
लोकानामुपकाराय श्रौतलिङ्गं दधाति [3]च ।
वेदसिद्धस्य विष्णोश्च श्रौतं लिङ्गं न चेतरत् ॥ ८ ॥
प्रादुर्भावविशेषाणामपि तस्य तदेव हि ।
[4]ब्रह्मणो [5]वेदसिद्धस्य श्रौतंलिङ्गं न चेतरत् ॥ ९ ॥
प्रादुर्भावविशेषाणामपि तस्य तदेव हि ।
देवता वेदसिद्धा यास्तासां लिङ्गं तु वैदिकम् ॥ १० ॥

---

१. क ख सिद्धानाम् २. ख मन्त्र ३. घ यः, ४. क ब्राह्मणो, ५. क सिद्धश्च ।

प्रादुर्भावविशेषाणामपि तासां तदेव हि ।
तन्त्रसिद्धो महादेवस्तन्त्रसिद्धेन वर्त्मना ॥ ११ ॥
दधाति भस्मना तिर्यक् त्रिपुण्ड्रं भक्तवत्सलः ।
तन्त्रसिद्धो महाविष्णुस्त्रिशूलं वोर्ध्वपुण्ड्रकम् ॥ १२
दधाति भक्तरक्षार्थं ललाटे चतुरस्रकम् ।
तन्त्रसिद्धो विरिञ्चिश्च वर्तुलं तन्त्रवर्त्मना ॥ १३ ॥
दधाति भक्तरक्षार्थं ललाटे करुणानिधिः ।
इन्द्रादिदेवतानां च वज्रपाशाङ्कुशादयः ॥ १४ ॥
लिङ्गत्वेनैव निर्दिष्टास्तन्त्रोक्तेनैव वर्त्मना ।
तन्त्रनिष्ठः शिवे भक्तस्तन्त्रसिद्धेन वर्त्मना ॥ १५ ॥
त्रिपुण्ड्रं धारयेन्नित्यं ललाटे भस्मनैव तु ।
तन्त्रनिष्ठा तथा [1]विष्णोर्भक्तस्तन्त्रोक्तवर्त्मना ॥ १६ ॥
त्रिशूलं चतुरस्रं वा धारयेदूर्ध्वपुण्ड्रकम् ।
तन्त्रनिष्ठस्तथा नित्यं भक्तः साक्षाच्चतुर्मुखे ॥ १७ ॥
ललाटे वर्तुलं भक्त्या धारयेत् तन्त्रवर्त्मना ।
इन्द्रादिदेवताभक्तस्तन्त्रनिष्ठस्तथा स्थितः ॥ १८ ॥
ललाटे धारयेन्नित्यं वज्रपाशाङ्कुशादिकम् ।
तान्त्रिकाणां च सर्वेषां भस्मनैव त्रिपुण्ड्रकम् ॥ १९ ॥
वरिष्ठं स तु लिङ्गेभ्यः सत्यमेव न संशयः ।
तन्त्रनिष्ठो महादेवे भक्तस्तिर्यक् त्रिपुण्ड्रकम् ॥ २० ॥
विना पुण्ड्रान्तरं मोहाद्धारयन्नारकी भवेत् ।
ललाटे भस्मना तिर्यक् त्रिपुण्ड्रं यत्तु तन्मया ॥ २१ ॥
लिङ्गं माहेश्वरं प्रोक्तं वैष्णवं ब्राह्ममेव च ।
शैवं भागवतं ब्राह्मं यल्लिङ्गं परिकीर्तितम् ॥ २२ ॥

१. ख विष्णौ

वैदिकस्तल्ललाटे तु धारयेन्न कदाचन ।
महापापवतां नृणां वेदसिद्धे महेश्वरे ॥ २३ ॥
त्रिपुण्ड्रोद्धूलनादौ च [१]प्रद्वेषश्च प्रजायते ।
यस्य स्यात् पितरि द्वेषः शिवे वा जगतां गुरौ ॥ २४ ॥
उत्पत्तौ तस्य साङ्कर्यमनुमेयं विपश्चिता ।
वेदमार्गसमं मार्गमितरं मनुते तु यः ॥ २५ ॥
अधिकं [२]चास्य साङ्कर्यमनुमेयं विपश्चिता ।
शिवरुद्रमहादेवब्रह्मेशानादिनामभिः ॥ २६ ॥
समं विष्णवादिशब्दं यो मनुते स हि सङ्करः ।
यस्य स्याद् भस्मनि द्वेषस्त्रिपुण्ड्रोद्धूलनेऽपि च ॥ २७ ॥
उत्पत्तौ तस्य साङ्कर्यमनुमेयं विपश्चिता ।
महादेवाधिकं विष्णुं मनुते यस्तु मानवः ॥ २८ ॥
तस्य वंशस्य साङ्कर्यमनुमेयं विपश्चिता ।
पापानामपि बाहुल्याद्दधीचस्य च शापतः ॥ २९ ॥
गौतमस्य मुनेः शापात् श्रौतं लिङ्गं न रोचते ।
प्रत्युत भ्रान्तिविज्ञानादश्रौते चोर्ध्वपुण्ड्रके ॥ ३० ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः कुर्वन्ति चापरे ।
अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम् ॥ ३१ ॥
वेदोक्तेनैव मार्गेण त्रिपुण्ड्रे जायते रतिः[३] ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रं चावगुण्ठनम् ॥ ३२ ॥
यस्य सिध्येत्प्रयत्नेन [४]ब्राह्मण्यं तस्य पुष्कलम् ।
वेदवेदान्तनिष्ठानां भस्मनैव त्रिपुण्ड्रकम् ॥ ३३ ॥
[५]सम्यक् ज्ञानप्रदं शीघ्रं सत्यमुक्तं न संशयः ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ३४ ॥

---

१. ख 'प्रद्वेषश्च' × २. ङ ग घ वास्य, ३. ख मतिः, ४. क ख ब्राह्मण्यम्, ५. क ज्ञानप्रदं च शीघ्रं च ।

महापातकसङ्घाततमसश्चण्डभास्करः ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ३५ ॥
सर्वपापहरं प्रोक्तं सत्यमेव न संशयः ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ३६ ॥
[1]शिवस्य विष्णोर्देवानां ब्रह्मणस्तृप्तिकारणम् ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ३७ ॥
पार्वत्याश्च महालक्ष्म्या भारत्यास्तृप्तिकारणम् ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ३८ ॥
विना [2]मुक्तिर्मनुष्याणां देवानां च न सिध्यति ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ३९ ॥
विना वेदान्तविज्ञानं जायते नैव कस्यचित् ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ४० ॥
विना वेदोदिताचारः स्मार्तश्चानर्थकारणम् ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ४१ ॥
सतां मार्गतया प्राज्ञाः प्रवदन्ति महर्षयः ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ४२ ॥
वर्णधर्मतया प्राज्ञाः प्रवदन्ति महर्षयः ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ४३ ॥
आश्रमाणां च सर्वेषां धर्मत्वेनाहुरास्तिकाः ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ४४ ॥
रक्षार्थं मङ्गलार्थं च प्रवदन्ति महर्षयः ।
[3]बहुनात्र किमुक्तेन सर्वसिद्धिकरं परम् ॥ ४५ ॥

१. क शिवविष्णोश्च ×, २. क भक्ति, ३. क बहुना तु ।

[1]त्रिपुण्ड्रधारणं कुर्यात् मुक्तिमिच्छति यः पुमान् ।
बहुनात्र किमुक्तेन सर्वसिद्धिकरं परम्[2] ॥ ४६ ॥

त्रिपुण्ड्रधारणं मुक्त्वा मुक्तिमिच्छति यः पुमान् ।
विषपानेन नित्यत्वं कुरुते ह्यात्मनो हि सः ॥ ४७ ॥

अतस्त्रिपुण्ड्रं रचयेत वैष्णवं,
ब्राह्मं च शैवं मनुजः सदैव तु ।
विमुक्तिकामस्तु सितेन भस्मना,
श्रुतिप्रसिद्धेन हि वर्त्मना मुदा ॥ ४८ ॥

इत्युपपुराणे [3]पाराशरे चतुर्थोऽध्यायः ॥ ४ ॥

१. ख ग घ × त्रिपुण्ड्र······परम्, २. ङ ÷ —श्लोक एव नास्ति, ३. घ × पाराशरे ।

अथ पञ्चमोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि श्रुतीनामर्थसङ्ग्रहम् ।
यस्य विज्ञानमात्रेण प्रसीदति महेश्वरः ॥ १ ॥

सर्वेषामेव जन्तूनां महादेवो महेश्वरः ।
स्रष्टा भर्ता च संहर्त्ता जगतश्चाखिलस्य च ॥ २ ॥

तत्समो नाधिकश्चास्ति चेतनः स परात्परः ।
स एव रुद्रविष्ण्वादिरूपेण बहुधा स्थितः ॥ ३ ॥

स एव सत्यविज्ञानपूर्णानन्दैकलक्षणः ।
[1]अम्बिकासहितो नित्यमसाधारणया सदा ॥ ४ ॥

अम्बिकासहितो नित्यं नीलकण्ठस्त्रिलोचनः ।
प्रसादं कुरुते नित्यं शङ्करः सर्वदेहिनाम् ॥ ५ ॥

ब्रह्मविष्ण्वादिदेवानां सृष्टिस्थित्यन्तकर्तृता ।
भोगमोक्षप्रदत्वं च [2]शिवस्यास्य प्रसादतः ॥ ६ ॥

अस्य विज्ञानमात्रेण विमुक्तिः सर्वदेहिनाम् ।
कर्मणा न च नोभाभ्यामिति तत्त्वविदां स्थितिः ॥ ७ ॥

ज्ञानमोक्षप्रदं साक्षाद् वेदान्तश्रवणादिना ।
जायन्ते परिशुद्धस्य प्रसादादस्य देहिनः ॥ ८ ॥

वेदोदितेन मार्गेण [3]भस्मनोद्धूलनेन च ।
त्रिपुण्ड्रधारणेनैव ज्ञानं सम्यक् विजायते ॥ ९ ॥

यज्ञदानतपःकर्म कर्त्तव्यं सर्वचेतनैः ।
वेदोक्तं [1]चित्तशुद्ध्यर्थं परया श्रद्धया सह ॥ १० ॥

---

(१) ग ध ङ आज्ञया, (२) क शिवस्य च, (३) क भस्मनोद्धूलितेन ।

[2]वर्णाश्रमसदाचारः श्रौतः स्मार्तश्च सत्तमैः ।
सर्वथा न परित्याज्यः कर्त्तव्यः श्रेयसे सदा ।। ११ ।।

मनुष्याणां च सर्वेषां [3]जम्बूद्वीपनिवासिनः ।
[4]वरिष्ठास्तेषु सर्वेषु वरिष्ठा आन्तरालजाः ।। १२ ।।

आन्तरालोद्भवेभ्यस्तु वरिष्ठाः प्रतिलोमजाः ।
तथा तेभ्यश्च सर्वेभ्यो वरिष्ठा अनुलोमजाः ।। १२ ।।

सङ्करप्रभवेभ्यश्च वरिष्ठा वर्णसम्भवाः ।
तेषु वैश्यो वरः शूद्राद्वैश्याद्राजा वरः स्मृतः ।। १३ ।।

राज्ञो विप्रो वरो विप्राद् वरिष्ठो नास्ति कश्चन ।
विप्रः [5]समस्तमर्त्यानां देवता हि न संशयः ।। १४ ।।

विप्रादपि च भूदेवाद्वरिष्ठा देवताः स्मृताः ।
देवताभ्यः [6]समस्ताभ्यः स्रष्टा ब्रह्मा वरः स्मृतः ।। १५ ।।

ब्रह्मणश्च महाविष्णुर्वरिष्ठः सर्वपालकः ।
विष्णोरपि वरः[7] साक्षाद्रुद्रः संहारकारणम् ।। १६ ।।

सर्वेषामपि देवानां वरिष्ठः परमेश्वरः ।
वरिष्ठयोर्हि सम्बन्धो युज्यते हि परस्परम् ।। १७ ।।

ततो विप्रस्य सम्बन्धः शिवेनैव [8]हि युज्यते ।
शङ्करः सर्वदेवाश्च वृषलस्तु पुरन्दरः ।। १८ ।।

पितामहस्तु वैश्यश्च क्षत्रियः परमो हरिः ।
ब्राह्मणो भगवान् रुद्रः सर्वेषामुत्तमोत्तमः ।। १९ ।।

ब्रह्मभूतस्य रुद्रस्य ब्राह्मण्यं नैव हेतुजम् ।
ब्राह्मणो वै सदा लोके [9]ब्राह्मणं तूपधावति ।। २० ।।

---

१. ग घ शुद्ध्यर्थे, २. क सदाचारश्रौतस्मार्तश्च, ३. क निवासिनां, ४. ख वरिष्ठ
५. ख वर्णानां, ६. ख × समस्ताभ्यः, ७. ङ हरः ८. ग घ तु, ९. ङ ब्राह्मणानुपधावति

नेतरं क्षत्रियं वैश्यं शूद्रं चापि[1] न संशयः ।
[2]तस्मात् वैधेन मार्गेण विज्ञातो ब्राह्मणः सदा ।। २१ ।।
महाब्राह्मणमीशानमुपगच्छेन्न [3]चेतरान् ।
सर्वात्मभूतमात्मानं विरूपाक्षं द्विजोत्तमम् ।। २२ ।।
यस्तु नोपैति साङ्कर्यं तस्यास्त्येव न संशयः ।
ब्राह्मणेनादिभूतेन शिवेन परमात्मना ।। २३ ।।
आदरेण धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ।
ब्राह्मणो [4]विधिनोत्पन्नं त्रिपुण्ड्रम्भस्मनैव तु ।। २४ ।।
ललाटे धारयेन्नित्यं तिर्यक् भस्मावगुण्ठनम् ।
ब्राह्मणानामयं धर्मो[5] यत्त्रिपुण्ड्रस्य धारणम् ।। २५ ।।
मन्त्रध्यानादिसंयुक्तं नैव वर्णान्तरस्य तु ।
आदि ब्राह्मणभूतेन त्रिपुण्ड्रं भस्मना धृतम् ।। २६ ।।
यतोऽत्र एव विप्रस्तु त्रिपुण्ड्रं धारयेत् सदा ।
श्रौतस्मार्तसदाचारैर्ब्राह्मणः [6]परमेश्वरम् ।। २७ ।।
महाब्राह्मणमीशानमुपगच्छेत्सदैव तु ।
तच्छेषत्वेन विष्णवादिदेवानप्यास्तिकोत्तम ।। २८ ।।
उपगच्छेत्सदा विप्रो न प्रधानतया सदा ।
आदिब्राह्मणभूतस्य धर्मं तिर्यक् त्रिपुण्ड्रकम् ।। २९ ।।
ब्राह्मणो धारयेन्नित्यं मुक्तिभुक्तिफलप्रदम् ।
महादेवस्य सम्बन्धात्तद्धर्मैरस्ति सङ्गतिः ।। ३० ।।
ततस्त्रिपुण्ड्रधर्मं च ब्राह्मणो नित्यमाचरेत् ।। ३१ ।।

इत्युपपुराणे पाराशरे पञ्चमोऽध्यायः ।। ५ ।।

१. ङ वात्र ३. क ख वैदेन, २. ङ चेतरत् ४. ख विधिनोत्पन्नास्त्रिपुण्ड्रं विधिनैव तु,
५. क यः ६. क परमेश्वरः ।

अथ षष्ठोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि शुक ते गुह्यमुत्तमम् ।
ब्राह्मणानां विशेषेण ज्ञातव्यमिदमुत्तमम् ।। १ ।।

प्रत्यक्षवेदसिद्धोऽर्थः सङ्ग्राह्यः सर्वचेतनैः ।
अप्रत्यक्षं श्रुतेरर्थं स्मरन्ति [1]मुनिसत्तमाः ।। २ ।।

क्वचित्कदाचित्तत्त्वार्थं कटाक्षेण मुनीश्वराः ।
अधिकारिविशेषाणां प्रवदन्त्यर्थमास्तिकाः ।। ३ ।।

शिवागमानुसारेण [2]प्रवदन्ति क्वचित्क्वचित् ।
विष्णवागमानुसारेण ब्राह्मतन्त्रानुसारतः ।। ४ ।।

जन्मना लब्धजातीनां [3]सर्वेषामास्तिकोत्तम ।
आश्रमाणां च सर्वेषां धर्ममाह परा श्रुतिः ।। ५ ।।

स्मृतयश्च पुराणानि भारतप्रमुखान्यपि ।
क्वचित्कदाचिद् भ्रष्टानां [4]वेदधर्मान् ब्रुवन्ति च ।। ६ ।।

जन्मना लब्धजातीनामाश्रमाणां तथैव च ।
प्राधान्येन महादेवः पूज्यो [5]नान्योऽस्ति सिद्धये ।। ७ ।।

तत्प्राप्त्यर्थं महाविष्णुः सर्वैः पूज्यः सनातनः ।
पितामहोऽपि सर्वात्मा तदर्थं पूज्य एव हि ।। ८ ।।

देवता उत्तमाः सर्वा मध्यमा अधमा अपि ।
तदर्थं पूजनीयाश्च सर्वजात्याश्रमैरपि ।। ९ ।।

---

१. क ङ मुनिसत्तम, २. क वदन्ति च, ३. ख सर्वासां, ४. ङ ग घ वेदाद्, ५. ग ज्ञानाप्तिसिद्धये, घ नान्याप्तिसिद्धये ।

वेदसिद्धेषु धर्मेषु त्रिपुण्ड्ं भस्मगुण्ठनम्[1] ।
रुद्रलिङ्गार्चनं चैव मुख्यमाहुर्द्विजास्तिकाः ॥ १० ॥
वर्णाश्रमपरिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः ।
[2]वेदे तथागमे[3] स्थित्वा तदुक्तं धर्म्ममाचरेत् ॥ ११ ॥
सर्वागमेषु निष्ठानां त्रिपुण्ड्[4] भस्मगुण्ठनम्[5] ।
वरिष्ठं सर्वलिङ्गेभ्य इति सत्यं मयोदितम् ॥ १२ ॥
नराणामुद्धृता जातिर्येषां तन्त्रोक्तवर्त्मना ।
ललाटे तैः सदा धार्यं भक्त्या लिङ्गान्तरं द्विज ॥ १३ ॥
जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः ।
लिङ्गान्तरं भ्रमाद्वापि ललाटे नैव धारयेत् ॥ १४ ॥
तिर्यक् त्रिपुण्ड्ं सन्त्यज्य श्रौतपुण्ड्रान्तरं भ्रमात् ।
ललाटे धारयेन्मर्त्यः पतत्येव न संशयः ॥ १५ ॥
भस्म श्रेयोऽर्थिभिः सर्वैर्जन्मना लब्धजातिभिः ।
धार्यं त्रिपुण्ड्रूपेण भस्मना [6]चावगुण्ठनम् ॥ १६ ॥
रुद्राक्षधारणं कार्यं सर्वैः श्रेयोऽर्थिभिर्नृभिः[7] ।
कर्णपाशे[8] शिखायां च कण्ठे हस्तेषु[9] चादरात् ॥ १७ ॥
महादेवश्च विष्णुश्च ब्रह्मा तेषां विभूतयः ।
देवाश्चान्ये तथा भक्त्या खलु रुद्राक्षधारिणः ॥ १८ ॥
पापिष्ठानां च सर्वेषां खलु रुद्राक्षधारणे ।
श्रद्धा न जायते साक्षाद् वेदसिद्धे विमुक्तिदे ॥ १९[10]॥
गोत्रर्षयश्च सर्वेषां कूटस्थाः शुक[11] लक्षिताः ।
वेदोक्तवर्त्मना नित्यं खलु रुद्राक्षधारिणः ॥ २०[12]॥

१,५,६. ङ कुण्ठनम्, २. .क ग घ वेडेतरागमे, ३. वेदेतरागमं गत्वा, ४. ख वरिष्ठं, ७. क नरैः, ८. क कर्णयोश्च, ९. ख ङ घ शुकादरात्, १०. ख ग घ २१, ११. ङ लालिता, १२ ख ग घ १९ ।

तेषां वंशप्रसूताश्च मुनयः सकला अपि ।
श्रौतधर्मपराः शुद्धाः खलु रुद्राक्षधारिणः ।। २१[१] ।।

बहूनां जन्मनामन्ते महादेवप्रसादतः ।
रुद्राक्षधारणे श्रद्धा स्वभावेनैव जायते ।। २२ ।।

वेदवेदान्तविज्ञाने वेदोक्ते चैव कर्मणि ।
वेदानुसारिशास्त्रोक्ते[२] श्रद्धा पुण्येन जायते ।। २३ ।।

वेदमार्गेतरे मार्गे स्वतन्त्रे [३]पापकर्मणाम् ।
नराणां जायते वाञ्छा स्वभावेनैव सत्तम ।। २४ ।।

वेदवादेतरासक्ता बहवो मुनिसत्तम ।
आज्ञया देवदेवस्य शिवस्य नरकं गताः ।। २५ ।।

वेदोदितसमाचारनिरता बहवो जनाः ।
प्रसादादेव रुद्रस्य विमुक्ता भवबन्धनात् ।। २६ ।।

यथा माता स्वपुत्राणां केवलं कृपयैव तु ।
रक्षिता तद्वदेवेयं श्रुतिः सर्वजनस्य तु ।। २७ ।।

यथा शत्रुजनः साक्षाद् बाधकः सर्वदेहिनाम् ।
तथा वेदेतरो मार्गो वैदिकस्य तु बाधकः ।। २८ ।।

तन्त्राणि तन्त्रनिष्ठानां रक्षकाण्यपि च क्रमात् ।
बाधकानि विशेषेण वेदमार्गैकवर्तिनाम् ।। २९ ।।

अतः श्रुत्युदितं धर्मं गृह्णीयादेव वैदिकः ।
तन्त्रसिद्धं न गृह्णीयान्मोहाद्वापि कदाचन ।। ३० ।।

यत्तु तन्त्रानुरोधेन कथितं तत्परित्यजेत् ।
धर्मशास्त्रे पुराणे च यत्नतो वैदिको जनः ।। ३१ ।।

इत्युपपुराणे पाराशरे षष्ठोऽध्यायः ।। ६ ।।

१. ख ग घ २०, २. ख शास्त्रे च, ३. ङ ख कर्मिणाम् ।

अथ सप्तमोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि ब्राह्मणस्य तु वैभवम् ।
यस्य विज्ञानमात्रेण प्रसीदति महेश्वरः ।। १ ।।

ब्राह्मणस्त्रिविधः प्रोक्तो जन्मना वेदवर्त्मना ।
ब्रह्मविद्याबलेनापि[1] यो यः पश्चात्स[2] उत्तमः ।। २ ।।

ब्राह्मण्यां ब्राह्मणेनैव वेदोक्तेनैव वर्त्मना ।
जायते यः स विज्ञेयो ब्राह्मणः प्रथमोदितः ।। ३ ।।

जन्मान्तरसहस्रेषु कृतपुण्यवशेन[3] तु ।
ब्राह्मणो जायते लोके [4]वेदघोषसमन्विते ।। ४ ।।

देवतानां प्रसादेन मानुष्यं लभते जनः ।
इन्द्रस्यैव प्रसादेन बृषलो जायते भुवि ।। ५ ।।

विरिञ्चस्य प्रसादेन कुले वैश्यस्य जायते ।
विष्णोश्चैव प्रसादेन कुले राज्ञो[5] विजायते ।। ६ ।।

महादेवप्रसादेन ब्राह्मणो जायते भुवि ।
ज्ञाननिष्ठो भवेद्विप्रो महादेवप्रसादतः ।। ७ ।।

रक्षकश्च भवेद् राजा महादेवप्रसादतः ।
वाणिज्यकृषको वैश्यो भवेद्रुद्रप्रसादतः ।। ८ ।।

शूद्रः शुश्रूषुरेव स्यात्प्रसादेन विजानताम् ।
प्रसादेन हि रुद्रस्य ब्राह्मणो ब्राह्मणो भवेत् ।। ९ ।।

यथा देवो महादेवो देवानामुत्तमोत्तमः ।
तथा विप्रो मनुष्याणां सर्वेषामुत्तमोत्तमः ।। १० ।।

---

१. ख ब्राह्म, २. क पश्यत्, ३. कृतपुण्यबलेन, क तत्तत्पुण्यवशेन, ४. क समन्वितः ५. समन्वितः ।

तपसा ब्राह्मणस्यैव जगदेतत् स्थितं भवेत् ।
नेतरस्यैव विप्रेन्द्र मया सत्यमुदीरितम् ।। ११ ।।

अभिषिक्तो [1]महाराज्ये ब्राह्मणस्यैव रक्षकः ।
विशेषेण भवेन्नित्यं वेदमार्गस्य चादरात्।। ।। १२ ।।

ब्राह्मणं [2]मोहतो वापि यः कुर्यादवगूरणम् ।
स स्वर्णेन शतेनैव दण्डचो राज्ञाविचारतः ।। १३ ।।

ब्राह्मणं [3]मोहतो वापि [4]प्रहरेद्यः स्वहस्ततः ।
स दण्ड्यश्चाविचारेण क्षत्रियेण [5]सुवर्णतः ।। १४ ।।

ब्राह्मणस्याकरोद्देहे लौहित्यं यस्तु मानवः ।
सोऽयुतेन सुवर्णेन दण्ड्यो राज्ञाविचारतः ।। १५ ।।

अस्त्रशस्त्रादिभिर्देहे ब्राह्मणस्याकरोत्क्षतिम्[6] ।
यस्तस्य[7] करविच्छेदं कुर्याद् राजाविचारतः ।। १६ ।।

न दाहयेद् द्विजश्रेष्ठं न दहेच्चक्रपूर्वकैः ।
अङ्कितो[8] यः स्वदेशात्तं राजा शीघ्रं प्रवासयेत् ।। १७ ।।

अतीव पतितानां हि स्वपदाद्यङ्कनं नृणाम् ।
विधीयते न शुद्धानामतः शुद्धं न चाङ्कयेत् ।। १८ ।।

वेदसम्बन्धतो यस्तु ब्राह्मणः परिकीर्तितः ।
नावमानं सदा कुर्यात्तस्य भ्रान्त्यापि मानवः ।। १९ ।।

अधीतवेदं मोहेन यः कुर्यादवगूरणम् ।
क्षत्रियं च तथा वैश्यं सोऽपि दण्डचस्तु पूर्ववत् ।। २० ।।

राजन्यवैश्यगोहिंसामकरोद्यस्तु मानवः ।
अधीतवेदो यो राज्ञा सोऽपि दण्ड्यस्तु पूर्ववत् ।। २१ ।।

---

१. ख मही २. क मोहितश्चापि ३. क मोहितो ४. ख प्रहरन्यं सहस्रशः, ग घ प्रहरन्यः सहस्ततः, ङ सहस्रतः ५. ङ विशेषतः ६. क कृतम् ७. क यस्तु तस्य करच्छेदं ८. घ अङ्कतो ।

यस्तु साक्षात्परंब्रह्म विद्यया ब्राह्मणोत्तमः ।
तस्यापि नावमानं तु प्रकुर्यान्मोहतोऽपि[1] वा ।। २२ ।।

तथा[2] न लोहितं कुर्यान्मोहतो[3] वापि मानवः ।
राजन्यवैश्ययोः कुर्याद्यदि दण्ड्यः स पूर्ववत् ।। २३ ।।

ब्रह्मनिष्ठं द्विजश्रेष्ठं वाचा निन्दन्ति ये नराः ।
हन्यात्तानविचारेण राजा राष्ट्रविवृद्धये ।। २४ ।।

ब्राह्मणो यः सितेनैव भस्मना चावगुण्ठितः ।
त्रिपुण्ड्रावलिभिर्दीप्तस्तं राजा परिरक्षयेत् ।। २५ ।।

भस्मसंच्छन्नसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ।
ये निन्दन्ति द्विजं राजा हन्यात्तानविचारतः ।। २६ ।।

अध्यापने चाध्ययने श्रौतस्मार्तेषु कर्मसु ।
सम्भाषणे च सम्बन्धे नाधिकारी च लाञ्छितः ।। २७ ।।

यज्ञोपवीतं दण्डं च सोदकं च कमण्डलुम् ।
लाञ्छनं ब्राह्मणस्याहुर्मुनयः सूक्ष्मदर्शिनः[4] ।। २८ ।।

वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ।
पवित्रमुपवीतं च त्रिपुण्ड्रोद्धूलनं [5]द्विजः ।। २९ ।।

एतादृशानि लिङ्गानि यस्य सन्ति द्विजन्मनः ।
सत्यमेव मया प्रोक्तं सफलं तस्य जीवितम् ।। ३० ।।

ऊर्ध्वपुण्ड्रं त्रिशूलं च वर्तुलं चतुरस्रकम् ।
अर्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत् ।। ३१ ।।

ब्राह्मणस्य शरीरे तु वर्तन्ते सर्वदेवताः ।
नावमानमतः कुर्यात्पूजयेत्तं विशेषतः ।। ३२ ।।

---

१. क मोहितो, २. ग यथा, ३. क ख मोहितो, ४. क दर्शना, ५. ख द्विज ।

महादेवस्य तुल्यं तु विद्यते यदि दैवतम् ।
ब्राह्मणस्यापि तुल्यस्तु विद्यते न हि संशयः ।। ३३ ।।

विप्रपादाम्बुजस्पर्शात् शुद्धा भूमिरियं भवेत् ।
तस्य दृष्टिं[१] गताः सर्वे मुच्यन्ते सर्वकिल्बिषात् ।। ३४ ।।

यथा मातरमाश्रित्य विवर्धन्ते[२] प्रजा इमाः ।
तथा ब्राह्मणमाश्रित्य जगदेतद्विवर्धते ।। ३५ ।।

बहुनोक्तेन किं साक्षात् ब्राह्मणः परदेवता ।
अवमानं सदा तस्य न कुर्यान्मोहितोऽपि[३] वा ।। ३६ ।।

इत्युपपुराणे पाराशरे सप्तमोऽध्यायः ।। ७ ।।

---

१. क ग दृष्टि, २. क प्रवर्धन्ते, ख विवर्धन्त इमाः प्रजाः, ३. क मोहतोऽपि ।

अथ अष्टमोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि श्रद्दधानस्य तेऽनघ ।
सर्ववेदरहस्यार्थं संसारोच्छेदकारणम्[1] ।। १ ।।

ज्ञानं कर्म च वेदान्तैर्वेदैश्च प्रतिपाद्यते ।
तात्पर्येण तयोर्ज्ञानं प्रधानं न हि संशयः ।। २ ।।

तत्र ज्ञानं द्विधा विप्र वेदितव्यं विचक्षणैः ।
एकं सात्क्षात्परं तत्त्वं जन्यमन्यत्तु कारणम्[2] ।। ३ ।।

विज्ञानपरतत्त्वाख्यं वेदान्तैः प्रतिपाद्यते ।
कारणोत्पन्नविज्ञानं तदर्थं प्रतिपाद्यते ।। ४ ।।

करणोत्पन्नविज्ञानं द्विधा लोके व्यवस्थितम् ।
एकं तत्त्वावेदकं तु ज्ञानमन्यन्मृषार्थकम् ।। ५ ।।

तत्त्वावेदकविज्ञानं ब्रह्मज्ञानं समाह्वयम् ।
वेदावसानवाक्येन केवलेनैव जायते ।। ६ ।।

येन सम्पादिता शान्तिर्महती नैव पण्डित ।
न तस्य ब्रह्मविज्ञानं जायते जन्मकोटिभिः ।। ७ ।।

येन सम्पादिता शान्तिर्महती पण्डितोत्तम ।
तस्यैव ब्रह्मविज्ञानं जायते नहि संशयः ।। ८ ।।

येन सम्पादिता नैव प्रव्रज्या पण्डितोत्तम ।
न तस्य ब्रह्मविज्ञानं जायते जन्मकोटिभिः[3] ।। ९ ।।

येन सम्पादिता विप्र प्रव्रज्या महती परा ।
तस्यैव ब्रह्मविज्ञानं जायते नहि संशयः ।। १० ।।

---

१. ग घ ङ संसारच्छेद, २. ग घ ङ कारणात्, ३. क नात्र संशयः, ख नहि संशयः ।

येन सम्पादिता नैव शुकैकाग्रमतिस्थिरा ।
न तस्य ब्रह्मविज्ञानं जायते जन्मकोटिभिः ।। ११ ।।
येन सम्पादिता पुंसा शुकैकाग्रमतिस्थिरा ।
तस्यैव ब्रह्मविज्ञानं जायते नेतरस्य तु ।। १२ ।।
उद्धूलनं त्रिपुण्ड्रं च येन नाचरितं मुदा ।
न तस्य ब्रह्मविज्ञानं जायते जन्मकोटिभिः ।। १३ ।।
उद्धूलनं त्रिपुण्ड्रं च[1] येनैवाचरितं मुदा ।
तस्यैव ब्रह्मविज्ञानं जायते ह्यचिरेण तु ।। १४ ।।
तस्मान्मुमुक्षुः सततं शान्तिदान्त्यादिभिः सह ।
उद्धूलनं त्रिपुण्ड्रं च श्रौतनित्यं समाचरेत् ।। १५ ।।
सर्ववेदान्तसंसिद्धसाधनैः सहितस्य तु[2] ।
जायते शुक विज्ञानं तेन मुक्तिर्न कर्मणा ।। १६ ।।
मृषार्थविषयं ज्ञानमतत्त्वावेदकाभिधम् ।
व्यवहारदशायां तु तन्मिथ्याज्ञानमुच्यते ।। १७ ।।
सत्यत्वेन महादेवो मायया यः[3] प्रकल्पितः ।
तदर्थविषयज्ञानं सम्यक् ज्ञानमितीर्यते ।। १८ ।।
यत्तु कल्पितसत्यार्थविषयं[4] ज्ञानमास्तिक ।
तत्तु संसारभोगाय शिवेनैव विनिर्मितम् ।। १९ ।।
नित्यकर्माणि सर्वाणि पारम्पर्यक्रमेण तु ।
मुक्तिहेतुपरिज्ञाने पर्यवस्यन्ति सुव्रत ।। २० ।।
वर्णाश्रमवयोऽवस्थाविशेषाध्यासवान्नरः ।
अधिकारी भवेन्नित्यं सर्वशास्त्रेषु सत्तमः[5] ।। २१ ।।

---
१. क येन चाचरितं, २. क तत्, ३. क यत्र कल्पितः, ४. घ सर्वार्थ, ५. ग घ सत्तम ।

वर्णाश्रमवयोऽवस्थाविशेषरहितात्मवित् ।
वर्तमानः श्रुतेर्मूर्ध्नि न भवेद् वेदकिङ्करः ॥ २२ ॥
अतः परमविज्ञानं साधयेदप्रमादतः ।
ज्ञानार्थं नित्यकर्माणि प्रकुर्याद् ब्राह्मणोत्तमः ॥ २३ ॥
वेदादन्यत्र विज्ञानं नास्ति नास्ति क्रिया शुभा ।
अतः परमकल्याणं वेदमेकं समाश्रयेत् ॥ २४ ॥
वेदमूलानि शास्त्राणि मन्वादीनि महान्ति च ।
पुराणादीनि सर्वाणि सादरं नित्यमाश्रयेत् ॥ २५ ॥
वेदमूलतया तानि प्रवृत्तान्यपि सत्तम ।
ब्रुवन्ति वेदा ब्रह्मार्थं कदाचिच्च क्वचित्क्वचित् ॥ २६ ॥
भाति प्रत्यक्षवेदेन यद् विरुद्धतया शुक ।
वैदिकैस्तत्परित्याज्यं नैव ग्राह्यं कदाचन ॥ २७ ॥
अक्षपादप्रणीते च काणादे सांख्ययोगयोः ।
त्याज्यः श्रुतिविरुद्धांशः श्रुत्येकशरणैर्नृभिः ॥ २८ ॥
पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥ २९ ॥
जैमिनीये च वैयासे विरुद्धांशो न कश्चन ।
श्रुत्वा वेदार्थविज्ञाने शुक पारङ्गतौ हि तौ ॥ ३० ॥
बौद्धमर्होदितं शास्त्रं लोकायतिकसंज्ञितम्[1] ।
पाषण्डमपरं[2] शास्त्रं वैदिकस्तु[3] परित्यजेत् ॥ ३१ ॥

इत्युपपुराणे पाराशरे अष्टमोऽध्यायः ॥ ८ ॥

---

१. ग घ संज्ञकम्, २. क पाषण्डपरमं, ३. क वैदिकैस्तु ।

अथ नवमोऽध्यायः

[१]श्रीपराशर उवाच

वक्ष्ये वेदविदां श्रेष्ठ शृणु सर्वं जगद्धितम् ।
ब्राह्मे मुहूर्ते[२] चोत्थाय शिवं साम्बं त्रिलोचनम् ॥ १ ॥
ध्यात्वा समाहितो भूत्वा धर्ममर्थं च चिन्तयेत् ।
कालेनैव च विण्मूत्रं त्यक्त्वा प्रक्षाल्य वारिणा ॥ २ ॥
गन्धलेपनिवृत्यन्तं मनःशुद्धयन्तमेव तु[३] ।
मुखप्रक्षालनं कृत्वा गण्डूषं चाम्भसः[४] पुनः ॥ ३ ॥
सकृदाचमनं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा ।
स्वदन्तशोधनं कृत्वा काष्ठेनैव यथाविधि ॥ ४ ॥
दन्तशुद्धिं प्रकुर्वाणः श्रियमाप्नोति पुष्कलाम्[५] ।
मध्यमाङ्गुलिना तुल्यं स्थौल्येन ब्रह्मवित्तम ॥ ५ ॥
दन्तकाष्ठं प्रगृह्णीयाद्धैर्येण द्वादशाङ्गुलम् ।
गृह्णीयात् सत्वचं सौम्यं क्षीरवृक्षसमुद्भवम् ॥ ६ ॥
मालतीसम्भवं[६] वापि करवीरमथापि वा ।
अपामार्गं तु वा बिल्वं शुष्कं सर्वं विवर्जयेत् ॥ ७ ॥
जिह्वाशुद्धिं पुनः कुर्यान्मन्द[७] काष्ठान्तरेण च[८] ।
भुक्त्वा[९] तु दन्तकाष्ठं च निखनेत् तत्स्थले शुभे ॥ ८ ॥
नोचेदश्रियमाप्नोति नात्र कार्या विचारणा ।
गण्डूषं[१०] दशकृत्वस्तु[११] प्रकुर्यादास्यशुद्धये ॥ ९ ॥

---

१. क पराशर, २. ग मुहूर्तं उत्थाय, ३. घ वा, ४. ख ग ङ चांभसा ५. ख निष्कलां, ६. ङ मालिनी, ७. क दन्त, ङ मन्दं, ८. क तु, ९. क भंक्त्वा, १०. ख ग घ गण्डूषान्, ११. क ख कृत्वा तु ।

आस्यशुद्धया तु वाग्देवी वाचि तस्य प्रकाशते ।
आचम्य प्रयतो भूत्वा स्नानं कुर्यान्न चान्यथा ॥ १० ॥
स्नानमाचमनोपेतं न स्नानमितरत्सदा ।
[1]स्नानभोजनवेलायां सन्ध्ययोरुभयोरपि ॥ ११ ॥
आचान्तः पुनराचामेदन्यत्र तु सकृत्सकृत् ।
महानदीषु शुद्धासु तडागे वा यथाविधि ॥ १२ ॥
[2]स्नायात्पापविशुद्धार्थं भस्मना वा [3]शिवेन तु ।
अग्निरित्यादिभिः मन्त्रैर्जाबालोक्तैश्च सप्तभिः ॥ १३ ॥
त्रिपुण्ड्रधारणं चापि तिर्यक्कुर्याल्ललाटके ।
जलस्नाने त्वशक्यश्चेद् मार्जयेदार्द्रवाससा ॥ १४ ॥
उत्तमाङ्गादिपादान्तं शुद्धेन मनसा सह ।
गवांघ्रिरजसा वापि स्नानं कुर्याद्विशुद्धये ॥ १५ ॥
सातपेनैव वर्षेण स्नायाद् वा मतिसत्तमः ।
आत्मविज्ञानतोयेन स्नात्वा मुच्येत बन्धनात् ॥ १६ ॥
अवगाहनरूपं तु स्नानं तद्वारुणं स्मृतम् ।
ब्राह्मं तु मार्जनं प्रोक्तमाग्नेयं भस्मना कृतम् ॥ १७ ॥
गवांघ्रिरजसा स्नानं वायव्यं सर्वदोषहृत्[4] ।
सातपेनैव वर्षेण स्नानं दिव्यमुदाहृतम् ॥ १८ ॥
आत्मविज्ञानतोयेन स्नानं मानसमुत्तमम् ।
मानसेन समं स्नानं नास्ति नास्ति न संशयः ॥ १९ ॥
मानसेन विना नास्ति स्नानेन ब्रह्मवित्तम ।
नृणामात्यन्तिकी [5]शुद्धिस्ततस्तत् स्नानमाचरेत् ॥ २० ॥
स्नात्वा [6]तु तर्पयेद् देवान् ऋषीन् पितृगणानपि ।
स्वसूत्रोक्तेन मार्गेण पुनराचम्य वाक् यतः ॥ २१ ॥

---

१. ग घ स्नाने, २. ङ विशुद्ध्यर्थं ३. ख सितेन च, ४. ङ घ नुत्, ५. क सुद्धिरतस्तत्, ६. क संतर्पयेत् ।

मन्त्रैः सम्प्रोक्ष्य चात्मानमापोहिष्ठादिभिस्त्रिभिः ।
शुद्धैः कुशोदकैश्चापि तोयमादाय तत्परम्[1] ॥ २२ ॥
सूर्यश्चेत्यादिमन्त्रेण मनसा चाभिमन्त्र्य च ।
पीत्वा तत्पुनराचम्य [1]दधिक्रेत्यादिना तथा ॥ ३ ॥
आपोहिष्ठादिभिश्चापि स्वात्मानं प्रोक्षयेद् द्विजः ।
पुनः प्रदक्षिणीकृत्य स्वात्मानं शुद्धवारिणा ॥ २४ ॥
अपामञ्जलिमादाय जपित्वा तु समाहितः ।
ॐकारं व्याहृतिं चैव गायत्रीं [2]मन्त्रमातरम् ॥ २५ ॥
आदित्याय पुनर्दद्याज्जलं तदभिमन्त्रितम् ।
त्रिःप्रदद्याज्जलं तस्य कुर्याच्चैव प्रदक्षिणम् ॥ २६ ॥
नदीतीरेऽथवा शुद्धे देशे दर्भादिसंयुते ।
समासीनो यथाशास्त्रं प्राणायामत्रयं द्विजः ॥ २७ ॥
कृत्वा सन्ध्यामभिध्यायेन्नीलग्रीवां सुशोभनाम् ।
वरदाभयहस्तां तां त्रिनेत्रां चन्द्रशेखराम् ॥ २८ ॥
प्रणवं परमात्मानं जपित्वा भक्तिसंयुतः ।
स्वात्मानं तामभिध्यायन् प्रकुर्याद् बन्धनं बुधः ॥ २९ ॥
सन्ध्यावन्दनहीनस्तु सर्वदाऽशुचिरेव हि ।
श्रौतस्मार्तसमाचारे नाधिकारी विशेषतः ॥ ३० ॥
ब्राह्मणाः क्षत्रिया वैश्या बहवः पण्डितोत्तम ।
सन्ध्यावन्दनमाश्रित्य विमुक्ताः कर्मबन्धनात् ॥ ३१ ॥
सन्ध्यावन्दनहीनानां नरकप्राप्तिरेव हि ।
तस्मात् सर्वप्रयत्नेन सन्ध्यावन्दनमाचरेत् ॥ ३२ ॥
प्राङ्मुखः प्रातरुत्थाय ध्यायंस्तां[3] मन्त्रमातरम् ।
सर्वलक्षणसम्पन्नामचिरादेव मुक्तिदाम् ॥ ३३ ॥

---

१. घ तप्परम्, २. क ख वेदमातरम्, ३. ध्यायेत्तां वेदमातरम् ।

अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
अष्टाविंशतिकं वापि सावित्रीमादराज्जपेत् ॥ ३४ ॥

अर्धोदयन्तमादित्यमुपतिष्ठेद् द्विजोत्तमः ।
स्वसूत्रोक्तेन मन्त्रेण प्राणायामपुरःसरम् ॥ ३५ ॥

सूक्तैः श्रौतैस्तथा स्मार्तैः स्तोत्रैर्नानाविधैरपि ।
सहस्रकिरणं देवमुपस्थाय कृताञ्जलिः ॥ ३६ ॥

प्रणतिं शिरसा भूमौ कुर्वीत श्रद्धया सह ।
ॐ[1] स्वस्वोल्काल्काय शान्तायेत्यादिमन्त्रेण मन्त्रवित् ॥ ३७ ॥

स पवित्रस्तु शुद्धात्मा शुक्लवस्त्रोत्तरीयकः[2] ।
कुर्वीत समिदादानं[3] स्वसूत्रेणैव पावके ॥ ३८ ॥

समिदादानहीनस्तु[4] सप्ताहात् पतितो भवेत् ।
अतश्च[5] समिदादानं[6] कुर्यान्नित्यमतन्द्रितः ॥ ३९ ॥

समिदादानसिद्धेन भस्मना सजलेन वा[9] ।
त्रिपुण्ड्रं धारणं कुर्यान्मेधावीत्यादि मन्त्रतः ॥ ४० ॥

पत्रपुष्पादिभिर्नित्यं भक्त्या वेदोक्तवर्त्मना ।
दिने[7] दिने देवलिङ्गं पूजयेच्छिवसंज्ञकम् ॥ ४१ ॥

तच्छेषत्वेन विष्णुं च ब्रह्माणं[8] देवतान्तरम् ।
अर्चयेद् भुक्तिमुक्त्यर्थं न स्वतन्त्रतया द्विज ॥ ४२ ॥

गुरुदेवप्रदातारं[10] नमस्कारादिभिर्मुदा ।
पूजयेत्तु विशेषेण ततोऽधीयीत रागवान् ॥ ४३ ॥

---

१. क ख खल्काय, ग घषोल्कान्ताय, घ धधोत्काय, २. ग घ ङ शुक्लवासोत्तरीयकः, ३. ङ क ख समिदाधानं, ४. ख घ ङ समिदाधान, ५. ख घ ङ समिदाधानं, ६. ख घ ङ समिदाधान, ७. ख ङ घ लिङ्गे दिने दिने देवं पूजयेच्छिवसंज्ञितम्, ८. क ब्राह्मणं, ९. ङ च, १०. ङ गुरुं वेदप्रदातारं ।

आचार्यमुखतो येन वेदानां च चतुष्टयम् ।
अधीतं सफलं तस्य जीवितं नहि संशयः ।। ४४ ।।

अधीत्य किञ्चिन्मात्रं वा वेदानां गुरुपूजनम् ।
प्रकुर्याच्छ्रद्धया सार्धं ब्रह्मचर्यपरायणः ।। ४५ ।।

वेदत्रयमधीतं चेद्रुद्रस्तस्य वशे[1] भवेत् ।
विष्णुर्वेदद्वयं ब्रह्मा वेदमेकं न संशयः ।। ४६ ।।

अधीतं च जपेन्नित्यं शिष्यानध्यापयेद् द्विजान् ।
पाठधारणमात्रेण ब्राह्मण्यं तस्य पुष्कलम् ।। ४७ ।।

पातकानि च नश्यन्ति पाठधारणमात्रतः ।
इहलोके परत्रापि सुखं[2] मोक्षमवाप्नुयात् ।। ४८ ।।

विधत्तेऽध्ययनं यस्तु विधिः सोऽयं द्विजोत्तम ।
वेदाध्ययननिष्पत्तौ पर्यवस्यति सादरम् ।। ४९ ।।

धर्मशास्त्राणि सर्वाणि वेदाङ्गानि तथैव च ।
अवेक्षेत मुदात्यर्थं विद्वद्भिर्ब्राह्मणैः समम् ।। ५० ।।

साधयेत् विविधानर्थान्न्यायेनैव न चान्यथा ।
दिने दिने च दानार्थं तपते ब्रह्मवादिने ।। ५१ ।।

प्रत्याख्यानं न कुर्वीत स्वगृहे शयनार्थिनः ।
पूजयेत्तमतिप्रीत्या ब्राह्मणं गृहशायिनम् ।। ५२ ।।

यया कयाचिद् विधया बह्वन्नं प्राप्नुयात् ततः ।
मध्याह्ने मृदमादाय पिण्डीकृत्य पृथक् पृथक् ।। ५३ ।।

क्षालयेदेकपिण्डेन शिरः पापनिवृत्तये ।
नाभेरूर्ध्वं तथा ब्रह्मन्नधश्च तिसृभिस्तथा ।। ५४ ।।

---

१. क वशो, २. ग घ सुखमक्षय्यमाप्नुयात् ।

पादौ षड्भिश्च[1] मृत्पिण्डैर्मात्रयामलकोपमैः ।
गोमयेनापि पिण्डेन तथाङ्गमवलेपयेत् ।। ५५ ।।
पुनः प्रक्षालयेद्[2] देहं मृल्लिङ्गेनैव मन्त्रितः ।
पुनराचमनं कृत्वा विधिवद् बुद्धिमान् द्विजः ।। ५६ ।।
अभिमंत्र्य जलं शुद्धं[3] तल्लिङ्गैर्वारुणैरपि ।
जलाधिदैवतं विद्वान् ध्यात्वा तोयस्य मध्यतः ।। ५७ ।।
स्नायात् तत्तन्महातीर्थे[5] कुर्यादाचमनं बुधः ।
द्रुपदानाम गायत्री वेदे [4]वाजसनेयके ।। ५८ ।।
सकृदन्तर्जले जप्त्वा पातकानि व्यपोहति ।
मृत्तिके हर मे पापमिति मन्त्रेण मृत्तिकाम् ।। ५९ ।।
शिरसाधार्य च स्नायात् सर्वपापनिवृत्तये ।
आपमञ्जलिमादाय मन्त्रेणैवाभिमन्त्र्य च ।। ६० ।।
स्वमूर्ध्नि निक्षिपेत् तोयं सर्वपापनिवृत्तये ।
स्नानप्रकारो यः प्रोक्तो मध्याह्ने ब्राह्मणस्य तु ।। ६१ ।।
प्रातः[6] स्नानेऽपि तुल्योऽयमित्याहुः केचिदास्तिकाः ।
पुनः स्नायादथाचम्य कुर्यात् पूर्वोक्तवर्त्मना ।। ६३ ।।
प्राणायामादिकं सर्वं सश्रद्धं [7]मतिमत्तमः ।
सावित्रीं च जपेद् भक्त्या सहैवाष्टोत्तरं शतम् ।। ६३ ।।
उपस्थानं ततः कुर्यात् स्वसूत्रोक्तेन वर्त्मना ।
अङ्गुल्या शङ्खमणिना पुत्रजीवेन वा बुधः ।। ६४ ।।
पद्माक्षैः स्फाटिकैर्वापि कुशग्रंथ्याथ वा जपेत् ।
रुद्राक्षैरथवा नित्यं [8]जपेन्मर्त्यस्त्वतन्द्रितः ।। ६५ ।।

---

१. ग घ क षड्विंश, २. ग घ ङ देहमर्ब्लिगेनैव, ३. ङ ग घ शुद्धमर्ब्लिगैर्वारुणैरपि, ४. ख वाजसनीयके, ५. ङ तत्र ६. क ख प्रातःस्नायी च, ७. क श्रद्धया मतिसत्तम, ख श्रद्धया मतिसत्तमः ८. क जपेन्मन्त्रं स्वशक्तितः ।

रुद्राक्षेण जपन्मर्त्यः[1] साक्षाद् रुद्रसमो भवेत् ।
रुद्राक्षस्य च माहात्म्यं जाबालैरादरेण तु ॥ ६६ ॥

पठ्यते मुनिभिः सर्वैः शिवेन परमात्मना ।
अङ्गुल्या जप एकः स्याद्रेखयाष्टगुणो भवेत् ॥ ६७ ॥

जपस्तु शङ्खमणिना शतमष्टोत्तरं भवेत् ।
जपस्तु पुत्रजीवेन भवेदेकशतत्रयम् ॥ ६८ ॥

पद्माक्षेण सहस्रं स्यात् [2]स्फटिकेनायुतत्रयम् ।
कोटिकोटिकुशग्रन्थ्या रुद्राक्षेणान्तवर्जितम्[3] ॥ ६९ ॥

अतः सर्वप्रयत्नेन रुद्राक्षेण सदा जपेत् ।
उच्चैर्जपादुपांशुश्च वरिष्ठः परिकीर्तितः ॥ २० ॥

जिह्वाग्रजः शतगुणः सहस्रो मानसः स्मृतः ।
रजस्वलां च चण्डालं[4] सूतिकां पतितं तथा ॥ ७१ ॥

दृष्टवा बौद्धमथाचम्य[5] जपेन्मन्त्रं द्विजोत्तमः ।
ब्रह्मयज्ञं ततः कुर्यात् स्वसूत्रोक्तेन वर्त्मना ॥ ७२ ॥

देवान् ऋषीन् पितृगणान् तर्पयेदंभसा क्रमात् ।
सायंकाले स्वसूत्रोक्तवर्त्मनैव द्विजोत्तम ॥ ७३ ॥

कृत्वा शेषं प्रकुर्वीत श्रद्धया परया सह ।
स्मृत्वा तानि यथाशक्ति प्रकुर्याच्छ्रद्धया सह ॥ ७४ ॥

त्रिपुण्ड्रधारणं मुक्त्वा कर्माणि कुरुते तु यः ।
अन्यानि[6] यानि कर्माणि वेदेन विहितानि च ॥ ७५ ॥

तेनैवाचारितं सर्वं व्यर्थं चानर्थकारणम् ।
एवं दिने दिने कुर्यात् कर्म नित्यं द्विजोत्तम ॥ ७६ ॥

---

१. क जपेन् ५. ख घ स्फाटिकेन ३. ग घ वर्जिनः

४. क चाण्डालीं ङ चण्डालां, ५. क बौध ६. ख अन्यानि············च इति ७४ श्लोकस्य उत्तरार्द्धे स्थितम्, ७५ श्लोके स्मृत्वा तानि············तु यः इति क्रमः ।

उपात्तदुरितच्छेदः सिध्यत्येव न संशयः।
यो नाचरति विध्युक्तं निषिद्धं च करोति वा[1] ॥ ७७ ॥
तस्य पापानि सन्तीति लक्षयेदविचारतः।
नित्यानुष्ठानतः क्षीणमहापापमलस्य तु ॥ ७८ ॥
चित्तशुद्धिर्भवेच्छुद्ध्या दोषदृष्टिस्तुसंसृतेः।
संसारदोषदृष्ट्यैव विरक्तिर्जायते द्विज ॥ ७९ ॥
विरक्तस्यैव संसारात् संन्यासः स्यान्न संशयः।
विरक्तिर्द्विविधा[2] प्रोक्ता तीव्रातीव्रतरेति च ॥ ८० ॥
सत्यामेव तु तीव्रायां न्यसेद् योगी कुटीचके[3]।
शक्तौ बहूदके तीव्रतरायां हंससंज्ञके ॥ ८१ ॥
मुमुक्षुः परमे हंसे साक्षाद् विज्ञानसाधने।
सन्यसेन्नित्यकर्माणि मुमुक्षुः परहंसकः ॥ ८२ ॥
अन्ये[4] काम्यानि कर्माणि न नित्यं कर्म सत्तम।
मुमुक्षुः परहंसाख्यः साक्षान्मोक्षैकसाधनम् ॥ ८३ ॥
अभ्यसेद्ब्रह्मविज्ञानं वेदान्तश्रवणादिना।
ब्रह्मविज्ञानलाभाय परहंससमाह्वयः ॥ ८४ ॥
शान्तिदान्त्यादिभिः सर्वैः साधनैः सहितो भवेत्।
शान्तिर्बाह्येन्द्रियाणां तु चरतां विषयेषु च ॥ ८५ ॥
व्यावृत्तिर्मनसो दान्तिस्तितिक्षा[5] च सहिष्णुता।
समाहितत्वमेकाग्र्यं संन्यासो नाम कर्मणाम् ॥ ८६ ॥
त्यागः संकल्पना साक्षात् शास्त्रोक्तेनैव वर्त्मना।
संन्यासः कर्मसन्त्यागद्वारेण ब्रह्मवेदने ॥ ७७ ॥

---

१. ग घ च, २. क विविधा, ३. ख कुटीचकम्, ४. क अनेकान्यानि, ५. तितिक्षुश्च।

अविद्यानाशके शुद्धे विप्रेन्द्रोपकरोति हि ।
बहिःप्रवृत्तिव्यावृत्तिद्वारेण ब्रह्मवेदने[1] ॥ ८८ ॥
शान्तिर्दान्तिस्तथैवाग्र्यं विप्रेन्द्रोपकरोति हि ।
एवमन्यानि सर्वाणि दृष्टद्वारेण वेदने ॥ ८९ ॥
उपकुर्वन्ति नादृष्टद्वारेणैव तु केवलम् ।
तथाप्यङ्गानि विद्यादि जमनः प्रतिबन्धकम् ॥ ९० ॥
पापसङ्घातमप्यर्थात् घ्नन्ति सत्यमुदीरितम् ।
अतः शान्तिं तथा दान्तिं संन्यासं च तितिक्षुताम् ॥ ९१ ॥
ऐकाग्र्यं गुरुभक्तिं च शिवभक्तिं तथैव च ।
अन्यच्चाङ्गतया वेदे श्रुतं च ज्ञानसिद्धये ॥ ९२ ॥
साधयेत् सर्वयत्नेन मुमुक्षुः परहंसकः ।
तस्मात् सर्वप्रयत्नेन मोक्षसिद्ध्यर्थमात्मनः ॥ ९४ ॥
विज्ञानवैदिकं शुद्धं साधयेदप्रमादतः ।
ज्ञानार्थं कर्म सश्रद्धं कुर्यान्नित्यमतन्द्रितः ॥ ९४ ॥
कर्मणा न हि विज्ञानं विना मर्त्यस्य सिध्यति ।
नैमित्तिकं च कर्तव्यं पापानां विनिवृत्तये[2] ॥ ९५ ॥
पापिष्ठस्य परिज्ञानं सर्वथा नोपपद्यते[3] ।
अनर्थं चावशो याति मानवः पापकर्मणा ॥ ९६ ॥
अतो नैमित्तिकं कुर्याच्छ्रद्धया कर्म नित्यवत्[4] ।
नित्यनैमित्तिकादन्यद्वरिष्ठं नैव विद्यते ॥ ९७ ॥
नित्यनैमित्तिकं[5] कर्म यः करोति द्विजोत्तमः ।
स धीरः स तु सर्वज्ञः स साक्षाद् वेदवित्तमः ॥ ९८ ॥
अतः कुर्वीत विद्यार्थं नित्यनैमित्तिकं बुधः ॥

इत्युपपुराणे पाराशरे नवमोऽध्यायः ॥ ९ ॥

१, वेदके, २. ख घ च निवृत्तये, ३. ख घ नैव जायते, ४. ख नित्यकर्मवत्,
५. ख × (नित्य······वित्तमः) ।

अथ दशमोऽध्यायः

श्रीपराशर उवाच

निषिद्धमथ[1] वक्ष्यामि समासेन न विस्तरात् ।
श्रद्धया परिहाराय तच्छृणु ब्राह्मणोत्तम ॥ १ ॥
उपनीतो द्विजस्त्वस्य[2] गुरोः पार्श्वे प्रसादतः[3] ।
निवसन् सर्वमाचारं शिक्षयेच्च दिने दिने ॥ २ ॥
आह्वानेन विना वेदान् नाधीयीत द्विजोत्तमः ।
अवेक्षमाणः[4] स्वाचार्यमनुद्यतकरस्तथा ॥ ३ ॥
शयानो वापि गच्छन् वा तिष्ठन् वापि कदाचन ।
उपेक्षां परिवादं च न कुर्याद् वेदवादिनः ॥ ४ ॥
गुरोस्तु सन्निधौ नित्यं न यथेष्टासनो भवेत् ।
न कीर्तयेद् गुरोर्नाम निन्दां न शृणुयात् सदा ॥ ५ ॥
यस्मिन् देशे गुरोः निन्दा श्रूयते श्रवणेन तु ।
गच्छेदन्यत्र तद्देशात् छिद्रं[5] कर्णे पिधाय च ॥ ६ ॥
कर्णप्रासारणं[6] नैव कुर्यादाचार्यसन्निधौ ।
पादप्रसारणं[7] नैव कुर्यादाचार्यसन्निधौ ॥ ७ ॥
छत्रं च पादुकां चैव मोहेनापि न धारयेत् ।
वर्जयेद् ग्रहणं हासं[8] सर्वमोहं[9] तथैव च ॥ ८ ॥
माधुर्यवर्जितां वाचमहितां च विवर्जयेत् ।
अनृतेनापि संयुक्तामालस्येन तथैव च ॥ ९ ॥

---

१. ङ ख मपि, २. ग घ द्विजः स्वस्य, ३. ग अप्रसादतः, ङ घ प्रमादतः, ४. क अवीक्षमाणः स्वाचार्यमनुज्ञकरणस्तथा, ख अवीक्ष्यमाणस्वाचार्यमनुज्ञकरणस्तथा, ग अवीक्ष्यमाणः स्वाचार्यमनुद्यतकरस्तथा ५. शीघ्रं कर्णौ, ६. ग घ कर्णप्रावरणं, ङ प्रावरणे, ७. क चरणप्रसारणं, ङ पादप्रसारणं, ८. ख हास्यं, ९. ख सर्वं ।

हर्षं शोकं तथा कामं तथैव प्राणिहिंसनम् ।
क्रोधं लोभं तथा दम्भं विशेषेण विवर्जयेत् ।। १० ।।

अष्टम्यां च तथा षष्ठ्यां चतुर्दश्यां च[1] पर्वणि ।
त्रिजन्मनि[2] तथाभ्यङ्गं वर्जयेद्रोगवर्जितः ।। ११ ।।

अर्कवारे गुरोर्वारे भौमवारे द्विजोत्तम ।
शुक्रवारे तथाभ्यङ्गं वर्जयेद् रोगवर्जितः ।। १२ ।।

अक्षद्यूतं विनोदं च नृत्यगीतादिकं तथा ।
अशिष्टजनसंसर्गं दूरतः परिवर्जयेत् ।। १३ ।।

अनधीत्य द्विजो वेदान् नैव स्नायात् कदाचन ।
गुरोरनुज्ञाहीनश्च तथा चीर्णव्रतोऽपि च ।। १४ ।।

अधिकामात्मनो भार्यां रूपलावण्यवर्जिताम्[3] ।
गोत्रानुकूलहीनां च न गृह्णीयात् कदाचन ।। १५ ।।

पञ्चदश्यां चतुर्दश्यामष्टम्यां च त्रिजन्मनि ।
षष्ठ्यामज्ञानतो वापि मैथुनं न समाचरेत् ।। १६ ।।

प्रमादं न वदेन्नृणां न वासत्यं वदेत् सदा ।
नाहितं प्रवदेच्चौर्यं न कुर्यान्मोहितोऽपि[4] वा ।। १७ ।।

राजन्यवैश्यशूद्रेभ्यः पतितादन्त्यजादपि ।
कृतघ्नाच्च न गृह्णीयात् धनधान्यादिकं बुधः ।। १८ ।।

अधार्मिकजनैर्व्याप्ते तान्त्रिकैश्च समावृते ।
देशे शूद्राधिके वापि द्विजो न निवसेत् सदा ।। १९ ।।

वैरं[5] विवादं मात्सर्यं न कुर्यात्तु कदाचन ।
प्रशंसामात्मनोऽप्येवमशिष्टैश्चाभिभाषणम् ।। २० ।।

पातकानि समस्तानि कुर्वन्तं पुरुषं बुधः ।
दृष्ट्वापि न वदेन्नित्यं विजानन्नात्मनो हितम् ।। २१ ।।

---

१. ङ तु, २. निजजन्मनि, ३. ग घ ङ रूपलक्षण, ४. ग ङ ध मोहतोऽपि, ५. क चौरं ।

पतितं पतितं चौरं चौरं प्रोच्य तथैव च ।
वचनात् तुल्यदोषः स्याद् द्विगुणोऽसत्यभाषणात् ।। २२ ।।

तस्माद् दृष्टं श्रुतं दोषं समस्तं जनसंसदि ।
न [1]वदेन्मोहतो वापि न [2]स्मरेच्च कदाचन ।। २३ ।।

भास्करं शशिनं वापि नेक्षेतैवानिमित्ततः ।
न मध्यगं न तोयस्थं नास्तं यातं कदाचन ।। २४ ।।

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमम् ।
एभिः सहैव वासं च [3]वर्जयेन्मतिमत्तमः ।। २५ ।।

चापमिन्द्रस्य नेक्षेत सन्ध्यां गां च तथैव च ।
विद्युतं च महावृष्टिं ग्रहान् शुक्रादिकानपि ।। २६ ।।

आलिङ्गनं च दम्पत्योर्मैथुनं चापरस्य तु[4] ।
विण्मूत्रोत्सर्जनं नैव [5]नग्नां च न विलोकयेत् ।। २७ ।।

प्रेतं क्रुद्धमुखाचार्यं रागादन्यस्त्रियं तथा ।
रजस्वलां तथोदक्यां मत्तान्नैव विलोकयेत् ।। २८ ।।

भार्यया सह पुत्रेण बन्धुभिश्च तथैव च ।
आचार्येण न भुञ्जीयात् तथान्यैरपि जन्तुभिः ।। २९ ।।

न लङ्घयेत् तथा जन्तून् नाधितिष्ठेत् कदाचन ।
न शूद्राय परिज्ञानं दद्याद्वेदमुखेन तु ।। ३० ।।

आत्मानं नावमन्येत जीर्णवस्त्रादिभिस्तथा ।
विभवे सति भार्यां च पुत्रांश्चैव विशेषतः ।। ३१ ।।

अस्त्रशस्त्रादिभिः सर्वैर्गजैरश्वैस्तथैव च ।
मूर्खैरपि च संसर्गं दूरतः परिवर्जयेत् ।। ३२ ।।

---

१. क मोहितः, २. ख स्मरेत्तु, ३. क मतिमान् सदा, ख मतिवित्तमः,
४. क च, ५. क नग्नो न च ।

अप्सु नग्नो न तिष्ठेत जलं नाञ्जलिना पिबेत् ।
कूपस्नानं न कुर्वीत न[1] नग्नो मतिसत्तम ।। ३३ ।।
स्नानहीनो न भुञ्जीयात् देवपूजादिवर्जितः ।
अदत्वा यतये भिक्षां तथैव ब्रह्मचारिणे ।। ३४ ।।
बालातपञ्च चाण्डालं प्रेतधूममवैदिकम् ।
[2]अपस्मारादिसंयुक्तं दूरतः परिवर्जयेत् ।। ३५ ।।
सन्ध्याकाले स्वापनं च मैथुनं गमनं तथा ।
न कुर्यान्मोहतो[3] वापि श्रुतेरध्ययनं द्विज ।। ३६ ।।
पादप्रक्षालनं चापि न कुर्याच्चरणेन तु ।
न ब्राह्मणं नृपं वैश्यं स्पृशेदग्निं वृथा जलम् ।। ३७ ।।
वक्त्रेण वामहस्तेन जलं नैव पिबेद् बुधः ।
अयोनौ नोत्सृजेद्रेतः शुक्रं नैव पिबेद् बुधः ।। ३८ ।।
श्मशानचर्मरोमास्थिकपालादीनि न स्पृशेत् ।
परैराच्छादितं वस्त्रं पादुकां छत्रमेव च ।। ३९ ।।
अन्यानि[4] यानि कर्माणि वेदेन विहितानि च ।
स्मृत्या तानि यथाशक्ति प्रकुर्याच्छ्रद्धया सह ।। ४० ।।
त्रिपुण्ड्रधारणं मुक्त्वा कर्माणि कुरुते तु यः ।
तेनैवाचरितं सर्वं व्यर्थं चानर्थकारणम् ।। ४१ ।।
वेदवादपरित्यागं न कुर्यान्मोहतोऽपि[5] वा ।
यदि कुर्यात् [6]प्रमादेन पतत्येव न संशयः ।। ४२ ।।
श्वसूकरखरोष्ट्रादीन् जन्तून्नित्यं न संस्पृशेत् ।
लशुनं गृञ्जनं वापि मत्स्यं मांसं तथैव च ।। ४३ ।।

---

१. तटाके सति सत्तय—क ङ २. ग घ ङ अपस्मारादि युक्तं च ३. क ख मोहितः
४. ख ग ङ घ × (अन्यानि············ कारणम् ५. क मोहितो ६. ख प्रयतेन्न ।

वेदवाह्यागमान् ब्रह्मन् वेदबाह्यांश्च वैष्णवान् ।
वेदवाह्यांस्तथा चान्यान् गृह्णीयान्नैव वैदिकः ॥ ४४ ॥

वेदवाह्यागमस्पृष्टान् मनुष्यानखिलानपि ।
श्रौतस्मार्तपरो मर्त्यो मोहेनापि न संस्पृशेत् ॥ ४५ ॥

वेदवाह्यागमस्पृष्टान् [1]मोहेनापि स्पृशेद्यदि ।
श्रौतधर्मपरो मर्त्यः सचैलं स्नानमाचरेत् ॥ ४६ ॥

वेदबाह्यागमाचारं समस्तं [2]मोहतोऽपि वा ।
न कुर्याद् वैदिको मर्त्यः कुर्याच्चेत् पतितो भवेत् ॥ ४७ ॥

भस्मना वेदसिद्धेन त्रिपुण्ड्रं देहगुण्ठनम् ।
रुद्रलिङ्गार्चनं चापि [3]मोहतो वापि न त्यजेत् ॥ ४८ ॥

ख्यातिलाभादिसिध्यर्थमपि विष्णवागमादिषु ।
स्थितं पुण्ड्रान्तरं नैव धारयेद् वैदिको जनः ॥ ४९ ॥

वेदबाह्यागमाचारं सम[4]स्तमविशेषतः ।
मोहेनापि न गृह्णीयाद् गृह्णीयाच्चेत्पतत्यधः ॥ ५० ॥

[5]यज्ञो दानं तपः कर्म न त्यजेन्मोहतो[6]ऽपि वा ।
अन्यच्च विहितं कर्म स्मृत्या वेदेन च[7] द्विजः[8] ॥ ५१ ॥

धर्मशास्त्रैश्च वेदैश्च प्रतिषिद्धं समासतः ।
कदाचिदपि मोहाद् वा वैदिको न समाचरेत् ॥ ५२ ॥

मध्यदेशादिसंसिद्धं सदाचारं समाचरेत् ।
श्रुतिस्मृतिविरुद्धं तु तत्रापि न समाचरेत् ॥ ५३ ॥
सर्वदेशेषु यः श्रुत्या स्मृत्या वा विहितस्तथा ।
आचारोऽप्रतिषिद्धश्च स प्रमाणं न संशयः ॥ ५४ ॥

---

१. क मोहितो पि २. क मोहितो ३. क मेहितो ४. क प्रशस्त ५. क यज्ञदान
६. क मोहितो, ७. च्वा, ८. क द्विज ।

सोऽपि पुण्येषु देशेषु मध्यदेशादिषु[1] द्विज ।
अतीवमानमन्यत्र स्थितोऽयमुभयात्मकः ।। ५५ ।।

ब्रह्मलोके तथा चैन्द्रे प्राजापत्ये च मानुषे ।
श्रुतिस्मृतिविरुद्धश्च सदाचारः प्रवर्तते ।। ५६ ।।

देवानां च मुनीनां च मनुष्याणां सतामपि ।
प्रवर्तते[2] दुराचारः कदाचिद् दुर्निवारकः ।। ५७ ।।

महत्तरोऽपि भगवान् महादेवः प्रजापतिः ।
अभ्यधावत् पुरा पुत्रीमवशः कामपीडितः ।। ५८ ।।

अहल्यामपि कल्याणीमादायेन्द्रः सुरोत्तमः ।
शप्तश्च गौतमेनैव सर्वेषामपि सन्निधौ ।। ५९ ।।

वसिष्ठस्तूर्वशीं दृष्ट्वा प्रस्खलत्[3] परिमोहितः[4] ।
मत्स्यगन्धामहं दृष्ट्वा मुनीन्द्रा अपरास्तथा[5] ।। ६० ।।

किं पुनर्मनुजा शूद्रा अधर्मबहुला मुने ।
अतः[6] सर्वत्र सर्वेषां सम्भवत्येव दुष्कृतिः[7] ।। ६१ ।।

श्रौतस्मार्तसदाचारे[8] श्रद्धा पुण्येन जायते ।
अश्रौते जायते वाञ्छा देहिनां पापकर्मिणाम्[9] ।। ६२ ।।

वेदाङ्गं धर्मशास्त्रं च पुराणं भारतं तथा ।
देशजातिकुलाचारमपरं च[10] समासतः ।। ६३ ।।

विरोधे सति वेदेन वेदमार्गैकसंस्थितः ।
ब्राह्मणःक्षत्रियोऽन्यो वा निःशङ्कं परिवर्जयेत् ।। ६४ ।।

अतः सर्वं परित्यज्य श्रुत्युक्तं नित्यमाचरेत् ।
वेदानुसारि शास्त्रोक्तमपि ग्राह्यं द्विजोत्तम[11] ।। ६५ ।।

---

१. क देशादिकम्, २, ख प्रवर्त्तन्ते दुराचारा, कदाचिद् दुर्निवारकाः ।
३. ङ प्रस्खलः. ४. ख प्रतिमोहितः, ५. ग अपरे, ६. ग ततः, ७. ख दुष्कृतम्, ८. क ग समाचारे, ९. ख कर्मणाम्, १०. ख वा, ११. क द्विजोत्तमः ।

अतीन्द्रियार्थविज्ञाने प्रमाणं वेद एव हि ।
स्मृतयश्चापि तन्मूला नैवान्यत् सत्यमीरितम् ।। ६६ ।।
धर्माधर्मादिविज्ञाने त्वागमाः पुरुषोदिताः ।
पञ्चरात्रादयः सर्वे न प्रमाणमिति स्थितिः ।। ६७ ।।
वेदोदितसमाचारविपरीता भवन्ति ये ।
आचारास्तेषु ते सर्वे तेषु शुद्धस्य कीर्तिताः ।। ६८ ।।
वेदाविरुद्धा आचारास्तेषु तेषु च सत्तम[1] ।
तेऽपि तेषु च सर्वेषु विशुद्धस्य च[2] कीर्तिताः ।। ६९ ।।
अनुकूलस्तु वेदानामाचारस्तेषु यः स्थितः ।
सोऽयं वैदिकनिष्ठानामिति वाञ्छन्ति केचन ।। ७० ।।
वेदमूलतया नित्यं प्रवृत्ता अपि सत्तम[3] ।
क्वचित् कदाचित्स्मर्तारस्तन्त्रार्थं च ब्रुवन्ति वै ।। ७१ ।।
क्वचित् तन्त्रानुरोधेन धर्मं पौराणिका अपि ।
वदन्ति तादृशोंऽशस्तु ग्राह्यस्तन्त्रावलम्बिना ।। ७२ ।।
पुराणे धर्मशास्त्रे वा योंऽशः श्रुत्या विरुध्यते ।
स तन्त्रार्थस्तु विज्ञेयः समासेन मनीषिभिः ।। ७३ ।।
अतः सर्वं परित्यज्य विरुद्धं वेदमानतः ।
वेदाविरुद्धं[4] वेदोक्तं गृह्णीयादपि[5] सत्तम ।। ७४ ।।
सर्वमुक्तं समासेन विज्ञेयं वेदवित्तमैः ।
[6]इतः परं न विज्ञेयं किञ्चिदप्यास्तिकस्य तु ।। ७५ ।।

इत्युपपुराणे पाराशरे दशमोऽध्यायः ।। १० ।।

---

१. ख सत्तमाः, २. ख प्रकीर्तिताः, ३. ख सत्तमाः, ४. क वेदाविरुद्धवेदोक्तं, ५. क देव, ६. क परमविज्ञेयं, ङ इतः परं तु विज्ञेयं किञ्चिदप्यास्तिकस्यचित् ।

अथ एकादशोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि चरितं पापकर्मिणाम् ।
शृणु तत् परिहाराय विप्र वेदार्थवित्तम ॥ १ ॥

महादेवं च विष्णुं च ब्रह्माणं देवतान्तरम् ।
सदा[1] निन्दन्ति मोहेन मनुष्याः पापकर्मिणः ॥ २ ॥

महादेवसमं[2] विष्णुं ब्रह्माणं देवतान्तरम् ।
मन्यन्ते विप्र मोहेन मनुष्याः पापकर्मिणः ॥ ३ ॥

देवानां प्रथमं देवं जन्मनाशादिवर्जितम् ।
रुद्रं विश्वाधिकं[3] नैव मन्यन्ते[4] पापकर्मिणः ॥ ४ ॥

चेतनाचेतनस्यास्य जगतो मूलकारणम् ।
मन्यन्ते[5] न शिवं साम्बं मनुष्याः पापकर्मिणः ॥ ५ ॥

आगमान्तसमुत्पन्नमतिनिर्मलमास्तिक[6] ।
आत्मज्ञानं च निन्दन्ति मनुष्याः पापकर्मिणः ॥ ६ ॥

शान्तिदान्त्यादिविज्ञानसाधनानि महान्ति च ।
न स्वीकुर्वन्ति मोहेन[7] मनुष्याः पापकर्मिणः ॥ ७ ॥

[8]रागद्वेषादिदोषांश्च मुने कुर्वन्ति सन्ततम् ।
नैव कुर्वन्ति यज्ञांश्च मनुष्याः पापकर्मिणः ॥ ८ ॥

वेदसिद्धेन मन्त्रेण त्रिपुण्ड्रं भस्मगुण्ठनम् ।
नैव कुर्वन्ति मोहेन मनुष्याः पापकर्मिणः ॥ ९ ॥

---

१. ग × सदा ······पापकर्मिणः, २. ग × महा······ देवतान्तरम्, ३. क श्वाधिकं, ख विष्ण्वाधिकं, ४. ग मन्वते, ङ मनुष्याः, ५. ङ ग मन्वते, ६. क मास्तिकः, ७. क यज्ञांश्च, ८. क × राग·········कर्मिणः ।

ऊर्ध्वपुण्ड्रं त्रिशूलं च वर्तुलं चतुरस्रकम् ।
धारयन्ति ललाटे वै मनुष्याः पापकर्मिणः ॥ १० ॥

शङ्खचक्रगदापद्मवज्रपाशाङ्कुशादिभिः ।
अङ्किताश्च भवन्त्यज्ञा मनुष्याः पापकर्मिणः ॥ ११ ॥

त्यजन्ति सकलं कर्म सदा विध्युक्तमास्तिक ।
निषिद्धं कर्म कुर्वन्ति मनुष्याः पापकर्मिणः ॥ १२ ॥

त्यजन्ति वेदं वेदोक्तं तथा स्मृतिपुराणकम् ।
वेदाङ्गानि च मोहेन मनुष्याः पापकर्मिणः ॥ १३ ॥

पाञ्चरात्रे च कापाले पाषण्डेष्वपरेषु च ।
दीक्षिताश्च भवन्त्येव मनुष्याः पापकर्मिणः ॥ १४ ॥

अविमुक्तं कुरुक्षेत्रं पुण्डरीकपुरं तथा ।
आश्रयं नैव गच्छन्ति[1] मनुष्याः पापकर्मिणः ॥ १५ ॥

कीकटेष्वपि देशेषु वेदसम्बन्धवर्जिताः ।
वर्तन्ते प्रीतिसंयुक्ता मनुष्याः पापकर्मिणः ॥ १६ ॥

वश्याकर्षणविद्वेषमारणादिषु कर्मसु ।
यजन्ते[2] भ्रान्तिविज्ञाना मनुष्याः पापकर्मिणः ॥ १७ ॥

वेदमार्गपरिभ्रंशं वेदबाह्यपरिग्रहम् ।
कुर्वन्ति स्वात्ममोहेन मनुष्याः पापकर्मिणः ॥ १८ ॥

अभिषिक्तं च राजानं ब्राह्मणं च बहुश्रुतम् ।
निर्भयं च तथा राष्ट्रं बाधन्ते पापकर्मिणः ॥ १९ ॥

बहुनोक्तेन किं वेदमर्यादा [3]बाधनं तथा ।
श्रद्धां नैव प्रकुर्वन्ति मनुष्याः पापकर्मिणः ॥ २० ॥

इत्युपपुराणे पाराशरे एकादशोऽध्यायः ॥ ११ ॥

---

१. घ ङ वाञ्छन्ति, २. ग ङ घ यतन्ते, ३. ख लङ्घनं, घ ङ भेदनं ।

अथ द्वादशोऽध्यायः

श्रीपराशर उवाच

अभक्ष्यमन्नं वक्ष्यामि समासेन न विस्तरात् ।
अन्नदोषेण चित्तस्य कालुष्यं सर्वदा भवेत् ॥ १ ॥

कलुषीकृतचित्तानां [1]धर्मः सम्यक् न भासते ।
अधर्मो[2] धर्मरूपेण विभाति च न संशयः ॥ २ ॥

स्वयं भातं परं ब्रह्म न[3] भाति नावभासते ।
ब्रह्मविद्याभिवाञ्छा च कदाचिन्नैव जायते ॥ ३ ॥

किञ्चिदन्नं परब्रह्मप्रकाशप्रतिबन्धकम् ।
किञ्चित् तद्विषयज्ञानं जन्मनः प्रतिबन्धकम् ॥ ४ ॥

[4]किञ्चिदीश्वरभक्तेस्तु जन्मनः प्रतिबन्धकम् ।
किञ्चित् साक्षात् परब्रह्मध्यानस्य प्रतिबन्धकम् ॥ ५ ॥

किञ्चिद्रुद्रस्य मूर्तेस्तु ध्यानस्य प्रतिबन्धकम् ।
किञ्चिद् विष्णोरजस्यापि ध्यानस्य प्रतिबन्धकम् ॥ ६ ॥

किञ्चित्तेषां विभूतेस्तु [5]साधनप्रतिबन्धकम् ।
किञ्चिदर्कादिदेवानां ध्यानस्य प्रतिबन्धकम् ॥ ७ ॥

किञ्चिदज्ञानविज्ञानसाधनप्रतिबन्धकम् ।
[6]किञ्चिद्यज्ञतपोदानकर्मणः प्रतिबन्धकम् ॥ ८ ॥

किञ्चिद् ब्राह्मणहत्यायाः किञ्चिच्चौर्यस्य कारणम् ।
किञ्चित्कादम्बरीपानश्रद्धायाः कारणं भवेत् ॥ ९ ॥

किञ्चिद् गुर्वङ्गनाभोगश्रद्धायाः कारणं भवेत् ॥ १० ॥

---

१. क धर्म्यं, २. क धर्मोऽधर्मस्वरूपेण, ३. ङ न भातींवावभासते ४. ख × किञ्चद्······ प्रतिबन्धकम्, ५. ङ ध्यानस्य ६. ङ किञ्चिदग्न्यादि देवानां ध्यानस्य प्रतिबन्धकम् ।

किञ्चित्पापिष्ठसंसर्गश्रद्धाया जनकं[1] भवेत् ।
किञ्चिद् विप्रविधानादि[2]पातकादेश्च कारणम् ॥ ११ ॥

किञ्चिद् वेदपरित्यागश्रद्धाया[3] जनकं भवेत् ।
किञ्चित् पाषण्डवादानां शुक प्राप्तेस्तु कारणम् ॥ १२ ॥

किञ्चित्पाषण्डधर्मस्यानुष्ठानस्यैव कारणम् ।
किञ्चिद् वेदोदिताचारा[4]भावस्य हि तु कारणम् ॥ १३ ॥

किञ्चित्तान्त्रिकविज्ञानवैशिष्ट्य[5]जनकं भवेत् ।
किञ्चिद् वैदिकविज्ञानं[6] विशिष्याज्ञानकारणम् ॥ १४ ॥

किञ्चित्तान्त्रिकविज्ञानश्रद्धायाः कारणं भवेत् ।
किञ्चिद् वैदिकविज्ञानश्रद्धाभावस्य कारणम् ॥ १५ ॥

किञ्चित्तान्त्रिकसम्मान[7]कारणं भवति द्विज ।
किञ्चिद् वैदिकसम्माना[8]भावस्यैव तु कारणम् ॥ १६ ॥

किञ्चित्प्रामाण्यसन्देहकारणं छन्दसामपि ।
तन्त्राणामपि विश्वास[9]कारणं[10] किञ्चिदास्तिक ॥ १७ ॥

नास्तिक्यकारणं किञ्चित् क्वचिन्मौर्ख्यस्य[11] कारणम् ।
किञ्चिद् द्रोहस्य देवादौ कारणं भवति द्विज ॥ १८ ॥

किञ्चिद् रागादिदोषाणां कारणं विभ्रमस्य च ।
अतश्च मतिमानन्नमभक्ष्यं[12] परिवर्जयेत् ॥ १९ ॥

त्यजेदनुपवीतानां यतेरन्नं तथैव च ।
यतिना प्रेरितस्यान्नमन्धस्य पतितस्य च ॥ २० ॥

---

१. क ख कारणं, २. ङ विप्रविधातादि, ३. क त्यागः श्रद्धाया, ४. ङ चाराद् भावस्य, ५. क विज्ञानं वैशिष्ट्य, ६. ख ङ विज्ञानवैशिष्टयाज्ञान, ७. ङ संस्कार, ८. ङ संस्कार, ९. ङ विश्वासः १०. क ख कर्मणां, ११. ख ग घ मौढ्यस्य, १२. क मतिमान् भक्ष्यं निषिद्धं ।

वेदाध्ययनहीनस्य वेदबाह्यावलम्बिनः ।
वेदानां द्वेषकस्यान्नं दैवतान्नं परित्यजेत् ।। २१ ।।
श्रौतस्मार्तसदाचारविमुखस्य तथैव च ।
कृतघ्नस्य महारोगपीडितस्य विशेषतः ।। २२ ।।
परदाररतस्यान्नं पिशुनस्य तथैव च ।
कन्याविक्रयिणश्चान्नं विशेषेण विवर्जयेत् ।। २३ ।।
यतिनिन्दापरस्यान्नं सदा पापरतस्य च ।
श्रद्धाहीनस्य भार्यायाः श्वसुरस्य तथैव च ।। २४ ।।
दरिद्रस्य च मूकस्य विशेषेण विवर्जयेत् ।
निर्मर्यादस्य मूर्खस्य विशेषेण विवर्जयेत् ।। २५ ।।
प्रजारक्षणहीनस्य क्षत्रियस्य तथैव च ।
पुरोहितस्याशान्तस्य विशामन्नं विवर्जयेत् ।। २६ ।।
[1]अशौचसहितस्यान्नं अभिशप्तस्य चास्तिक ।
पाषण्डिनश्च शूद्रस्य विशेषेण विवर्जयेत् ।। २७ ।।
तक्षोरन्नं विटान्नं च नर्तकान्नं च कर्षिणः ।
गणान्नं गणिकान्नं च वर्जयेत्तु विशेषतः ।। २८ ।।
शस्त्रोपजीविनश्चान्नं[2] ध्वजिनश्चान्नमेव च ।
रजकस्य तथैवान्नं विशेषेण विवर्जयेत् ।। २९ ।।
गान्धर्वलोहकारान्नं सूतकान्नं तथैव च ।
अयाज्ययाजकस्यान्नं विशेषेण विवर्जयेत् ।। ३० ।।
अरक्षकस्य बालस्य चित्रकारस्य सत्तम ।
चिकित्सकस्य चाप्यन्नं विशेषेण विवर्जयेत् ।। ३१ ।।
पौनर्भवस्य मूढस्य तथा वार्धुषिकस्य च ।
स्वर्णकारस्य चैवान्नं विशेषेण विवर्जयेत् ।। ३२ ।।

१. ख ग आशौच, २. क ग जीवनस्यान्नं ।

मूर्खस्य च किरातस्य दूतिकस्य तथैव च ।
देवतानिन्दकस्यान्नं विशेषेण विवर्जयेत् ॥ ३३ ॥

वर्जनीयं तथैवान्नं तक्षादेर्यत्प्रकीर्तितम्[1] ।
भुक्त्वा तद् ब्राह्मणो मर्त्यो मासादेव पतत्यधः ॥ ३४ ॥

उच्छिष्टान्नं सपत्न्यन्नं[2] भीतस्य रुदितस्य च ।
क्षुत्पीडितस्य भुक्त्वान्नं वत्सरात्पतितो भवेत ॥ ३५ ॥

श्राद्धान्नं सूतिकस्यान्नं वन्ध्यान्नं च तथैव च ।
वृथा पाकस्य भुक्त्वान्नं वत्सरात्पतितो भवेत् ॥ ३६ ॥

अस्त्रशस्त्रकरस्यान्नं तथा परवशस्य[3] च ।
कारुकस्य तथा भुक्त्वा वत्सरात्पतितो भवेत् ॥ ३७ ॥

पुनर्भुवोऽतिलुब्धस्य [4]विधवान्नस्य [5]मोहितः ।
पिशुनस्य तथा भुक्त्वा वत्सरात् पतितो भवेत् ॥ ३८ ॥

सोमविक्रयिणश्चान्नं सुराविक्रयिणस्तथा ।
मांसविक्रयिणश्चान्नं भुक्त्वा सद्यः पतत्यधः ॥ ३९ ॥

शिवद्रोहपरस्यान्नं यतिनिन्दापरस्य च ।
विज्ञानदूषकस्यान्नं भुक्त्वा सद्यः पतत्यधः ॥ ४० ॥

[6]देवद्रोहपरस्यान्नं भस्मद्रोहपरस्य च ।
त्रिपुण्ड्रदूषकस्यान्नं भ्रातृद्रोहपरस्य च ॥ ४१ ॥

दग्धाङ्गस्यायुधैर्दिव्यैर्भुक्त्वा सद्यः पतत्यधः ।
दासस्य कुलमित्रस्य गोपालस्य तथैव च ॥ ४२ ॥

कुधनार्जितस्यापि द्विजैर्न भोक्तव्यमापदि ।
कुम्भकारस्य विप्राणां शेषभूतस्य सत्तम ॥ ४३ ॥

---

१. क × 'तक्षादे······सपत्न्यन्नम्' २. ङ सपंक्त्यन्नं, ३. ग घ पारशवस्य ।
४. ग घ ङ विद्धशेफस्य मोहिनः ५. ख मोहिनः ६. ख वेद ।

कर्षकस्य तथैवान्नं द्विजैर्भोक्तव्यमापदि ।
आपद्यपि न भोक्तव्यमन्येषामन्नमास्तिकैः ।। ४४ ।।

प्रायश्चित्तं तु कर्त्तव्यं यदि भुक्तं द्विजातिभिः ।
पिण्याकं सक्तवस्तैलं गव्यं तक्रादिकं तथा ।। ४५ ।।

शूद्रादेव तु संग्राह्यं न द्विजेभ्यः कदाचन ।
वृन्ताकं गृञ्जनं चैव लशुनं ग्रामकुक्कुटम् ।। ४६ ।।
अन्यच्च तद्भवद्रव्यं ब्राह्मणो नैव भक्षयेत् ।
औदुम्बरमलाबुं च गुम्फलं किंशुकं तथा ।। ४७ ।।
वृश्चनप्रभवं सर्वं व्रतस्थो नैव भक्षयेत् ।
केशकीटादिभिर्दुष्टं भस्मना संस्कृतं तथा ।। ४८ ।।
आज्येन च श्वकाकादिदूषितं नैव भक्षयेत् ।
उदक्याशुचिचाण्डालप्रमुखैर्दृष्टमोदनम् ।। ४९ ।।
तथा पर्युषितं नित्यं ब्राह्मणो नैव भक्षयेत् ।
विवत्सायाश्च गोक्षीरं सन्धिनीक्षीरमेव च ।। ५० ।।
औष्ट्रं तथाविकं नित्यं ब्राह्मणो नैव भक्षयेत् ।
अभक्ष्यमपि भक्ष्यं स्यादौषधं तु च रोगिणः ।। ५१ ।।
अन्तरेण सुराद्रव्यमित्याह परमेश्वरः ।
भक्ष्यस्य भक्षणाच्चित्तं परिशुद्धं भवेन्नृणाम् ।। ५२ ।।
चित्तशुद्धं प्रमाज्ञानं जायते [1]पारमेश्वरम् ।
पारमेश्वरविज्ञाने संजाते देव[2]वाक्यतः ।। ५३ ।।
भिद्यते हृदयग्रन्थिरित्याह परमा श्रुतिः ।। ५४ ।।

इत्युपपुराणे पाराशरे अष्टमोऽध्यायः ।। १२ ।।

---

१. ख परमेश्वरि २. ङ वेदवाक्यतः ।

अथ त्रयोदशोऽध्यायः

श्रीपराशर उवाच

अथातः सम्प्रवक्ष्यामि प्रायश्चित्तं समासतः ।
हिताय सर्वमर्त्यानां केवलं करुणाबलात् ॥ १ ॥

ब्रह्महा निर्जने शुद्धे नदीतीरेऽथवा वने ।
कुटीं कृत्वा तृणैः शुष्कैः काष्ठैः शुष्कैरपि स्थिरम् ॥ २ ॥

भिक्षामादाय विप्रेभ्यः कृत्वा शवशिरोध्वजम् ।
अपराह्णे सकृन्मौनी भुञ्जीयादतितापवान् ॥ ३ ॥

स्नानं त्रिषवणं कुर्याद् ब्राह्मणानर्चयेत् सदा ।
गवां शुश्रूषणं कुर्यादश्वत्थमभिरक्षयेत् ॥ ४ ॥

दोषं प्रशंसयेन्नृणां निर्लज्जो विजितेन्द्रियः ।
वने तु वर्तमानोऽयं फलमूलाशनो भवेत् ॥ ५ ॥

ब्रह्महत्याकृतं पापं द्वादशाब्देन नश्यति ।
अबुद्धिपूर्वकस्येदं प्रायश्चित्तं मुनीश्वर ॥ ६ ॥

भस्मशायी भवेन्नित्यं भस्मच्छन्नस्त्रिपुण्ड्र[1]धृक ।
रुद्राध्यायी भवेद् भक्त्या मासमेकमतन्द्रितः ॥ ७ ॥

प्रणवं वा जपेन्नित्यं सदा पञ्चाक्षरं तु वा ।
प्रायश्चित्तं [2]भवेदेतद् रहस्यस्य न संशयः ॥ ८ ॥

महत्तराणामन्येषां रहस्यानां तथैव च ।
[3]कामतश्चेन्नृणां शुद्धिः [4]पूर्वोक्तेनैव वर्त्मना ॥ ९ ॥

---

१. क पुण्ड्रकः २. क पातकस्य, ३. क कामतश्च नृणां, ४. पूर्वोक्तेन न जायते ।

चरतां मरणादेव नैव मार्गान्तरेण तु ।
सुरापी तु सुरापानमग्निवर्ण[१] घृतं तु वा ॥ १० ॥
गोमूत्रं वा [२]मृतः पीत्वा मुच्यते पानदोषतः ।
वैदिकः कामतो पीत्वा ब्राह्मणो मदिरामिमाम् ॥ ११ ॥
सद्यः पतति विप्रेन्द्र स्ववंशं पातयत्यपि ।
सुरापस्य तु पापस्य ब्रह्महत्यादि पातकम् ॥ १२ ॥
सत्यमेव मया प्रोक्तं कलां [३]नार्हति षोडशीम् ।
तस्मात् त्यजेत् परित्राता [४]पश्चाच्छुद्धो भवेद् द्विजः ॥ १३ ॥
वेदधर्मपरः साक्षात् पुनः संस्कारमर्हति ।
[५]स्तेयी प्रकीर्णकेशोऽथ आदाय मुशलं ततः ॥ १४ ॥
उक्त्वा स्वकर्म राजानं गत्वा तेन हतस्ततः ।
स्तेयदोषाद् विमुच्येत नात्र कार्या विचारणा ॥ १५ ॥
गुरुदाराभिगामी च तत् पापविनिवृत्तये ।
स्वयं स्ववृषणं शेफं ब्रह्मन्नुत्पाद्य[६] चाञ्जलौ ॥ १६ ॥
निधायानशनो गच्छेद् वाग्यतो दक्षिणां दिशम् ।
महापातकिनां यस्तु पञ्चमः परिकीर्तितः ॥ १७ ॥
जितेन्द्रियश्चरेच्छुद्ध्यै तप्तकृच्छ्रं तु वत्सरम् ।
गत्वा दुहितरं चापि स्वसारं च[७] स्नुषामपि ॥ १८ ॥
तप्तकृच्छ्रं चरेद् विप्रो मत्या वृत्तिविवर्जितः ।
मातृष्वसां तथा गत्वा मातुलानीं पितृष्वसाम् ॥ १९ ॥
भागिनेयीं तथा विप्र कुर्यात् कृच्छ्रातिकृच्छ्रकौ ।
कुर्याच्चान्द्रायणं वापि स्नायात्तीर्थेषु वा पुनः[८] ॥ २० ॥

---

१. ग घ सुरां तप्तामग्निवर्णां २. क ख श्रुतः ३. ग घ नार्हन्ति ४. ङ ग घ यत्राशुद्धो
५. क स्तेया, घ स्तेयः, ६. ब्रह्मन्नुत्पाटच ७. क ख वा ८. ग घ द्विजः ।

भ्रातृभार्याभिगमने चान्द्रायणचतुष्टयम् ।
मातुलस्य सुतां गत्वा कुर्याच्चान्द्रायणं द्विजः ।। २१ ।।

सखिभार्याभिगमने तप्तकृच्छ्रं समाचरेत् ।
चाण्डालीगमनं कृत्वा तप्तकृच्छ्रत्रयं चरेत् ।। २२ ।।

कृच्छ्रं सान्तपनं वापि[1] तत्पापविनिवृत्तये ।
कुयोनिषु तथा गत्वा रेतस्तोये विसृज्य च ।। २३ ।।

कृच्छ्रसान्तपनं कुर्यात् तत्पापविनिवृत्तये ।
[2]आस्यमैथुनशुद्ध्यर्थं [3]चरेच्चान्द्रायणद्वयम् ।। २४ ।।

गवि मैथुनशुद्ध्यर्थं तथा कुर्याद् द्विजोत्तम ।
क्षत्रियस्याङ्गनां गत्वा प्राजापत्यद्वयं चरेत् ।। २५ ।।

आवर्तयेत् तथा वृत्तौ ब्राह्मणो नापरः पुमान् ।
ब्रह्मचार्यवकीर्णश्च नैर्ऋतं [4]पशुमालभेत् ।। २६ ।।

द्विजस्त्रीगमने भिक्षुरवकीर्णिव्रतं चरेत् ।
गत्वा वेश्यां[5] द्विजः कुर्यात् प्राजापत्यमतन्द्रितः ।। २७ ।।

पतितामसकृद् गत्वा प्राजापत्यं तथैव च ।
विप्रस्य कन्यकां गत्वा विप्रश्चान्द्रायणं चरेत् ।। २८ ।।

उदक्यां गमनं कृत्वा त्रिरात्रेण विशुद्ध्यति ।
पुष्पस्त्रीमसकृद् गत्वा कृच्छ्रं चान्द्रायणं चरेत् ।। २९ ।।

नटशैलूषयोर्गत्वा [6]स्त्रियं चान्द्रायणं चरेत् ।
सर्वपापविशुद्ध्यर्थं ध्यायेद्देवं त्रियम्बकम् ।। ३० ।।

साम्बं चन्द्रकलाचूडं[7] नीलग्रीवं शुचिस्मितम् ।
वरदाभयहस्तं च लसत्केयूरमण्डितम् ।। ३१ ।।

---

१. ख चापि, ग कुर्यात् २. ङ हास्य ३. क चान्द्रायणं द्वयम्, ४. क पशुमाचरेत्, ङ श्चेन्नैऋर्ृतिं, ५. क ख वैश्यां, ६. क त्रयं, ७. ङ जूटं, ।

सर्वालङ्कारसंयुक्तं शुद्धस्फटिकसंनिभम् ।
अर्धयामं मुहूर्तं वा हृदयाम्भोजमध्यमे ।। ३२ ।।

जपेत् पञ्चाक्षरीं विद्यां प्रणवेन समन्विताम् ।
शिवध्यानानलेनैव पापसंघातकाननम्[1] ।। ३३ ।।

क्षणाद्दग्धं भवेद् ध्यानाद् यथावद् वस्तु सिद्ध्यति ।
बहवः खलु रुद्रस्य ध्यानेन ब्रह्मवित्तम ।। ३४ ।।

अनायासेन संसाराद् विमुक्ता मानवा भुवि ।
किं पुनः पापसङ्घाताद्विमोक्षः शङ्करस्य तत्[2] ।। ३५ ।।

ध्यानेन मनुजस्तस्माद् ध्यानमेव समभ्यसेत् ।
विष्ण्वादिदेवताध्यानमपि पापविनाशनम् ।। ३६ ।।

[3]तद्भक्तपापशुध्यर्थं तद्ध्याने यत्नवान् भवेत् ।
शिवध्यानसमध्यानं नास्ति नास्ति श्रुतौ स्मृतौ ।। ३७ ।।

अतः सर्वानपि त्यक्त्वा शिवमेव विचिन्तयेत् ।
देवानामपि सर्वेषामादिभूतो हि शङ्करः ।। ३८ ।।

अतः सर्वान् परित्यज्य ध्यायेदीशानमव्ययम् ।
प्रयत्नेनैव पापेभ्यो मोक्षमिच्छति यः पुमान् ।। ३९ ।।

शिवमेव सदा ध्यायेत् साम्बं चन्द्रार्धशेखरम् ।। ४० ।।

इत्युपपुराणे पाराशरे त्रयोदशोऽध्यायः ।। १३ ।।

१. ख कारणम् २. ङ तु, ३. ङ भक्त ।

अथ चतुर्दशोऽध्यायः

श्रीपराशर उवाच

भूयोऽपि सर्वपापानां प्रायश्चित्तमनुत्तमम्[1] ।
प्रसिद्धानां च गुप्तानां प्रवक्ष्यामि समासतः ॥ १ ॥
पापसङ्घातकान्तारं[2] स्थूलं निर्दग्धुमिच्छताम्[3] ।
ज्ञानदावानलः शीघ्रं सम्पाद्यः सर्वयत्नतः ॥ २ ॥
ज्ञानानले हि सञ्जाते सुदीप्ते पापकाननम् ।
क्षणाद्दग्धं भवत्येव प्रतिबन्धविवर्जिते ॥ ३ ॥
मणिमन्त्रौषधैर्वह्निः[4] सुदीप्तोऽपि यथेन्धनम् ।
प्रदग्धुमेव शक्तः स्यात् प्रतिबन्धस्तथैव हि[5] ॥ ४ ॥
ज्ञानाग्निरपि सञ्जातः सुदीप्तः सुदृढोऽपि च ।
प्रदग्धुं नैव शक्तः स्यात् प्रतिबन्धस्तु कल्मषम्[6] ॥ ५ ॥
भावना विपरीता या या चासम्भावना शुक ।
कुरुते प्रतिबन्धं सा खलु ज्ञानस्य नापरम् ॥ ६ ॥
वाक्यानुग्राहकन्यायपरिशीलनलक्षणात् ।
[7]मननात्तत्र चैकाग्र्यान्निदिध्यासन[8]संज्ञकात् ॥ ७ ॥
भावने द्वे निवर्तेते निवृत्यैव तथानघ ।
ज्ञानस्य प्रतिबन्धश्च स्वयमेव विनश्यति ॥ ८ ॥
निवृत्तप्रतिबन्धश्च यथा दहति पावकः ।
तथा सकारणं पापं प्रबोधाग्निर्दहत्यसौ ॥ ९ ॥

---

१. द्विजोत्तम, २. क कान्तारमूलं, ३. क घ मिच्छताम्, ४. क षधीर्वह्निः, ५. च,
६. घ कारणम्, ७. ख चैकाग्र्यं, ८. ग संज्ञिकात् ।

आम्नायान्तमहावाक्यसूक्ष्मतात्पर्यनिर्णयात् ।
उपक्रमादिभिर्लिङ्गैः षड्भिः साध्यो द्विजोत्तम[1] ॥ १० ॥

वाक्यावयवभूतैस्तु मुमुक्षोरधिकारिणः ।
सर्ववेदान्तसंसिद्धैः[2] साधनैः सहितस्य च ॥ ११ ॥

प्रत्यग्ब्रह्मैक्यविज्ञानं जायते भवभेषजम् ।
विज्ञानकारणस्यास्य श्रवणस्य द्विजोत्तम ॥ १२ ॥

प्राधान्यं मननादस्ति निदिध्यासनतोऽपि च ।
उत्पत्तावन्तरङ्गं हि ज्ञानस्य श्रवणं बुध ॥ १३ ॥

तटस्थमन्यथावृत्या मननं चिन्तनं तथा ।
इति कर्तव्यकोटिः स्याच्छान्तिदान्त्यादयस्तथा ॥ १४ ॥

तटस्थ एव रुद्रस्य प्रसादः पण्डितोत्तम ।
अन्तरङ्गमतीव स्यात् तदर्थान्यखिलानि वै ॥ १५ ॥

प्रसादो नाम रुद्रस्य भवानीसहितस्य तु ।
वाक्यलक्षणसामग्रीप्रवृत्तिप्रभवस्य तु ॥ १६ ॥

वृत्तिज्ञानस्य शुद्धस्य चिदभिव्यक्तियोग्यता ।
योग्यतालक्षणे साक्षात् प्रसादे शाम्भवे शुभे ॥ १७ ॥

तीव्रे[3] तीव्रतरे मन्दे सञ्जाते सति देहिनाम् ।
वृत्तेः साक्षितया वृत्तिप्रागभावस्य च स्थितः[4] ॥ १८ ॥

बुभुक्षायां तथाज्ञोस्मीऽत्याभासाज्ञानवस्तुनः ।
असत्यालम्बनत्वेन सत्यः सर्वजडस्य तु ॥ १९ ॥

साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः ।
आनन्दरूपः सर्वार्थसाधकत्वेन हेतुना ॥ २० ॥

सर्वसम्बन्धकत्वेन सम्पूर्णः शिवसंज्ञितः ।

१. ख द्विजोत्तमः, २. ग घ संसिद्धसाधनैः, ३. ग तीव्र, ४. ख स्थितिः ।

जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः[1] ।
स्वानुभूतिप्रवृत्तिस्तु वृत्तौ सत्यां घृणानिधिः[2] ॥ २१ ॥

बुभुक्षोरात्मनः साक्षादभिव्यक्तो भवेत् स्वयम् ।
शिवादिनामहीनस्य ध्यानहीनस्य शूलिनः ॥ २२ ॥

शिवभक्तिविहीनस्य त्रिपुण्ड्रोद्धूलनादिषु ।
श्रद्धाहीनस्य रुद्रस्य प्रसादाच्छुद्धवेदनम्[3] ॥ २३ ॥

साक्षान्मुक्तिश्च विप्रेन्द्र नैव सिध्यति देहिनः ।
शान्तिदान्त्यादयः पुंसां सम्पन्ना अपि सत्तम ॥ २४ ॥

त्रिपुण्ड्रधारणादीनि न भविष्यन्ति सर्वथा ।
यथा विशिष्टे मानुष्ये ब्राह्मणे पशुविग्रहे ॥ २५ ॥

यज्ञदानाद्यनुष्ठानं दुर्लभं खलु देहिनाम् ।
तथा श्रौतेषु धर्मेषु त्रिपुण्ड्रं भस्मगुण्ठनम् ॥ २६ ॥

रुद्रलिङ्गार्चनं चापि दुर्लभं हि शरीरिणाम् ।
त्रिपुण्ड्रधारणं तिर्यग् भस्मना चावगुण्ठनम् ॥ २७ ॥

सुदुर्लभमिति ज्ञात्वा खलु सर्वेश्वरोऽकरोत् ।
निर्दुःखो निर्मलः साक्षान्नित्यानन्दो निरञ्जनः ॥ २८ ॥

किमर्थमकरोद्[4] ब्रूहि शिवः साक्षान्निरामयः ।
अविभाज्यः सदा कर्ता सदा भोक्ता महेश्वरः ॥ २९ ॥

किमर्थमकरोद् ब्रूहि साधकस्योदितं मुने ।
तस्मात्सुदुर्लभं नृणामिति ज्ञात्वा महेश्वरः ॥ ३० ॥

त्रिपुण्ड्रधारणं भस्मगुण्ठनं चाकरोत् सदा ।
अनिष्पन्नेन कर्तव्यं त्रिपुण्ड्रादेश्च धारणम् ॥ ३१ ॥

---

१. ङ ×, २. ख विधिः, ३. वेधनम् ४. क × किमर्थकरोद्..............भोक्ता महेश्वरः ॥ २९ ॥

विशेषेण स्वलाभाय नान्यलाभाय सत्तम ।
स्वलाभमन्तरेणापि परिचारार्थमास्तिक[1] ।। ३२ ।।

निष्पन्नेनापि कर्तव्यं यथा सर्वेश्वरेण तु ।
अतः सर्वाङ्गनिष्ठस्य प्रत्यग्ब्रह्मैक्यगोचरा ।। ३३ ।।

या वृत्तिमानसी शुद्धा जायते वेदवाक्यतः ।
तस्यां या चिदभिव्यक्ता स्वतः सिद्धा च शाङ्करी ।। ३४ ।।

तदेव ब्रह्मविज्ञानं तदेवाज्ञाननाशनम् ।
ब्रह्मज्ञाने च सञ्जाते ब्रह्माज्ञानं[2] निवर्तते ।। ३५ ।।

घटज्ञाने तु सञ्जाते घटाज्ञानं यथा तथा ।
अज्ञानस्यैव कार्याणि कारणान्यखिलान्यपि[3] ।। ३६ ।।

अज्ञाननाशतो नाशमायान्त्येव न संशयः ।
कर्त्रादिकारकग्रामप्रसूतिः[4] खलु कर्मतः ।। ३७ ।।

कर्माभावे तु कर्त्रादि कारकोत्पत्तिरेव न[5] ।
देहेन्द्रियाद्इसङ्घाताभिमानस्था[6] हि कर्तृता ।। ३८ ।।

कर्तृत्वं[7] वास्तवं नैव जीवस्य मुनिसत्तम ।
भोक्तृत्वं वाऽक्रियस्यास्य ब्रह्मभूतात्मनः सदा ।। ३९ ।।

कर्तृत्वं चैव भोक्तृत्वं[8] यदि स्वाभाविकं भवेत् ।
आत्मनो न निवर्तेत केनचित् साधनेन च ।। ४० ।।

शरीराद्यभिमानेन जातोऽयमिति मन्यते ।
तथा कृशोऽहं कृष्णोऽहमिति भ्रान्त्याऽभिमन्यते ।। ४१ ।।

ब्राह्मणोऽहं मनुष्योऽहं[10] ब्रह्मचारी गृही वनी ।
भिक्षुकोऽहमिति भ्रान्त्या निर्विशेषोऽभिमन्यते ।। ४२ ।।

---

१. ङ पराचारार्थंमास्तिक २. क मिथ्याज्ञानं, ३. ग घ च, ४. ख कार्मण, ५. क च, ६. क संप्राप्ताभिमानस्था हि कर्मतः, ख सङ्घाभिमानोत्या हि कर्तृता, ७. क ख कर्तव्यं, ८. ख ग चा. ९. क कृत्यं वा, ख भोक्तव्यम्, १०. क मनुष्येषु, घ गृहस्थोऽहं ।

एकोऽपि सर्वदेहेषु भ्रमाद् भिन्नोऽवभासते ।
घटाकाशमठाकाशविभेदेन यथा नभः ।। ४३ ।।

अक्रियोऽपि स्वतन्त्रात्मा भ्रान्त्या सर्वविकारवान् ।
जलस्य चलनादेव यथा चलति भास्करः ।। ४४ ।।

अतीव धवलो रक्तो विभाति स्फटिको यथा ।
रक्तोपाधिवशादात्मा संसारीवान्यसंक्रमात् ।। ४५ ।।

आत्मानात्मविवेकाख्यप्रदीपादित्यसन्निधौ ।
कथं वर्णाभिमानाख्यं तमस्तिष्ठति सत्तम ।। ४६ ।।

वर्णाश्रमवयोऽवस्थाविशेषो यस्य भासते ।
तस्यैव हि निषेधाश्च विधयः[1] सकला अपि ।। ४७ ।।

सर्वोपाधिविनिर्मुक्तं चैतन्यं सर्वसाक्षिणम् ।
स्वात्मना पश्यतः कर्म कथं ब्रूहि शुभाशुभम् ।। ४८ ।।

सर्वसाक्षिणमात्मानं सर्वसम्बन्धवर्जितम्[2] ।
साक्षात् ब्रह्मतया पश्यन् कथं बध्येत कर्मणा ।। ४९ ।।

तस्माद् ब्रह्मात्मविज्ञानं ग्रसत्यज्ञानमात्मनः ।
अज्ञानजनितं कर्म तत्फलं च न संशयः ।। ५० ।।

समूलं कर्म यद् ज्ञानं ग्रसते स्वयमेव तु[3] ।
तदेव सर्वपापानां प्रायश्चित्तमनुत्तमम् ।। ५१ ।।

प्रतिबन्धविनिर्मुक्तं परमं[4] ब्रह्मवेदनम् ।
विनाखिलं कृतं पापं केन नाशयति द्विजः ।। ५२ ।।

अतः परमविज्ञानमज्ञानं ग्रसते ततः[5] ।
दृगात्मनाखिलं दृश्यं ग्रसते ज्ञानसम्भवम् ।। ५३ ।।

---

१. क ख विधेयाः, २. सर्वबन्धविवर्जितम्, ३. ख च, ४. क परब्रह्मनिवेदम्, ५. क्षणात् ।

अज्ञानमपि[1] तत्कार्यं ग्रस्तमप्यात्मवेदनात्[2] ।
प्रारब्धाफलकर्मान्तं भाति चाभासरूपतः ॥ ५४ ॥

यदा भासतया भाति जगद्दग्धमपि स्वतः ।
जीवन्मुक्तस्तदा विद्वान् न स भूयोऽभि[3]जायते ॥ ५५ ॥

जीवन्मुक्तस्तदा भातमभातं चाखिलं जगत् ।
पश्यन्नपि पृथक् स्वस्मात्[4] पश्यति स्वात्मनैव तु ॥ ५६ ॥

भातं[5] यथा यथा भातमभातमिति भाति यत् ।
प्रकाशा[6]व्यभिचारित्वात् ब्रह्मणो भानमेव तत् ॥ ५७ ॥

प्रकाशाव्यभिचारेण प्रकाशं पश्यतोऽखिलम्[7] ।
किं प्रकाशातिरेकेण विभाति न विभाति वा ॥ ५८ ॥

तस्मात् सम्पूर्णविज्ञानं सर्वकर्मनिवर्तकम् ।
कारणाज्ञाननाशेन न कर्माप्रतिकूलतः[8] ॥ ५९ ॥

अज्ञाने सति कर्तृत्वं तस्यैव तु शुभाशुभम् ।
तथा सति कथं कर्म बाधतेऽज्ञानमात्मनः ॥ ६० ॥

मूलभूते स्थितेऽज्ञाने ततो[9] द्वैतं विजायते ।
शोभनाशोभनाध्यासस्तत्र पुंसः प्रजायते ॥ ६१ ॥

रागद्वेषौ च[10] जायेते शोभनाशोभनभ्रमात्[11] ।
प्रवर्तते पुनर्देही धर्माधर्मौ[12] प्रवर्ततः ॥ ६२ ॥

धर्माधर्मोपभोगाय शरीरं ज.यते वशम् ।
एवं पुनः पुनर्ब्रह्मन् चक्रवद् भ्राम्यते नरः ॥ ६३ ॥

सम्यग्ज्ञाने समुत्पन्ने तेनाज्ञानं निवर्तते ।
तन्निवृत्तौ च तन्मूलं समस्तं प्रविनश्यति ॥ ६४ ॥

---

१. ङ मिति, २. ङ वेदनम्, ३. क अति, ४. क स्वात्मा,, ५. क ख भानं भानं तथा भानमभानमिति भाति यत्, ६. ख प्रभासा, ७. ख अखिलः, ८. ख कर्म, ९. क न तावद् वै, १०. ख वि, ११. ख घ शोभना, १२. ख घ धर्माधर्मप्रवृत्तितः ।

अतः संसारनाशाय ज्ञानमेकं समाश्रयेत् ।
अज्ञानस्यानुकूलं तु कर्म सर्वं परित्यजेत् ।। ६५ ।।

सम्पूर्णज्ञानलाभाय वर्तन्ते भुवि ये जनाः ।
तेषां पापानि नश्यन्ति महान्ति सुबहूनि च ।। ६६ ।।

ज्ञानादूर्ध्वं न कर्मास्ति शुभं वाऽशुभमेव वा[1] ।
स्वस्वरूपातिरेकेण यद्यस्ति पशुरेव सः ।। ६७ ।।

वस्तुगत्यात्मनः किञ्चित् पृथक् नास्त्येव योगिनः ।
तथाप्यस्तीव भातीव व्यवहारः प्रवर्तते ।। ६८ ।।

यथा स्वफलमादाय प्रारब्धं कर्म सत्तम ।
तदा हि क्षुभितं भाति स्वात्मनोऽन्यतयाखिलम् ।। ६९ ।।

यदा न क्षुभितं कर्म[2] फलदानाय सत्तम ।
तदा स्वात्मातिरेकेण न किञ्चिदपि भासते ।। ७० ।।

स्वात्मनोऽन्यतया सर्वं पश्यन्नपि परात्मविद् ।
निर्भयः स्वात्मना सर्वं पश्यति स्वानुभूतितः ।। ७१ ।।

स्वात्मनः परमव्याप्तिं[3] पश्यतः स्वानुभूतितः[4] ।
यथा भातेन रूपेण शिवो[5] भाति यथाखिलम् ।। ७२ ।।

तथा भातेन रूपेण स्वयं तिष्ठति केवलम् ।
स्वयं स्वानुभवेनैव शिवरूपेण केवलम् ।। ७३ ।।

यदा तिष्ठति निर्वाणं तदा तस्य महात्मनः ।
महाव्यापकनिर्वाणस्वरूपे[6] स्वात्मवस्तुनि ।। ७४ ।।

स्वानुभूत्यैव विश्रान्तः स्वयं तु परदेवता ।
विश्रान्तिश्च महाक्षोभः प्रकाशाव्यभिचारतः ।। ७५ ।।

---

१. ङ च, २. ख भाति, ३. ख परमाव्याप्तिं, ४, क स्वात्मभूतितः ५. ख शिवः सर्वं प्रकाशते, ग शिवो भाति यदाखिलम्, ६. ख स्वयं तिष्ठति केवलम् ।

प्रकाशरूपमेवेति तदा पश्यति तत्त्ववित् ।
सर्वं मायामयं साक्षादात्मा सर्वावभासकः ।। ७६ ।।

इत्यात्मानं विजानाति यः स ब्रह्मविदेव वै ।
दृश्यरूपमिदं सर्वं[1] दृङ्मयं यः प्रपश्यति ।। ७७ ।।

अकर्तात्मस्वरूपेण स तु ब्रह्मविदुत्तमः ।
दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।। ७८ ।।

यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित्स्वयम् ।
एवं रूप तु विज्ञानं यस्य मर्त्यस्य सिध्यति[2] ।। ७९ ।।

न तस्य पुण्यपापाभ्यां लेपः कर्म न विद्यते ।
एकैकस्य तु पापस्य प्रायश्चित्तं प्रकीर्तितम् ।। ८० ।।

एकैकशो मुने कर्तुं महतामपि दुःशकम्[3] ।
इदमद्वैतविज्ञानमेकमेवैनसां मुने ।। ८१ ।।

परोक्षमपरोक्षं वा साक्षादुन्मूलनक्षमम् ।
नास्ति ज्ञानसमं किञ्चित् प्रायश्चित्तं श्रुतौ स्मृतौ ।। ८२ ।।

नाधिकं चेत्ततः साक्षाज्ज्ञानमेव समाश्रयेत् ।
नास्ति नास्ति समं किञ्चिद् विज्ञानं श्रद्धयाऽपि च ।। ८३ ।।

किं पुनर्ब्रह्मविज्ञानसमं ब्रूहि मुनीश्वर ।। ८४ ।।

अतश्च संक्षेपमहं वदामि,
सर्वस्य पापस्य सहेतुकस्य ।

विशुद्धविज्ञानमिदं निवर्तकं,
ततश्च [4]सत्केवलमेकमाश्रयेत् ।। ८५ ।।

विशुद्धविज्ञानमिदं समाश्रितः,
श्रुतिप्रसादेन च पुण्यकर्मणा ।

---

१. क विश्वं, २. ख सिध्यते, ३. दुष्करम्, ४. ख ग केवलमेव ।

गुरुप्रसादेन च दुःखमागतं,
शिवप्रसादेन तरत्यसंशयम्[1] ॥ ८६ ॥

शोकमोहसुखदुःखसागरं,
वेद जन्म विमलात्मवेदनम् ।
अन्तरेण मनुजः कथं तरत्याशु,
केन वद विप्र मेऽधुना ॥ ८७ ॥

सर्वमेतदखिलेश्वरः शिवः,
केशवादिसुरनायका अपि ।
त्वं च तद्वदहमित्यहो[2] परब्रह्म-
तत्त्वविषया मतिः परा ॥ ८८ ॥

शङ्करो हि शुक भासते सदा,
बन्धमुक्तिगुरुशिष्यरूपतः ।
दृश्यरूपजगदात्मना तथा,
सत्यमेव कथितं मया तव ॥ ८९ ॥

ब्रह्मतत्त्वविषया मतिः परा,
कर्मवृन्दवडवा न संशयः ।
वेदचक्षुरत एव मानवः,
सद्य एव मतिमाश्रयेदिमाम् ॥ ९० ॥

न हि वक्तव्यमितः परं तव,
श्रुतिसारः कथितस्तु ते मया[3] ।
शिवपादस्मरणेन केवलं,
परविद्याऽनघ ते भविष्यति ॥ ९१ ॥

इत्युपपुराणे पाराशरे चतुर्दशोऽध्यायः ॥ १४ ॥

---

१. क असंशयः, २. ख मप्यहो ३. ख यथा ।

अथ पञ्चदशोऽध्यायः

श्रीपराशर उवाच

भूयोऽपि सर्वपापानां प्रायश्चित्तमनुत्तमम् ।
वदामि सर्वजन्तूनां हिताय करुणाबलात् ।। १ ।।
देवी पुरा शिवं देवं सर्वज्ञं करुणाकरम् ।
प्रणम्य लोकरक्षार्थमपृच्छदिदमुत्तमम् ।। २ ।।
भगवानपि सर्वज्ञः संसारोदधितारकः ।
आम्नायान्तैकसंवेद्यः प्राह देव्यै प्रियेण तु ।। ३ ।।

ईश्वर उवाच

श्रृणु गुह्यतमं देवि मया नोक्तमितः पुरा ।
संसारविषवृक्षस्य कुठारमिदमुत्तमम् ।। ४ ।।
अविमुक्तमितिख्यातं क्षेत्रमस्ति ममालयम् ।
संसारविषदष्टानामगतीनां[1] महौषधम् ।। ५ ।।
अधिभूते तथाध्यात्मे अधिदैवे च संस्थितम् ।
पापानामपि सर्वेषां भवानि विनिवर्तकम् ।। ६ ।।
अधिभूते[2] स्थितो मायी यस्तु ब्रह्माण्डविग्रहः ।
विराडात्मा भ्रुवोर्मध्ये सुस्थितं[3] तस्य सुव्रते ।। ७ ।।
जीवानां व्यष्टिभूतानां सर्वेषां तदतन्द्रिते ।
अधिभूततया प्रोक्तं तस्याध्यात्मिकमेव वै ।। ८ ।।
अधिदैवतया प्रोक्तमविमुक्तं तदास्तिके ।
मम प्रियतमं[4] विद्धि विशेषेणाघनाशनम् ।। ९ ।।

---

१. क दृष्टानाम्, २. ख अधिभूतस्थितौ, ३, ङ सुस्थिरं, ४. ङ प्रियतरं ।

तत्क्षेत्रसेवयैवाशु लभते मामयं नरः ।
सर्वपापविनिर्मुक्तो भवेच्च मनुजः शिवे ॥ १० ॥
कुरुक्षेत्रं प्रसिद्धं यद् भूम्यां पापनिवर्तकम् ।
तदाश्रयफलं चापि [1]लभतेऽस्यैव सेवया ॥ ११ ॥
देवानां देवयजनं प्रसिद्धं यन्महेश्वरि ।
सर्वेषामपि भूतानां तद्ब्रह्मसदनं परम् ॥ १२ ॥
अन्यच्च पापसङ्घातनिवर्तकतयैव तु ।
प्रसिद्धं सर्वलोकेषु स्थानं तीर्थं च यत् प्रिये ॥ १३ ॥
इदमेव हि तत्सर्वमविमुक्तं यदव्ययम् ।
अस्यैव सेवया तानि सेवितानि भवन्ति वै ॥ १४ ॥
अविमुक्तमिदं मुक्त्वा देशं संसारनाशनम् ।
नान्यत्र निवसेत् प्राज्ञः क्षणमात्रमपि प्रिये ॥ १५ ॥
अत्र भागीरथीतोये सकृत् स्नात्वा तु मानवः ।
दृष्ट्वा विश्वेश्वराख्यं मां करुणार्णवमम्बिके[2] ॥ १६ ॥
उपोष्य दिनमेकं वा प्रदद्यात् किञ्चिदादरात् ।
ब्रह्महत्यादिकैः पापैर्मुच्यते सकलैरपि ॥ १७ ॥
अत्र भागीरथीतोये स्नात्वा मासमतन्द्रितः ।
बुद्धिपूर्वकृतैः पापैर्मुच्यते सकलैर्नरः ॥ १८ ॥
अत्र जप्तं[3] हुतं दत्तं यत्किञ्चिदपरं कृतम् ।
अनन्तं तद्भवेत् सर्वं नात्र सन्देहकारणम्[4] ॥ १९ ॥
अत्रैवोत्क्रममाणस्य जन्तुमात्रस्य केवलम् ।
वेदवेदान्तसारस्य प्रणवाख्यस्य पार्वति ॥ २० ॥

---

१. ख लभ्यते, २. ग घ मन्तिके,
३. ख तप्तं, ४. क कार्या विचारणा ।

ब्रह्मणस्त्वर्थभूतोऽहं[1] संसारद्रावको विराट्[2] ।
कृपया मामकं रूपं परिपूर्णं परामृतम् ।। २१ ।।

आनन्दं सत्यचिद्रूपं तारकं तमसः परम् ।
स्वयं भातं निराधारं दास्यामि पृथगात्मना ।। २२ ।।

येनैवाशु महद्दुःखं प्राणेशोऽयं महेश्वरि ।
परित्यज्य स्वसंसारं परानन्दो भवेत् स्वयम् ।। २३ ।।

मामृते रुद्रमोक्षार्थं[3] जनानां पङ्कजेक्षणे ।
को वा संसारमग्नानां साक्षात् संसारमोचकः ।। २४ ।।

तस्मात् क्षेत्रस्य महतो मम विज्ञानजन्मनः ।
कारणत्वाच्च पापानां नाशकत्वात् तथैव [4]च ।। २५ ।।

मुमुक्षुः श्रद्धया साकं इदमेवाविमुक्तिदम्[5] ।
निषेवेत प्रयत्नेन [6]विमुच्येत कदाचन ।। २६ ।।

अस्यैव वैभवं सर्वमादरेण वृहस्पतिः ।
याज्ञवल्क्याच्च सर्वज्ञाच्छ्रुत्वा विज्ञातवान् स्थिरम् ।। २७ ।।

बहवो वेदविद्वांसः श्रद्धयैवास्य वैभवम् ।
आचार्येभ्यः प्रिये श्रुत्वा विमुक्ता भवबन्धनात् ।। २८ ।।

क्षेत्रस्यैवास्य माहात्म्यं मया वक्तुं न शक्यते ।
जाबालोपनिषत् साक्षात् स्वयं जानाति वा न वा ।। २९ ।।

तन्मूलानि पुराणानि वैभवं तस्य पार्वति ।
वदन्ति लोकरक्षार्थं महास्थानस्य वैभवम् ।। ३० ।।

अविमुक्ताभिधे[7] क्षेत्रे सेवाहीनो जनः प्रिये ।
अयत्नेनैव संसारात् सदा[8] मुक्तो भविष्यति ।। ३१ ।।

---

१. ख ब्रह्मणः सर्वभूतोऽहं, २. ङ अचिरात्, ३. ग घ रुद्रमोमर्थं, ४. ग घ तु,
५. ख विमुक्तकम्, ६. ख न विमुच्येत्, ७. ग भिधक्षेत्र, ग भिधं क्षेत्र, ८. ग ङ घ कदा ।

अस्मिन् जन्मनि वा देवि तथा जमान्तरेषु वा ।
सकृत्क्षेत्रमिदं सेव्यं विज्ञानाय मनीषिभिः ।। ३२ ।।

विनास्य सेवया जन्तोर्विज्ञानं वेदसम्भवम् ।
न कस्यापि भवेत् सम्यक् सत्यमेव मयोदितम् ।। ३३ ।।

जन्मान्तरसहस्रेषु श्रद्धयैर्वाजितैः प्रिये ।
पुण्यैर्हि ब्रह्मविज्ञानं जायते सर्वदेहिनाम् ।। ३४ ।।

एकैकस्मिन् गते जन्मन्यर्जितं पुण्यमादरात् ।
तिष्ठत्यात्मनि तत्सर्वं सर्वथा नैव नश्यति ।। ३५ ।।

अनेककोटिभिः कल्पैः क्रमेणैर्वाजितैः शुभैः ।
कर्मभिः कालपाकेन ज्ञानं सम्यक् [1]प्रजायते ।। ३६ ।।

अत्रैव मरणं सम्यक् यस्य सिध्यति देहिनः ।
विज्ञानसाधनं तेन सर्वं पूर्वमनुष्ठितम् ।। ३७ ।।

सेवयास्य[2] विनश्यन्ति पापानि सकलानि तु ।
सेवयास्य समं नास्ति प्रायश्चित्तं न संशयः ।। ३८ ।।

तस्मात् सर्वं परित्यज्य क्षेत्रमेतत्समाश्रयेत् ।
त्वया मया च देवेशि सेवितं हि महाप्रियम् ।। ३९ ।।

यदेतत् क्षेत्रमध्यास्ते वरणानासि संज्ञितम् ।
स्थाने[3] शास्त्रावसेयं तन्मदीयमविमुक्तकम् ।। ४० ।।

अविमुक्तमिदं स्थानं वरणानासि संज्ञितम् ।
यत्तद् ध्येयं विशेषेण यथेदमविमुक्तकम् ।। ४१ ।।

अविमुक्ताश्रयं साम्बं [4]ध्यायिनामखिलात्मनाम् ।
पुरुषा वशमायान्ति निवृत्तविषयाः शिवे ।। ४२ ।।

१. ङ विजायते, २. ङ सेवयैव, ३. क स्थाने शास्त्रावसानेन मदीयमपि मुक्तिदम्, ग घ-स्थाने शास्त्रावसेये तन्मदीयमविमुक्तकम् ङ शास्त्रावसीयेत, ४. क पापिनामखिलात्मनाम्, ख ध्यायिनामस्य पार्वति ।

नश्यन्ति सर्वपापानि ध्यायिनामस्य पार्वति ।
तेनैवावयवेनेदं वरणानासिसंज्ञितम् ।। ४३ ।।

वरणानासि यत्स्थानं तत्स्थानं[1] सर्वदेहिनाम् ।
भ्रुवोर्घ्राणस्य यः सन्धिस्तस्मिन्नेव प्रतिष्ठितम् ।। ४४ ।।

वरणानासिसंज्ञेस्मिन् स्थानं यत्[2] सुप्रतिष्ठितम् ।
मदीयमविमुक्तं तच्चिन्तनीयं [3]मुमुक्षुभिः ।। ४५ ।।

केवलं चिन्तनेनैव क्षेत्रस्यैवास्य मे प्रिये ।
पापानि सर्वजन्तूनां क्षिप्रं नश्यन्त्यसंशयम्[4] ।। ४६ ।।

अविमुक्तं यदध्यात्मं मदीयं क्षेत्रमुत्तमम् ।
अत्राहं देवि सुप्रीतस्त्वया सन्निहितः सदा ।। ४७ ।।

अतः पापविशुद्ध्यर्थं मम ज्ञानस्य सिद्धये ।
अत्र मामादरेणैव ध्यायेन्नित्यमतन्द्रितः ।। ४८ ।।

अर्धयामं मुहूर्तं वा मामत्रैव विचिन्तयेत् ।
पापानामपि सर्वेषां प्रायश्चित्तमिदं भवेत् ।। ४९ ।।

प्रायश्चित्तेषु सर्वेषु [5]ध्यानमेतद्विशिष्यते ।
अतः सर्वं परित्यज्य ध्यानमेतत् सदाभ्यसेत् ।। ५० ।।

पुराऽत्रिः श्रद्धया सार्धं पूर्वपुण्यबलेन तु ।
याज्ञवल्क्यं मुनिश्रेष्ठमपृच्छद् ज्ञानसाधनम् ।। ५१ ।।

योगीश्वरो मुनिश्रेष्ठः साक्षाद् विज्ञानसिद्धये ।
मामुपास्यतया प्राह क्षेत्रेऽस्मिन्नविमुक्तके ।। ५२ ।।

अन्ये च योगिनोऽध्यात्म्ये भ्रुवोर्घ्राणस्य मध्यमे ।
प्रकाशमण्डलं शुद्धं वरणानासिकाभिधम्[6] ।। ५३ ।।

---

१. क दुर्लभं, २. ख यत्तु प्रतिष्ठितम्, ३. ख मनीषिभिः, ४. क संशयः,
५. ख ध्यानमेव विशिष्यते, ६. ख नासिका शिवम् ।

केवलं भावनागम्यमुपदिश्य सुलोचने ।
तदग्रे[1] मामकं क्षेत्रमविमुक्तसमाह्वयम् ।। ५४ ।।

ॐ कारहृदयं सूक्ष्ममुपदिश्य सुलोचने ।
तदग्रे मामनाद्यन्तमसक्तं सर्ववस्तुभिः ।। ५५ ।

सत्यं चैतन्यसम्पूर्णं सुखलक्षणमम्बिके ।
समस्तजगदुत्पत्तिस्थितिसंहारकारणम् ।। ५६ ।।

त्वया सहितमाम्नायवचसामप्यगोचरम् ।
शुद्धस्फटिकसङ्काशं सोमार्धकृतशेखरम् ।। ५७ ।।

त्रिनेत्रं चारुमुकुटं सुसम्पूर्णं शुचिस्मितम् ।
वरदाभयहस्ताभ्यां कालदण्डेन[2] चाम्बिके ।। ५८ ।।

व्याघ्रचर्माम्बरेणापि विचित्राभरणेन च ।
उपवीतेन शुद्धेन शोभमानमतिप्रभुम् ।। ५९ ।।

गुणाभिमानिभिर्देवैर्ब्रह्मविष्णुमहेश्वरैः ।
उपास्यमान[3]मोमर्थमुपास्यत्वविवर्जितम् ।। ६० ।।

स्वात्मभूतपरानन्दप्रकाशैकसुखस्थितम्[4] ।
मोक्षसाधनविज्ञानसाधनत्वेन केवलम् ।। ६१ ।।

प्राहुः सर्वमुमुक्षूणामुपास्यत्वेन केवलम् ।
अन्ये चैश्वर्यसिध्यर्थं ऐश्वर्यासक्तचेतसः ।। ६२ ।।

आहुरन्ये मुनिश्रेष्ठाः क्रममुक्तेस्तु साधनम् ।
अत्राचार्योपदेशेन ये जना मामुपासते ।। ६३ ।।

---

१. ख तन्मध्ये मामकक्षेत्रमविमुक्तसमाह्वयम्, २. ग कालकण्ठेन वाम्बिके,
३. क उपास्यमानसोपार्थमुपास्यत्वविवर्जितम्, ख उपास्यमानमोमर्थमुपास्येन विवर्जितम्,
४. ख महानन्दप्रकाश, क परानन्दं प्रकाश ।

तेषां नित्याभियुक्तानां दास्यामि ज्ञानमुत्तमम्❀ ।
भ्रुवोर्घ्राणस्य यः सन्धिस्तं धियामरनासिके[1] ।। ६४ ।।
[2]द्युलोकस्य परस्यापि सन्धिरित्यपि[3] भावयेत् ।
सन्धिसंज्ञे च मामेवं सन्धिभूतमुपासते ।। ६५ ।।
पूर्वेऽपि ब्रह्मविद्वांसो ध्यायन्तस्तत्र[4] सादरम् ।
मुमुक्षुभिर्मर्त्यजनैर्वाराणस्यां दिने दिने ।। ६६ ।।
अविमुक्ते विमुक्त्यर्थमुपास्योऽहं[5] त्वया सह ।
अत्राविमुक्ते कल्याणि सदा सन्निहितस्त्वहम् ।। ६७ ।।
तेनाविमुक्तसंज्ञात्र यो मामस्मिन्निरन्तरम्[6] ।
उपास्ते प्रीतिसंयुक्तस्तस्मै दास्यामि सुन्दरि ।। ६८ ।।
ज्ञानं मद्विषयं साक्षादविमुक्तसमाह्वयम् ।
अत्र मामादरेणैव यजन्तः पर्युपासते ।। ६९ ।।
सकृद्वापि प्रिये ते तु सर्वदा मामुपासते ।
मूढानामपि मुक्त्यर्थं मामुपास्यतयैव[7] तु ।। ७० ।।
आमनन्ति मुदा भद्रे सदा जाबालशाखिनः ।
जाबालोपनिषत्साध्वि मम ज्ञानस्य सिद्धये ।। ७१ ।।
प्रधानसाधनान्याह प्राणिनामादरेण तु ।
अविमुक्तं मम क्षेत्रं मन्नाम परमं शुभम् ।। ७२ ।।
शतरुद्रीयसंज्ञं च तथा संन्यासमुत्तमम् ।
भस्मनोद्धूलनं तद्वत् त्रिपुण्ड्रस्य च धारणम् ।। ७३ ।।

❀ ङ- अत्राचार्योपदेशेन ये जना मामुपासते ।
तेषां नित्याभियुक्तानां दास्याम्यैश्वर्यमुत्तमम् ।।
अत्राचार्योपदेशेन ये जना मामुपासते ।
तेषां पापमहं सर्वं नाशयामि क्षणेन तु ।।

१. क मरणामिके, ङ मरनायिके, २. क द्युर्लोकस्य ३, भिभावयेत्-क ग ४. ख यतन्तः, ग घ यतोऽतः, ५. यं, ६. मामत्र निरन्तरम्, ७. तथैव ।

रुद्राक्षधारणं साक्षाच्छिवशब्दजपस्तथा ।
भस्मसम्पादनं ध्यानं ममैव परमस्य तु[1] ।। ७४ ।।

एतान्याह प्रधानानि साधनानि प्रियेण तु ।
एतत्सर्वं समाख्यातं मम विज्ञानसिद्धये ।। ७५ ।।

एषु धर्मेषु यः श्रद्धां नित्यं कुर्याद् द्विजोत्तमः ।
अचिराल्लभते ज्ञानं संसारच्छेदकारणम्[2] ।। ७६ ।।

एषु धर्मेषु यो धर्मो विकलो यस्य धर्मिणः[3] ।
न तस्य ब्रह्मविज्ञानं जायते न हि संशयः ।। ७७ ।।

एषु धर्मेषु वै कस्मिन्निरतो यस्तु मानवः ।
न[4] तस्य सर्वपापानां प्रायश्चित्तं भवेत् प्रिये ।। ७८ ।।

अतः सर्वप्रयत्नेन सर्वपापनिवृत्तये ।
एषु धर्मेषु चैकं वा साधयेदप्रमादतः ।। ७९ ।।

अथवा सर्वपापानां प्रायश्चित्तं तथैव तु ।
पुण्डरीकपुरं पुण्यं[5] पुराणामुत्तमोत्तमम् ।। ८० ।।

दर्शनादेव सर्वेषां विमुक्तिफलकारणम्[6] ।
आश्रयेदादरेणैव यत्र मे नर्तनं परम् ।। ८१ ।।

अथवा सर्वपापानां प्रायश्चित्तं तथैव तु ।
सुवर्णमुखरीतोये पवित्रे पापनाशने ।। ८२ ।।

श्रीकालहस्तिसंज्ञे मां पर्वते परया मुदा ।
दृष्ट्वा स्वर्णमथान्यद् वा प्रदद्याद् ब्राह्मणाय वै ।। ८३ ।।

अथवा सर्वपापानां प्रायश्चित्तं तथैव तु ।
सेतुबन्धे महातीर्थे गन्धमादनपर्वते ।। ८४ ।।

---

१. ख वै, ङ. च, २ क संसारोच्छेद, ३. क धर्मणः, ४. ग घ तत्तस्य,
५. क रम्यं ६. ख कारकम् ।

यत्र रामस्तु कल्याणि साक्षाद् दाशरथिः शुभः ।
निहत्य रावणं मूर्खं तत्पापविनिवर्तये (वृत्तये) ।। ८५ ।।
स्थापयामास मल्लिङ्गं स्वनाम्ना देवनायकम् ।
तत्र स्नात्वा यथाशक्ति धनं दत्वा तु पर्वणि ।। ८६ ।।
तं मां दृष्ट्वा महादेवं लिङ्गस्थं करुणाकरम् ।
प्रदक्षिणां[1] नमस्कारं प्रकुर्यात् परमास्तिकः ।। ८७ ।।
अथवा सर्वपापानां प्रायश्चित्तं तथैव तु ।
ज्ञानिनं पूजयेद् भक्त्या धनेन स्वात्मनैव च ।। ८८ ।।
यत्र साक्षाच्छिवो ज्ञानी वर्तते प्रीतिसंयुतः ।
तत्राहं[2] प्रीतिसंयुक्तः सदा सन्निहितः प्रिये ।। ८९ ।।
सर्वं त्यक्त्वा यथा ज्ञानी मामेकं लब्धवान् प्रिये ।
सर्वं त्यक्त्वा तथाहं च तमेकं[3] लब्धवान् मुदा ।। ९० ।।
वर्तते यत्र विज्ञानी त्यक्त्वा शेषक्रियः[4] सदा ।
तत्र तीर्थानि वर्तन्ते सफलं तस्य जीवितम् ।। ९१ ।।
विशुद्धज्ञाननिष्ठस्य कौपीनाच्छादनादिकम् ।
यो ददाति वशस्तस्य त्वयैव सह पार्वति ।। ९२ ।।
ज्ञानिनस्तस्य शुश्रूषुरतीव मम वल्लभः ।
तस्माद् ज्ञानैकनिष्ठस्य कुर्याच्छुश्रूषणं बुधः ।। ९३ ।।

[5]श्रीपराशर उवाच

एवमुक्त्वा[6] महादेवो महादेव्यै सनातनः[7] ।
हिताय सर्वलोकानामालिलिङ्गे[8] महेश्वरीम् ।। ९४ ।।
देवी सकललोकानामखिलानन्ददायिनी ।
आलिलिङ्ग[9] महादेवमतीव परया मुदा ।। ९५ ।।

---

१. ग घ प्रदक्षिणं, २. क ममेकं, ३. क प्रियः, ४. देवि सुप्रीतस्त्वया संनिहित सदा ।
५. ग घ पराशर ६. क एवमुक्तो ७. ख सनातन ८. ख आलिलिङ्ग ९. ग घ आलिलिङ्गे ।

यदुक्तं देवदेवेन जनानां[1] हितकाम्यया ।
प्रायश्चित्तं तु पापानां तदेव कथितं मया ॥ ९६ ॥
प्रायश्चित्तविहीनस्य पापाचाररतस्य तु ।
फलभोगाय पापानां नरकानसृजच्छिवः ॥ ९७ ॥
नरके दुःखभोगार्थं शरीरं यातनामयम् ।
शिवेनोत्पाद्यते जन्तोर्नास्तिकस्य दुरात्मनः ॥ ९८ ॥
विना नरकभोगेन विवशो जायते नरः ।
श्वसूकरखरोष्ट्राश्वमृगसर्पादियोनिषु ॥ ९९ ॥
तत्र तत्र [2]महादुःखमप्रसह्यमनेकशः ।
भुंक्ते यथात्मलेपेन नरः प्रत्यक्षमेव तत् ॥ १०० ॥
अवश्यमनुभोक्तव्यं पापानां फलमास्तिक ।
प्रायश्चित्तविहीनेन प्रायश्चित्तमतश्चरेत् ॥ १०१ ॥
सर्वमुक्तं समासेन प्रायश्चित्तं शुकानघ ।
श्रद्दधानस्य दातव्यं न देयं यस्य कस्यचित् ॥ १०२ ॥

इत्युपपुराणे पाराशरे पञ्चदशोऽध्यायः ॥ १५ ॥

---

१. देवदेवेश जगतां २. ख महद्दुःखम् ।

अथ षोडशोऽध्यायः

श्रीपराशर उवाच

अथ पूजाविधिं वक्ष्ये शिवस्य परमात्मनः ।
सर्वकारणभूतस्य त्रिमूर्तीनां परस्य तु ॥ १ ॥

परिपूर्णस्य रुद्रस्य जगतः कारणस्य तु ।
सच्चिदानन्दरूपस्य पूजा ज्ञानं हि केवलम् ॥ २ ॥

ज्ञानप्रदा परा पूजा नास्तिकस्य न सा भवेत् ।
आस्तिकस्यापि रुद्रस्य प्रसादेनैव सिद्ध्यति ॥ ३ ॥

प्रसादलभ्या सा पूजा पवित्रा पापनाशिनी ।
परानन्दप्रदा पूजा योगिनां सार्वकालिकी ॥ ४ ॥

आवाहनविनिर्मुक्ता विसर्जनविवर्जिता ।
क्रियाकलापनिर्मुक्ता कर्तृतारहिताफला ॥ ५ ॥

योगिनामात्मसंवेद्या विश्वविश्रान्तिरूपिणी ।
विश्वस्योल्लासविश्रान्तिर्विलासरसनोदिता ॥ ६ ॥

महती देवपूजा सा सदा सा योगिनां खलु ।
प्रमाता च प्रमाणं च प्रमेयं प्रमितिः[२] परा ॥ ७ ॥

चिदेवेति परिज्ञानं पूजैषा परमात्मनः ।
विग्रहं देवदेवस्य विश्वमेतच्चराचरम् ॥ ८ ॥

इति ज्ञानं परा पूजा शिवस्य महती हि सा ।
योगिनामेव सा पूजा महती हि सुमङ्गला ॥ ९ ॥

अयोगी तत्प्रसिध्यर्थं कुर्याल्लिङ्गे शिवार्चनम् ।
सर्वकर्माणि शुद्धानि[३] ज्ञानस्योत्पादकानि वै ॥ १० ॥

---

१. क विश्रान्तिविलासरसमाहिता, ग घ........मादिता, ङ. विश्रान्तेर्विलासरसमादित,
२, क प्रमतिः ३. क सिध्यन्ति ।

ज्ञाने जाते क्रियाः सर्वा विनश्यन्ति न संशयः ।
पूजया परमा मुक्तिः पूजया शुद्धवेदनम् ॥ ११ ॥
ब्रह्मविष्ण्वादिदेवानां पदप्राप्तिश्च पूजया ।
अष्टैश्वर्यं सुरत्वं च पदं गान्धर्वपूर्वकम् ॥ १२ ॥
सार्वभौमत्वमीशस्य पूजयैव हि सिद्ध्यति ।
मनोहराः स्त्रियः सौख्यं [1]कल्याणभवनानि च ॥ १३ ॥
अपर्यन्तधनं वापि पूजया शूलिनः खलु ।
पूजा लिङ्गे महेशस्य पुरुषार्थचतुष्टयम् ॥ १४ ॥
ददाति सर्वजन्तूनामचिरादेव सत्तम ।
रौद्रं लिङ्गं महाविष्णुर्भक्त्या शुद्धं शिलामयम् ॥ १५ ॥
चारुचित्रं समभ्यर्च्य लब्धवान्[2] परमं पदम् ।
या[3] च लक्ष्मीः समाख्याता महाविष्णोश्च वल्लभा ॥ १६ ॥
यस्य लिङ्गं समभ्यर्च्य संपूज्यः सर्वचेतनैः ।
ब्रह्मा सर्वजगत्कर्ता यस्य लिङ्गार्चनेन तु ॥ १७ ॥
भारतीं प्राप्तवानाशु, स पूज्यः सर्वचेतनैः ।
यस्य[4] लिङ्गं समभ्यर्च्य स्वभर्तुर्वल्लभाऽभवत् ॥ १८ ॥
शची देवी स्त्रियश्चान्याः स पूज्यः सर्वचेतनैः ।
यस्य लिङ्गं समभ्यर्च्य मरुतः सकला अपि ॥ १९ ॥
लब्धवन्तः श्रियं पूर्णां स पूज्यः सर्वचेतनैः ।
यस्येन्द्रियाणि पूजार्थे भवन्ति शुभदेहिनः ॥ २० ॥
कदाचिदपि वा विप्र सफलं तस्य जीवितम् ।
एककालं द्विकालं वा त्रिकालमथवा नरः ॥ २१ ॥
लिङ्गे दिने दिने देवं पूजयेदादरेण तु ।
आसनावाहने चार्घ्यपाद्यमाचमनं तथा ॥ २२ ॥

---

१. ख कल्याणं, २. ख × लब्धवान्······समभ्यर्च्य, ३. घ सा, ४. ख × यस्य···सर्वचेतनैः ।

स्नानं वासोपवीतं च भूषणानि च सर्वशः ।
गन्धं पुष्पं तथा धूपं दीपमन्नेन तर्पणम् ।। २३ ।।

माल्यानुलेपनं चैव नमस्कारो विसर्जनम् ।
एवं पूजाक्रमः प्रोक्तः समासेन मया तव ।। २४ ।।

विस्तरेण मया वक्तुं न शक्यं कल्पकोटिभिः ।
प्रणवेनैव मन्त्रेण सर्वं कुर्यादतन्द्रितः ।। २५ ।।

प्रणवः सर्वमन्त्राणां खलु कंदं[1] सनातनम् ।
श्रीमत्पञ्चाक्षरेणैव सतारेणाथवा[2] मुदा ।। २६ ।।

पूजयेद् देवदेवेशं लिङ्गेऽभीष्टार्थसिद्धये ।
त्रियम्बकेन मन्त्रेण श्रौतैरन्यैरथापि वा ।। २७ ।।

लिङ्गे दिने दिने देवं पूजयेदादरेण तु ।
प्रतिष्ठितानि लिङ्गानि पर्वतेषु वनेषु च ।। २८ ।।

नदीतीरेषु वान्यत्र मनुष्यैर्मुनिभिः सुरैः ।
यक्षराक्षसगन्धर्वसिद्धविद्याधरादिभिः ।। २९ ।।

तिर्यक् जातिषु जातैश्च तथान्यैरपि जन्तुभिः ।
यानि तानि महाप्रीत्या ब्राह्मणो वाऽथवा [3]परः ।। ३० ।।

प्रदक्षिणत्रयं कुर्यात् प्रकृत्या प्रणतिं भुवि ।
सापि पूजा हि कल्याणि सर्वदोषविवर्जिता ।। ३१ ।।

अयत्नलभ्या सर्वेषां भुक्तिमुक्तिफलप्रदा ।
अग्निहोत्रादिमध्ये वा मण्डले सूर्यसोमयोः ।। ३२ ।।

हृदये ब्रह्मरन्ध्रे वा पूजयेदीश्वरेश्वरम् ।
अन्तरिच्छन्ति ये रुद्रं सदा वन्द्यं मनीषया ।। ३३ ।।

गृह्णन्ति जिह्वया सोमं रसपूर्णामृतोदकम् ।
अन्तर्नेच्छन्ति ये रुद्रं भवानीसहितं[4] भवम् ।। ३४ ।।

१, ख कंदः सनातनः, २, क सतारेणापरा, ३. ख पुनः, ४, क भावान्या सहितं ।

पुरीषमेव गृह्णन्ति जिह्वया ते न संशयः ।
भवानीसहितं ध्यानं लिङ्गे रुद्रस्य पूजनम् ॥ ३५ ॥
वाराणस्यां स्थितिर्भक्तिर्नाल्पस्य[1] तपसः फलम् ।
श्रीमद्व्याघ्रपुरे पुण्ये वर्तनं परया मुदा ॥ ३६ ॥
कालहस्तिगिरौ वापि नाल्पस्य तपसः फलम् ।
शिवशङ्कररुद्रादिनामानि परमात्मनः ॥ ३७ ॥
साम्बमूर्तिस्त्रिनेत्रा या सा परस्य परात्मनः ।
साक्षान्मूर्तिरितिज्ञानं नाल्पस्य तपसः फलम् ॥ ३८ ॥
नामानीति परिज्ञानं नाल्पस्य तपसः फलम् ।
नारायणादिनामानि न साक्षात् परमात्मनः ॥ ३९ ॥
नामानीति परिज्ञानं नाल्पस्य तपसः फलम् ।
एकस्य देवदेवस्य ब्रह्मविष्णुमहेश्वराः ॥ ४० ॥
अंशभूता इति ज्ञानं नाल्पस्य तपसः फलम् ।
अंशभूता अमी जीवैः[2] शिवप्राप्त्यर्थमादरात् ॥ ४१ ॥
उपास्या इति विज्ञानं नाल्पस्य तपसः फलम् ।
बहुनात्र किमुक्तेन शिवः पूज्यः परात्परः ॥ ४२ ॥
यथाधिकारं विप्राद्यैर्ज्ञानेन क्रियया ऽथवा[3] ॥ ४३ ॥

इत्युपपुराणे पाराशरे षोडशोऽध्यायः ॥ १६ ॥

---

१. ख घ भक्त्या, २. क जीवाः, ३. क यथा ।

अथ सप्तदशोऽध्यायः

श्रीपराशर उवाच

अथ साक्षात् परं तत्त्वं समस्तजगदाश्रयम् ।
समासेन प्रवक्ष्यामि श्रृणु तत्[1] श्रद्धया सह ।। १ ।।
दृश्यं जगदिदं सर्वं शुक्तिकारजतादिवत् ।
अज्ञानेनैव कस्मिंश्चित् कल्पितं नैव वस्तुतः ।। २ ।।
कल्पितस्य समस्तस्य यदधिष्ठानमास्तिक ।
तत्कल्पितपदार्थेन भिन्नलक्षणमेव हि ।। ३ ।।
अधिष्ठानमसत्यस्य सत्यमेव न संशयः ।
शुक्तिका व्यवहारे तु सती न रजतोपमा ।। ४ ।।
केवलं सत्यता शुक्तौ दृष्टान्तत्वेन गृह्यते ।
न व्यवहारिकत्वं[2] च सत्यत्वं नास्ति हेतुजम् ।। ५ ।।
सर्वसाक्षिस्वरूपस्य प्रागभावाद्यसम्भवात् ।
जन्मनाशाद्यभावेन सदा सत्यं परं पदम् ।। ६ ।।
कल्पितस्य समस्तस्य भासकत्वात् स्वयं प्रभम् ।
स्वयं प्रकाशं चैतन्यं तद्धि सर्वावभासकम् ।। ७ ।।
यस्य शेषतया सर्वमिदं प्रेमास्पदं भवेत् ।
शेषिरूपं च तत्साक्षात् सुखवत् सुखमेव हि ।। ८ ।।
ब्रह्मणः शेषभूतं हि जगत् सर्वं चराचरम् ।
अतः शेषपरं तत्त्वं [3]परानन्दस्वलक्षणम् ।। ९ ।।
सत्तया च प्रकाशेन प्रियेण च परं पदम् ।
इदं सर्वं जगद् व्याप्तं शुक तिष्ठति हि स्थिरम् ।। १० ।।

---

१. क तम्, २. ग ङ घ व्यावहारिकत्वं, ३. क परानन्दः ।

वस्तुगत्या जगत्तेन विना नैव प्रतीयते ।
सद्भावो जगतस्तस्मादनन्तं हि परं पदम् ।। ११ ।।

सत्यं ज्ञानं सुखं वापि[1] स्वरूपं परवस्तुनः ।
न धर्मो भेदशून्यत्वाद् वस्तुनो धर्मधर्मिणः ।। १२ ।।

धर्मिणो धर्मधर्मित्वं खलु लोके प्रतीयते ।
नैव भेदस्तयोरस्ति भेदस्यैवानिरूपणात् ।। १३ ।।

ययोर्भेदस्तयोर्भेदप्रकाशात्[2] पूर्वमेव तु ।
विभेदेन प्रकाशः स्याद् भेदे भाते भिदा तयोः ।। १४ ।।

द्वयोर्भेदो न चेत्तर्हि भेद एकस्य वस्तुनः ।
एकस्यैव[3] च यः प्राप्तः स मृषा चन्द्रभेदवत् ।। १५ ।।

तस्मात् सत्यचिदानन्दा गुणा न परवस्तुनः[4] ।
स्वरूपमेव भेदस्तु तस्य मायाविजृम्भितः ।। १६ ।।

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।
इत्याह हि परा शुद्धा श्रुतिः सत्यार्थवादिनी ।। १७ ।।

स्वतः प्रमाणभूतेन वेदेनैव प्रकाशितम् ।
यत्तदेव खलु प्राज्ञ सत्यं वस्तु न चापरम् ।। १८ ।।

अतीन्द्रियार्थे धर्मे च तथाधर्मे परात्मनि ।
प्रमाणं वेद एवैकः खलु नान्यत् तपोधन ।। १९ ।।

यदुक्तलक्षणं तत्त्वं[5] तस्यासाधारणानि च ।
नामान्येतानि हे विप्र न ह्यन्यैस्तस्य[6] सङ्गतिः ।। २० ।।

शिवः शम्भुः[7] परं ब्रह्म सत्यमीशान ईश्वरः ।
एवमादीनि नामानि तानि रुढ्या परात्मनः ।। २१ ।।

---

१. ग घ चापि, २. क भेदः, ३. ग घ–भेद एकस्य यः प्राप्तः, ४. ख चिदानन्द,
५. ख वस्तु, ६. ग नहि त्वेतस्य, ७. ग सत्यपरं ।

केचिद् रुढ्या च योगेन प्रवदन्ति महर्षयः ।
केचिद् रुढ्यैव योगेन नैव वाञ्छन्ति सत्तम ॥ २२ ॥

निर्विशेषं निरालम्बं निर्मलं निर्गतद्वयम् ।
स्वानुभूत्यैकसंसिद्धं कथं शब्दस्य गोचरम् ॥ २३ ॥

नारायणो हरिर्विष्णुर्मुकुन्दः केशवोऽच्युतः ।
एवमादीनि नामानि नैव तत्त्वपराणि वै ॥ २४ ॥

परतत्त्वोपदेशस्य सन्निधौ पठिता[1] अमी ।
शब्दाः कथञ्चित् योगेन प्रवर्तन्ते न मुख्यतः ॥ २५ ॥

साक्षात् परतरस्यैव वस्तुतः[2] सर्वसाक्षिणः ।
अस्ति मूर्तिः परा शुद्धा स्वतन्त्रा पापनाशिनी ॥ २६ ॥

तस्मात्[3] साधारणी मूर्तिः साम्बा चन्द्रार्धशेखरा ।
नीलग्रीवा विरूपाक्षा ध्येया ब्रह्मादिभिः परैः ॥ २७ ॥

जगत् सृष्टौ स्थितौ देव्योमया पार्श्वस्थया सह ।
वर्तते सा परा मूर्तिः संहारे केवला भवेत् ॥ २८ ॥

मूर्ति परां च गृह्णाति लोकानां हितकाम्यया ।
ब्रह्मविष्णवादयो[4] देवास्तां ध्यायन्ति निरन्तरम् ॥ २९ ॥

विग्रहः सम्प्रदानं च युगपत् कर्मसन्निधिः ।
देवादीनां च विद्यन्ते विग्रहादीनि पञ्च च ॥ ३० ॥

प्रीतिः फलप्रदत्वं च विद्यते परमात्मनः ।
ब्रह्मविष्णुमहेशानां तदंशानां तथैव च ॥ ३१ ॥

शिवस्य परतत्त्वस्य स्वभावः सकलं[5] शुक ।
तदधीनं सदान्येषामिति तत्त्वविदां स्थितिः ॥ ३२ ॥

---

१. क पठितान्यपि, २. ङ वस्तुनः, ३. ग घ तस्याः, ४. ख ब्रह्मविष्णुमहेशाना, ५. ङ केवलं ।

साक्षात् परतरं[1] तत्त्वं स्वभावादेव निर्मलम् ।
उत्पत्त्यादिविनिर्मुक्तं स्वतन्त्रं पूर्णमद्वयम् ॥ ३३ ॥

प्रकृतिप्राकृतातीतं लक्ष्यलक्षणवर्जितम् ।
बन्धमोक्षविनिर्मुक्तं बन्धमोक्षविधायकम् ॥ ३४ ॥

स्वात्मभूतपरानन्दपरशक्तिसमन्वितम्[2] ।
पराहृतानुसन्धानं[3] परमक्रीडयान्वितम् ॥ ३५ ॥

कालातीतं कलातीतं कालकग्रासवर्जितम्[3] ।
अनन्तमखिलाधारमपरिच्छिन्नवैभवम् ॥ ३६ ॥

परतत्त्वानुसन्धानं[4] परमक्रीडयापि च ।
विद्या वेद्याखिलोल्लासविलसत्परिबृंहितम्[5] ॥ ३७ ॥

तद्विदित्वा विमुच्यन्ते देशिकानुग्रहेण च ।
प्रसादेन[6] च रुद्रस्य भवानीसहितस्य तु ॥ ३८ ॥

अतः सकलजन्तूनां तदेव परमं पदम् ।
वेदितव्यं विशेषेण विद्यया हि परा गतिः ॥ ३९ ॥

मूर्तिः परतरा ध्येया विमुक्त्यर्थं मुमुक्षुभिः ।
मूर्तिध्यानं विना विद्या परा नैव विजायते ॥ ४० ॥

निष्कले[7] तु परे तत्त्वे निरालम्बे निरञ्जने ।
किं करोति जनः क्षुद्रस्ततस्तां नित्यमाश्रयेत् ॥ ४१ ॥

ज्ञानावलम्बनभ्रान्त्या मनुष्या मन्दबुद्धयः ।
मूर्त्युपेक्षां प्रकुर्वन्ति ज्ञानं तेषां न जायते ॥ ४२ ॥

साधनानि परित्यज्य फलमिच्छन्ति ये जनाः ।
भोजनेन विना तेषां क्षुन्निवृत्तिर्भविष्यति ॥ ४३ ॥

---

१. शिवपरं, २. पराशक्तिसमन्वितम्, ३. पराहन्तानुसन्धानम्, ४. ग परेदंतानुसन्धानं, ५. घ ङ विलास, ६ ङ. प्रसादादेव, ७, क निःकले ।

अतो वेदनपर्यन्तं भक्तिध्यान[1]जपार्चनम् ।
अन्यच्च वेदसंसिद्धं प्रकुर्यादास्तिको जनः ।। ४४ ।।

मम हृदि निहितं तवातिगुप्तं
शुक कथितं करुणाबलेन सिद्धम् ।
श्रुतिरपि परमा शिवं पुराणं
परमहरिप्रमुखा इदं वदन्ति ।। ४५ ।।

इत्युपपुराणे पाराशरे सप्तदशोऽध्यायः ।। १७ ।।

१. क ज्ञानं ।

अथ अष्टादशोऽध्यायः

श्रीपराशर उवाच

अथ शास्त्रार्थसंक्षेपं प्रवक्ष्यामि समासतः ।
मुमुक्षुभिर्महाप्राज्ञैर्वेदितव्यो विशेषतः ॥ १ ॥

शासनाच्छंसनाच्चैव शास्त्रमित्युच्यते बुधैः ।
शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवेदिभिः[1] ॥ २ ॥

तत्रैकं विधिरूपेण तदन्यत् प्रतिषेधतः ।
शंसनं भूतवस्त्वेकविषयं न क्रियापरम् ॥ ३ ॥

विधिरूपस्य शास्त्रस्य प्रतिषेधात्मकस्य च ।
केवलं भूतवस्त्वेकविषयस्य तथैव च ॥ ४ ॥

अज्ञोऽधिकारी न प्राज्ञो नैवात्मा नैव विग्रहः ।
चातुर्वर्ण्यं समालंब्य[2] कश्चिदाश्रममास्तिक[3] ॥ ५ ॥

वयोविशेषमालंब्य तथावस्थान्तरं परम् ।
विशेषालम्बनं शास्त्रं विशेषे सति सत्तम ॥ ६ ॥

प्रवर्तते स्वभावेन तस्यास्ति न निवर्तकम् ।
वर्णाश्रमवयोऽवस्थाविशेषाध्यासवर्जितः ॥ ७ ॥

ब्रह्मवित् सकलं शास्त्रं कटाक्षेणापि नेक्षते ।
देहावलम्बनेनैव केवलं न प्रवर्तते ॥ ८ ॥

शास्त्रं नश्यति देहोऽत्र फलमन्यत्र हीरितम् ।
केवलात्मानमालंब्य मुने शास्त्रं न किञ्चन ॥ ९ ॥

---

१. च वादिभिः, २. च समालक्ष्य ३. क क्वचिदाश्रम, ।

प्रवर्तते ततो देहादन्योऽज्ञो भ्रान्तिमाश्रितः ।
आत्मा शास्त्राधिकारी स्यात् स हि संसारविभ्रमात्[1] ॥ १० ॥

तस्मिन्नात्मनि मोहेन बन्धमोक्षौ प्रकल्पितौ ।
शास्त्रमापाततो भाति मुने बहुमुखं नृणाम् ॥ ११ ॥

निरूपिते[2] तु न्यायेन विभात्येकमुखं पुनः ।
शास्त्रनिर्णायकं न्यायकलापं मुनिसत्तम ॥ १२ ॥

सूत्ररूपेण कुर्वन्ति शिवस्यैवाज्ञयैव तु ।
अल्पाक्षरमसन्दिग्धं[3] सारवद् विश्वतो मुखम् ॥ १३ ॥

अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।
मुनयश्च मनुष्याश्च प्रसादादेव शूलिनः ॥ १४ ॥

सूत्रार्थं भाष्यरूपेण यथावद् दर्शयन्ति च ।
सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः ॥ १५ ॥

स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।
प्रसादादेव रुद्रस्य भवानीसहितस्य तु ॥ १६ ॥

कुर्वन्ति केचिद् व्याख्यानं भाष्यस्यैव तपोबलात् ।
पदच्छेदः पदार्थोक्तिर्विग्रहो[4] वाक्ययोजना ॥ १७ ॥

आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ।
केचिद् वार्तिकरूपेण भाष्यार्थं कथयन्ति च ॥ १८ ॥

प्रासादादेव रुद्रस्य पूर्वे पूर्वतपोबलात् ।
उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ॥ १९ ॥

तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः ।
स्वबुद्ध्यधीनं भाष्यार्थं सङ्ग्रहेणैव चाथवा[5] ॥ २० ॥

विस्तरेण प्रकुर्वन्ति केचित् प्रकरणात्मना ।

---

१. ङ च संसरति भ्रमात्, २. क निरूपितोक्तन्यायेन, ३. ङ स्वल्पा, ४. ख ग पदार्थश्च, ५. ग वाथवा, ।

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ॥ २१ ॥

आहुः[1] प्रकरणं नाम शास्त्रभेदविचक्षणाः ।
सूत्रभाष्यादिभिः शास्त्रं साक्षाद् वेदनसाधनम् ॥ २२ ॥

श्रोतव्यं स्वगुरोः स्वात्मस्वरूपप्रतिपत्तये ।
आत्मलाभात् परं[2] नास्ति किञ्चिन्मात्रमपि द्विज ॥ २३ ॥

अतः स्वात्मानमीशानं लभते स्वात्मना स्वयम् ।
लब्धस्य[3] लाभो लब्धः स्यादलब्धस्य तथैव हि ॥ २४ ॥

द्विधा[4] लाभः स्वकं रूपं तत्र लब्धं हि सन्ततम् ।
लब्धस्यालब्धताज्ञानाल्लाभस्तस्यैव वेदनात् ॥ २५ ॥

आत्मलाभः स्वतः स्वात्मवेदनोत्पत्तिरेव हि ।
स्वात्मलाभनिमित्तं यद् बन्धनं पुरुषस्य तत् ॥ २६ ॥

स्वात्मलाभेन नष्टं[5] स्यात् स्वात्ममात्रतयैव[6] तु ।
स्वात्ममात्रतया नष्टं स्वात्मनो[7] नैव बन्धनम् ॥ २७ ॥

अस्ति स्वात्मैव नैवान्यद्[8] वस्तुतत्त्वनिरूपणे ।
व्यावहारिकदृष्ट्यैव[9] विभाति स्वात्मनः पृथक् ॥ २८ ॥

समस्तं व्याप्तभावत्वाद् भावः स्वात्मैव केवलम्[10] ।
स्वस्वरूपस्य लाभेन स्वात्मानन्दो महत्तमः ॥ २९ ॥

अपरोक्षतया भाति सा परा मुक्तिरात्मनः ।
आत्मा नाम जडस्यास्य [11]प्रकाशस्य प्रकाशकः ॥ ३० ॥

---

१. च प्राहुः, २. च परो,
३. ग घ लब्धस्य लाभो लब्धस्य लब्धव्यस्य तथैव हि,
ङ च ,, ,, ,, ,, च, ४. क विद्या ।
५. क दृष्टः, ६. क आत्ममात्रं तथैव च, ७. क ह्यात्मनो, ८. ख नैवान्य, ९. क व्यवहारैकदृष्ट्वैव, १०. ग स्वात्मैक्य, ११. च प्रकाश्यस्य ।

स्वयंज्योतिः सदानन्दः सत्यः[१] सम्पूर्णलक्षणः ।
अस्यैवोपाधिभेदेन विभेदः कल्पितः स्वयम् ॥ ३१ ॥

नैव स्वाभाविको भेदो यतो दृष्टः स आत्मना ।
दृश्यभूतस्तु नैल्यादिधर्मो दृश्यस्य[२] हि द्विज ॥ ३२ ॥

यथा न दृष्टः[३] धर्मः स्यात् स तु[४] लोके व्यवस्थितः ।
एवं भेदोऽपि दृश्यत्वात् दृश्यधर्मो न संशयः ॥ ३३ ॥

दृष्टधर्मो[५] न दृश्यः स्याद् दृष्टबोधो यथा तथा ।
दृष्टबोधोऽपि[६] दृश्यश्चेद्[७] दृष्टतैव न सिध्यति ॥ ३४ ॥

विरुद्धं रूपमेकस्य सर्वथा घटते न हि ।
दृष्टभेदो न भातश्चेदभेदः[८] सत्य एव हि ॥ ३५ ॥

दृष्टभेदो[९] न चेद् भेदः तदा नैव हि सिध्यति ।
अभेदो[१०] यस्य सत्यः स्यात् स तु भेदस्तु नैल्यवत् ॥ ३६ ॥

दृश्यधर्मो[११] न दृक् धर्मः तस्मादात्माद्वयः सदा ।
औपाधिकेन भेदेन भिन्नमेव परं पदम् ॥ ३७ ॥

जीव ईश्वर इत्यादिविशेषः[१२] प्रतिरूपभाक् ।
जीवः संसारदोषेण दुष्टवत् प्रतिभासते ॥ ३८ ॥

व्यवहारदशायां तु न दुष्टः परमार्थतः ।
व्यवहारदशायां च[१३] न दुष्टः परमेश्वरः ॥ ३९ ॥

यथाकाशस्थितः सूर्यश्चलनादिविवर्जितः ।
सूर्य एकः शरावादिपात्रस्थेषूदकेषु हि ॥ ४० ॥

---

१. ग सत्यसंपूज्यलक्षणः, घ सत्यसंपूर्णलक्षणः—ङ च, २. क दृश्यो न, ३. ग घ दृष्टधर्मः-च ङ, ४. क ङ, तत्तु, ५. च द्रष्टृधर्मो, द्रष्टृबोधः, द्रष्टृतैव, ६. ख हि, ७. क दृष्टश्चेद् ८. क भातंचेद् विभेदः, ९. ख च द्रष्टृमात्रं भवेद्भेदः, ग घ दृष्टिभिन्नो भवेद्भेदः, १०. ख घ च भेदो यद्यसत्यः, ग अभेदो यस्य सत्यस्य, ११. च दृश्यधर्मा न दृग्धर्मास्तदात्मा चाद्वयः सदा, १२. क ग विशेषप्रतिरूपभाक्, १३. क तु ।

भिन्नवद् भाति जीवानां तथा भेदः प्रकल्पितः ।
अर्कस्य प्रतिबिम्बं[1] हि चलतीव प्रकाशते ॥ ४१ ॥

संसारीव[2] तथा भाति जीव एव न चेश्वरः ।
लेपश्च[3] पुण्यपापाभ्यां जन्मना शौच[4] दुःखितः ॥ ४२ ॥

जीवस्यैव न देवस्य बिम्बभूतस्य सत्तम ।
बिम्बत्वं प्रतिबिम्बत्वं यथा पूषणि कल्पितम् ॥ ४३ ॥

ईश्वरत्वं च जीवत्वं तथात्मनि न संशयः ।
विनष्टे जलपात्रे तु यथादित्यस्य नश्यति ॥ ४४ ॥

बिम्बत्वं प्रतिबिम्बत्वमुभयत्वं[5] तथैव तु ।
अज्ञानोपाधिनाशे तु नश्यत्येव परात्मनः ॥ ४५ ॥

ईश्वरत्वं च जीवत्वमुभयत्वं[6] न संशयः ।
बिम्बत्वादिविनिर्मुक्तः स्वस्वरूपेण भास्करः ॥ ४६ ॥

यथा दीपः[7] स्थितः शुद्धस्तथैवात्मापि केवलः ।
ईश्वरत्वादिनिर्मुक्तः आत्मा यः परमः स्वयम् ॥ ४७ ॥

सत्यानन्दचिदानन्दस्वरूपेणावशिष्यते ।
प्रतिबिम्बादपि श्रेष्ठो बिम्बभूतो हि भास्करः ॥ ४८ ॥

ततोऽपि भगवान् भानुर्विशिष्टः केवलस्तथा ।
ईश्वरः सर्वजीवेभ्यो विशिष्टः केवलस्ततः ॥ ४९ ॥

विशिष्टः सच्चिदानन्दः साक्षी साक्ष्यविवर्जितः ।
बिम्बभूतस्य सूर्यस्य प्रतिबिम्बमपेक्ष्य तु ॥ ५० ॥

वैशिष्ट्यमपि वैशिष्ट्यं स्वभावः केवलस्य हि ।
अपेक्ष्य जीवमीशस्य वैशिष्ट्यमपि साक्षिणः ॥ ५१ ॥

---

१. च प्रतिबिम्बो २. ग क संसारी च ३. च लयश्च पुण्यपापाभ्यां जन्मनाशौचदुःखिता, ४. क सौ च, ५. ख उभयश्च, ६. ख उभयश्च—च, ७. ग घ दीप्तः ।

केवलस्य तु वैशिष्ट्यं स्वभावस्तद्वदेव हि ।
साक्ष्यापेक्षं च साक्षित्वं साक्ष्याभावेऽपगच्छति[1] ॥ ५२ ॥

स्वाभाविकं तु साक्षित्वं कदाचिन्नापि गच्छति ।
भास्यापेक्ष्यं रवेर्यद्वद्भासकत्वं विनश्वरम् ॥ ५३ ॥

अपि स्वाभाविकं तत्तु तस्य नैव विनश्यति ।
स्वाभाविकं तु साक्षित्वमात्मनः सार्वकालिकम् ॥ ५४ ॥

अपि साक्ष्यापेक्ष्यैव खलु तद् व्यपदिश्यते ।
भासकत्वं तु सूर्यस्य भास्याभिव्यक्त्यपेक्षया ॥ ५५ ॥

स्वाभाविकं यथा लोके मनुष्यैर्व्यपदिश्यते ।
स्वाभाविकं तु साक्षित्वं साक्ष्याभावे विनैव तु ॥ ५६ ॥

व्यपदेश्यं स्वरूपेण केवलं तिष्ठति ध्रुवम् ।
भासकत्वं स्वतः सिद्धं भास्याभावे विनैव तु ॥ ५७ ॥

व्यपदेशं यथार्कस्य स्वरूपेणैव[2] तिष्ठति ।
स्वभावादेव यः साक्षी स एव परमः शिवः ॥ ५८ ॥

तदैक्यं हि परा मुक्तिर्जीवसंज्ञस्य देहिनः ।
स्वत एवं त्वभिन्नस्य[3] तदैक्यं परमात्मनः ॥ ५९ ॥

तदैक्याज्ञाननाशेन[4] स्वत एव प्रकाशते ।
जीवब्रह्मैक्यविज्ञानाद् यदज्ञानं विनश्यति ॥ ६० ॥

तन्न भिन्नं न चाभिन्नं नापि सत्सद्[5] विलक्षणम् ।
महदादिजगच्छून्यं[6] पर्यन्तमखिलं जडम् ॥ ६१ ॥

ब्रह्मात्मैक्यापरिज्ञानमहामायाविजृम्भणम्[7] ।
संसारहेतुभूतस्य मूलाज्ञानस्य बाधकम् ॥ ६२ ॥

---

१. क स साक्ष्याभावेऽपि, २. स स्वरूपेणावतिष्ठति, ३. क स्वभिन्नस्य, ४. ख सदैक्यं,
५. क सदसद् विलक्षणम्, घ तत्सद्विलश्रणम्, ६. च जगज्जन्म,
७. स ब्रह्मात्मैक्यपरिज्ञानात् ।

ब्रह्मात्मैक्यपरिज्ञानं वेदादेव विजायते ।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ ६२ ॥

क्षीयन्ते सर्वकर्माणि ब्रह्मज्ञानोदये सति ।
ब्रह्मज्ञानेन विध्वस्तमपि सर्वमिदं जगत् ॥ ६३ ॥

भाति [1]च्चाभासरूपेण [2]प्रारब्धान्तमसंशयः ।
यानि कर्माणि संसारफलहेतूनि सत्तम ॥ ६४ ॥

तानि तत्साधनत्वेन देहमुत्पादयन्ति वै ।
विद्यारम्भककर्मापि शमादीन्यखिलानि तु ॥ ६५ ॥

विनैव साधनं देहे विद्यामुत्पादयन्ति वै
अन्यैः सम्पादिते देहे विद्याहेतूनि यानि तु ॥ ६६ ॥

तानि तान्यनुसृत्यैव विद्यामुत्पादयन्ति वै ।
प्रारब्धफलपर्यन्तं प्रपञ्चस्यावभासनम् ॥ ६७ ॥

प्रदग्धुं नैव सक्ता सा विद्या वेदान्तवाक्यजा ।
देहहेतूनि कर्माणि स्वातन्त्र्येणैव वेदने ॥ ६८ ॥

निःशेषदाहकाकारं प्रतिबध्नन्ति सत्तम ।
विद्या स्वोदयमात्रेण[3] संसारविनिर्वर्तिका ॥ ६९ ॥

परतत्त्वसमुत्पन्ना[4] दहत्यखिलसत्यताम् ।
सत्यत्वे[5] तु प्रनष्टेऽपि प्रतीत्यारम्भकाणि तु ॥ ७० ॥

कर्माणि फलहेतूनि सफलं भोजयन्ति हि ।
सत्यत्वस्य च दग्धत्वात् प्रतीत्याभोगसम्भवात् ॥ ७१ ॥

जीवन्मुक्त इति प्रोक्तः प्रारब्धान्तमनिन्दितः ।
जीवनमुक्तस्य पुण्यं वा पापं वा नैव विद्यते ॥ ७२ ॥

---

१. क चाभाति, २. च स प्रारब्धान्तं न संशयः, ३. च सोत्पत्ति, ४. ग घ परतन्त्रैः,
५. क सत्यत्वेऽस्य ।

कर्तुरेव हि तत्सर्वं कर्तृता[1] नात्मवेदिनः ।
कर्तृताहंकृतेरेव कर्ताहमिति भासनात् ॥ ७३ ॥

अहमः कर्तृरूपः[2] स्यात् साक्ष्येवात्मा स्वयंप्रभुः[3] ।
सर्वदा साक्षिमात्रत्वमेव शुद्धात्मवस्तुनः ॥ ७४ ॥

इति ज्ञानवतः पूर्वमपि नैव हि कर्तृता ।
कर्तृताऽज्ञानवेलायां विभाति[4] विद्ययैव तु ॥ ७५ ॥

बाधिता हि ततः कर्म नैवास्योत्तरकालजम्[5] ।
शरीरारम्भकं कर्म योगिनो भोगिनोऽपि च ॥ ७६ ॥

विना फलोपभोगेन नैव नश्यत्यसंशयः[6] ।
वर्तमानशरीरेण सम्पन्नं कर्म देहिनः ॥ ७७ ॥

इह वाऽमुत्र वा तस्य ददाति स्वफलं शुक ।
इहैव फलदं कर्म प्रारब्धं प्रतिबन्ध्य च ॥ ७८ ॥

फलं ददाति स्वप्ने वा जागृत्कालेऽथवानघ ।
निवृत्तप्रतिबन्धं च[7] प्रारब्धं कर्म सत्तम ॥ ७९ ॥

निरुध्यं[8] सफलं स्वप्ने ददाति स्थिरमुत्तमम् ।
निरुद्धांशसमो भोगा[9] यदोद्भूतश्च[10] जायते[11] ॥ ८० ॥

ददाति रुद्धं तेनैव सह कर्मं ददाति वै ।
एवं निरुद्धभागे[12] तु स्वप्ने जाग्रति वा फलम् ॥ ८१ ॥

आरब्धस्यानुगुण्येन भुङ्क्ते देही न संशयः ।
अत्युत्कटैरिहत्यैस्तु पुण्यपापैः शरीरभृत् ॥ ८२ ॥

प्रारब्धं कर्म विच्छिद्य भुङ्क्ते तत्फलमेव हि ।
प्रारब्धशेषं विच्छिन्नं पुनर्देहान्तरेण तु ॥ ८३ ॥

---

१. ख च कर्तृत्वम्, २. ग घ च कर्तृरूपस्य, ३. क प्रभः, ४. ग घ विभाता, च विध्वस्ता । ५. च प्रदग्धं पूर्वकालजम्, ६. ख नस्यति संशयः, ७. क तु, ८. ग घ च निरुद्धांशफलं, ९. क भागो, १०. घ यदोद्भूतस्य जाग्रति, ११. ग जाग्रति, १२. क भोगं ।

युक्तो देही ततो भुङ्क्ते तल्लङ्घयति कः शुक ।
अवश्यमेव भोक्तव्यं प्रारब्धस्य फलं जनैः ॥ ८४ ॥

देहेनानेन वान्येन युगपद्वा क्रमेण वा ।
अनेकदेहभोगस्य शुभस्याप्यशुभस्य च ॥ ८५ ॥

नैकस्य फलस्यैव 'शुभकर्माणि कानिचित् ।
कारणानि भवन्त्येव तान्यनेकं तु विग्रहम् ॥ ८६ ॥

आरम्भन्ते क्रमेणैव तेषां नाशस्तु भोगतः ।
सञ्चितेषु समस्तेषु प्रबलं कर्म देहिनः[2] ॥ ८७ ॥

भोगानारभते[3] देहमपि तत्साधनं बुधः ।
दुर्घटं सकलं शक्तिर्माया माहेश्वरी जडा ॥ ८८ ॥

घटयेत्येव सन्देहो नास्ति सा तादृशी खलु ।
माया तस्याश्च कार्यं च सहते न निरूपणम् ॥ ८९ ॥

अनिरूपितरूपा हि माया माहेश्वरी खलु[4] ।
व्यवहारदशायां तु श्रुत्युक्तेनैव वर्त्मना ॥ ९० ॥

कर्मणा फलहेतुत्वं मयैव कथितं तव ।
प्रारब्धकर्मणि क्षीणे सति भोगेन विद्यया ॥ ९१ ॥

मायालेशो निवर्तेत निवृत्तप्रतिबन्धया ।
स्वयमेकापि सा माया बह्वाकारा विचक्षणा ॥ ९२ ॥

जगद्विवर्तते[5] तस्या हेतुरेकः प्रकीर्तितः ।
आकारो[6] वस्तुसत्यत्वप्रतिभासस्य कारणम् ॥ ९३ ॥

जगतोऽर्थक्रियाहेतुरपरः पण्डितोत्तम[7] ।
परतत्त्वापरोक्षस्य[8] कश्चिद् वै प्रतिबन्धकः ॥ ९४ ॥

---

१. ग घ शुक, २. क देहिनाम्, ३. च फलमारभ्यते, ४. क ख ग च शुक, ५. च जगद्विवर्तनस्यैव हेतुरेका प्रकीर्तिता, ६. च आकारोऽन्यस्तु, ७. क पण्डितोत्तमः, ८. ग घ परोक्ष्यस्य ।

कश्चिदात्मस्वरूपस्य साक्षादाच्छादकः शुक ।
जगत्प्रतीतिमात्रस्य हेतुः कश्चित् तपोधन ॥ ९५ ॥

आकारा अपरा सूक्ष्मा स्थूलाश्च[1] बहवः खलु ।
आकारास्ते मया वक्तुं न शक्याः कल्पकोटिभिः ॥ ९६ ॥

मायाकार्यानुगुण्येन कल्प्या[2] एव हि केवलम् ।
प्रारब्धकर्मणि क्षीणे मायाभेदोऽपि सुव्रत ॥ ९७ ॥

जगत्प्रतीतिमात्रस्य हेतुभूतः प्रणश्यति ।
विश्वमायानिवृत्तिस्तु मुक्तिः परतरा मता ॥ ९८ ॥

विद्ययैव हि सा सिध्येत् विद्या वेदान्तवाक्यजा ।
वेदान्तवाक्यतो विद्या मुमुक्षोरेव जायते ॥ ९९ ॥

मुमुक्षुत्वं तु मर्त्यानां मन्दं मन्दतरं बुधः ।
तीव्रं तीव्रतरं चैव तथा चैवोत्तरोत्तरम् ॥ १०० ॥

मुमुक्षुत्वस्य वैशिष्ट्यं मया वक्तुं न शक्यते ।
विद्या साधनपौष्कल्ये मुमुक्षुत्वे महत्तरे ॥ १०१ ॥

सा तु साक्षात् परा विद्या प्रसादादेव जायते ।
देवतानां[3] प्रसादेन त्रिमूर्तीनां प्रसादतः ॥ १०२ ॥

वेदानां[4] च प्रसादेन स्वगुरोश्च प्रसादतः ।
साक्षात् परतरस्यैव शिवस्य परमात्मनः ॥ १०३ ॥

साम्बमूर्तिधरस्यैव प्रसादेन विशेषतः ।
चिच्छक्तेस्तु प्रसादेन स्वस्यैव प्रत्यगात्मनः ॥ १०४ ॥

स्वविलक्षणशून्यस्य स्वयंभातस्य साक्षिणः ।
आविर्भावतिरोभावरहितस्याक्रियस्य च ॥ १०५ ॥

अहमर्थस्य चित्सत्यसुखस्यैव प्रसादतः ।
परा विद्या विजाता चेद् विद्वानेव परं पदम् ॥ १०६ ॥

---

१. क ख स्थूलासु, २. क ख कल्पा ३. क देवानां च, ४. व वेदान्तानां, ।

स्वयं भवति कल्याणं विद्वत्तामपहाय हि ।
स्वप्नदृक् स्वप्नमुक्तित्वात्[1] स्वप्नबोधेन केवलम् ॥ १०७ ॥

स्वयं भवति हे विप्र यथा तद्वत् परात्मवित् ।
स्वात्मनोऽन्यतया भातं समस्तं स्वपनोपमम् ॥ १०८ ॥

स्वात्ममात्रतया बुद्ध्वा स्वयमेवावावशिष्यति[2] ।
एवमुक्त्वा मुनिः श्रीमच्छक्तिपुत्रः[3] पराशरः ॥
सर्ववेदान्ततत्त्वानामाकरः करुणानिधिः ।
[4]स्वस्वरूपमहानन्दप्रकाशपरमाम्बुधौ ॥
प्रतीचि सच्चिदानन्दे केवले परमेऽद्वये ।
निमग्नो निभृतस्तूष्णीमास्ते केवलमास्तिकः ॥ १०९ ॥

मुनेः पराशरस्यास्य स्वानुभूतिप्रदायिनी ।
पार्वती परमा देवी तत्रैवाविरभूत्स्वयम् ॥ ११० ॥

स्वानुभूतिपरानन्दविलीनकरणत्वतः ।
नापश्यत् परमामेनां भवानीं स पराशरः ॥ १११ ॥

पराशरं परानन्दपरमानुभवप्रियम् ।
विलोक्य शुकमाह्लादादिदं वचनमब्रवीत् ॥ ११२ ॥

पार्वत्युवाच[5]

मुनिनानेन कल्याण यदुक्तं परमादरात् ।
सत्यमेव तु तत्सर्वं सत्यमुक्तं मयैव तु ॥ ११३ ॥

पराशरसुतस्यैव व्यासस्याक्लिष्टकर्मणः ।
पुत्रः खलु शुक त्वं हि[6] किं न सिध्यति तेऽनघ ॥ ११४ ॥

---

१. च स्वप्नमुज्झितत्वात्स्वप्रबोधेन, २. ग घ शिष्यते, ३. ख च श्रीमान् शक्तिपुत्रः, ४. ख स्वस्वरूपमहानन्दप्रकाशपरमाम्बुधौ, ५. ख श्रीपार्वत्युवाच, ६. क हि न सिध्यति तवानघ ।

मत्प्रसादेन वेदान्तवचनोत्पन्नवेदनम् ।
करामलकवल्लब्धं भवता भाग्यगौरवात् ॥ ११५ ॥

नास्ति[1] लोकत्रये किञ्चित् तवालभ्यमतः परम् ।
चित्तपारिप्लवं त्यक्त्वा पश्य स्वात्मानमव्ययम् ॥ ११६ ॥

स्वात्मतत्त्वानुसन्धानादनेकभवबन्धनात् ।
विमुक्ता मुनयः पूर्वे तादृशो हि भवानपि ॥ ११७ ॥

दुर्लभं हि परिज्ञानं नराणामविवेकिनाम् ।
सद्यो मुक्तिकरं साक्षात् प्रसादेन विना मम ॥ ११८ ॥

मत्प्रसादस्य सिध्यर्थं पूजयेन्मामतन्द्रितः ।
आदरेण यथाशक्ति हृद्याम्भोजमध्यमे ॥ ११९ ॥

स्ववाचि ब्रह्मरन्ध्रे वा मूलाधारेऽथवादरात् ।
भ्रुवोर्मध्येऽथवा नित्यं कुर्यादेव ममार्चनम् ॥ १२० ॥

मम निष्कलरूपं वा वर्णसङ्क्लृप्तविग्रहम् ।
पादहस्तादिसंयुक्तं सर्वाभरणभूषितम् ॥ १२१ ॥

अथ विप्रात्मकं वापि विग्रहं मम पूजयेत् ।
लोहपाषाणजन्यं वा मन्त्रतो नित्यमेव च ॥ १२२ ॥

गुरूक्तेनैव मार्गेण पूजयेद् भक्तिपूर्वकम् ।
किं बहूक्त्यार्चयेन्मां तु मनुजः सर्वसिद्धये ॥ १२३ ॥

इत्युक्त्वा पार्वती देवी शक्तिपुत्रं शुकं च सा ।
अनुगृह्य[2] महादेवी[3] तत्रैवान्तरधीयत ॥ १२४ ॥

देव्यामन्तर्हितायां तु गलितः स्वानुभूतितः ।
पराशरो मुनिः श्रीमानालोक्य शुकमास्तिकम् ॥ १२५ ॥

भवानीसहितं देवं भवरोगविनाशनम् ।
लम्बोदरं गणाध्यक्षं शक्तिपाणिं च षण्मुखम् ॥ १२६ ॥

---

१. च लोकत्रयेऽपि नो किंचित्, २. क अनुग्राह्य, ३. च महाप्रीत्या ।

नन्दीशं शिवभक्तांश्च प्रणम्य भुवि दण्डवत् ।
सादरं लोकरक्षार्थमिदं वचनमब्रवीत् ॥ १२७ ॥

महादेवः परं तत्त्वं विद्या वेदान्तवाक्यजा ।
विद्याङ्गेषु समस्तेषु वरिष्ठं भस्मधारणम्[1] ॥ १२८ ॥

गुरुः संसारिणां नृणां संसारोदधितारकः ।
श्रद्धा धर्मस्य मोक्षस्य कारणं सकलस्य च ॥ १२९ ॥

इतः परं न वक्तव्यमणुमात्रमपि द्विज ।
श्रोतव्यं च तथा नास्ति शुक सत्यं न संशयः ॥ १३० ॥

महादेवप्रसादेन [2]पाराशरसमाह्वयम् ।
मया पराशरेणैव पुराणमिदमीरितम् ॥ १३१ ॥

व्यासपुत्रः शुकः श्रुत्वा पाराशर्यं पराशरात् ।
पुराणं दण्डवद्भूमौ प्रणाममकरोद् गुरोः ॥ १३२ ॥

नमो रुद्राय देवाय स्वतन्त्रायाखिलात्मने ।
प्रधानपुरुषेशाय जगत्सर्गादिहेतवे ॥ १३३ ॥

या विभाति [3]सदा साक्षि स्वरूपेण स्वभावतः ।
तां नमाम्यादरेणैव शिवामानन्ददायिनीम् ॥ १३४ ॥

अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितम् ।
इदमष्टादशाध्यायैः शिवोऽत्रैव च दर्शितः ॥ १३५ ॥

इत्युपपुराणे पाराशरे अष्टादशोऽध्यायः ॥ १८ ॥

॥ इति पाराशरोपपुराणं समाप्तम् ॥

---

१. ख भस्मगुण्ठनम्, २. क ख पराशर, ३. च जगत्साक्षि, ङ सदासाक्षि ।

सहायकग्रन्थसूची

क्र०सं०	ग्रन्थनाम	सङ्केतः	लेखकः, संपादकः, प्रकाशको वा
१.	अग्निपुराणम्	अग्नि०	मोरप्रकाशन कलकत्ता
२.	अथर्ववेदः	अथर्व०	सायणभाष्योपेतः
३.	अमरकोषः	अ० को०	अमरसिंहविरचितः
४.	अष्टाविंशत्युपनिषदः	अ० उप०	प्राच्यभारतीप्रकाशन
५.	अष्टोत्तरशतोपनिषदः		मोतीलाल बनारसीदास
६.	आचारभूषणम्	आ० भू०	त्र्यम्बकओकः
७.	आचारमयूखः	आ० म०	नीलकण्ठः
८.	आपस्तम्बधर्मसूत्रम्	आ० सू०	चिन्नस्वामी (सम्पाद०)
९.	आश्वलायनगृह्यसूत्रम्	आ० गृ०	गणपतिशास्त्री (सम्पा०)
१०.	ऋग्वेदसंहिता	ऋ० सं०	चौखम्बा सं० सी०
११.	काशीरहस्यम्	का० र०	मोर प्रकाशन, कलकत्ता
१२.	कृत्यकल्पतरुः	कृ० क०	लक्ष्मीधरः
१३.	कूर्मपुराणम्	कूर्म०	मोरप्रकाशन, कलकत्ता
१४.	कल्किपुराणम्	कल्कि०	अशोकशास्त्री (संपा०)
१५.	कैटलाग आफ संस्कृत मैनुस्क्रिप्ट		सरस्वतीभवन, वाराणसी
१६.	गृहस्थरत्नाकरः	गृ० र०	चण्डेश्वरः
१७.	गौतमधर्मसूत्रम्	गौ० ध० सू०	आनन्दाश्रम, पूना
१८.	जैमिनिगृह्यसूत्रम्	जै० गृ० सू०	मोतीलाल बनारसीदास वाराणसी
१९.	छान्दोग्योपनिषद्	छा० उ०	शांकरभाष्य—गी० प्रेस
२०.	पद्मपुराणम्	पद्म०	मोर प्रकाशन, कलकत्ता
२१.	पुराणपारिजातः	पु० पारि०	गिरिधरशर्मा चतुर्वेदः
२२.	पुराणपरिशीलनम्	पु० परि०	"

क्र०सं०	ग्रन्थनाम	सङ्केतः	लेखकः संपादकः, प्रकाशको वा
२३.	पुराणविमर्शः	पु० वि०	बलदेवोपाध्यायः
२४.	पातञ्जलयोगदर्शनम्	पा० यो०	गीताप्रेस, गोरखपुर
२५.	पुराणविषयानुक्रमणी	अनुक्रमणी	राजबली पाण्डेयः
२६.	बृहदारण्यकोपनिषद्		
२७.	तत्त्वसन्दर्भः		
२८.	रामतापनीयोपनिषद्	राम० ता०	मोतीलाल बनारसीदास प्रकाशन, वाराणसी
२९.	पुराणदिग्दर्शन	पु० दि० द०	माधवाचार्यः
३०.	अष्टादशपुराणदर्पणः	अ० पु० द०	ज्वाला प्रसाद मिश्रः
३१.	पुराणस्थवैदिकसामग्री का अनुशीलन	पु० वै० अनु०	रामशंकर भट्टाचार्यः
३२.	पुराणनिर्माणाधिकरणम्	पु० निर्मा०	मधुसूदन ओझा
३३.	काशी का इतिहास	का० इति	डा० मोतीचन्द
३४.	पुराणरहस्यम्	पुरा० र०	अन्नदाचरणतर्कचूडामणिः
३५.	पुराणतत्त्वमीमांसा	पु० त० मी०	श्रीकृष्णमणित्रिपाठी
३६.	ब्रह्मसूत्रम्	ब्रह्म० सू०	शाङ्करभाष्यसहितम्
३७.	गरुडपुराणम्	गरुड०	वेंकटेश्वर प्रेस, बम्बई
३८.	भविष्यपुराणम्	भवि०	वेंकटेश्वर संस्करण
३९.	भागवतपुराणम्	भाग०	गीता प्रेस, गोरखपुर
४०.	देवीभागवतपुराणम्	देवी०	मोर प्रकाशन, कलकत्ता
४१.	नारदीयपुराणम्	नार०	वेंकटेश्वर प्रेस
४२.	न्यायभाष्यम्	न्या० भा०	प्राच्यभारती प्रकाशन वाराणसी
४३.	मत्स्यपुराणम्	मत्स्य०	मोर प्रकाशन, कलकत्ता
४४.	मनुस्मृतिः	मनु०	मोर प्रकाशन, कलकत्ता
४५.	पराशरस्मृति	परा०	मोर प्रकाशन, कलकत्ता
४६.	पराशरमाधवः	परा० मा०	माधवाचार्यः
४७.	महाभारतम्	महा० भा०	गीता प्रेस, गोरखपुर

क्र०सं०	ग्रन्थनाम	सङ्केतः	लेखकः, संपादकः, प्रकाशको वा
४८.	महाभाष्यम् (छायोपेतम्)	म० भा०	निर्णयसागर प्रेस
४९.	प्रायश्चित्तमयूखः	प्रा० मयू०	नीलकण्ठः
५०.	मदनपारिजातः	म० पारि०	मदनपालः
५१.	ब्रह्मवैवर्तपुराणम्	ब्र० वै०	मोर प्रकाशन, कलकत्ता
५२.	वामनपुराणम्	वामन०	काशिराजट्रस्ट, वाराणसी
५३.	लिङ्गपुराणम्	लिङ्ग०	मोर प्रकाशन, कलकत्ता
५४.	याज्ञवल्क्यस्मृतिः	याज्ञ०	वासुदेव लक्ष्मणशास्त्री(संपा.)
५५.	मुण्डकोपनिषद्	मुण्ड०	मोतीलाल बनारसीदास
५६.	तैत्तरीयोपनिषत्	तै०	,, प्रकाशन, वाराणसी
५७.	मार्कण्डेयपुराणम्	मार्कण्डेय	मोर प्रकाशन, कलकत्ता
५८.	वायुपुराणम्	वायु०	,, ,,
५९.	स्कन्दपुराणम्	स्कन्द	,, ,,
६०.	पद्मपुराणस्वर्गखण्डः	पद्म० स्व०	अशोकशास्त्री (सम्पा०)
६१.	विष्णुपुराणम्	वि० पु०	गीता प्रेस, गोरखपुर
६२.	विष्णुपुराण का भारत	विष्णु० भा०	सर्वानन्द पाठकः
६३.	स्मृतिसन्दर्भः	स्मृ० स०	मोर प्रकाशन, कलकत्ता
६४.	नित्याचारप्रदीपः	नि० प्र०	नरसिंह बाजपेयी
६५.	वीरमित्रोदयः	वी० मि०	मित्र मिश्रः
६६.	तीर्थप्रकाशः	ती० प्र०	,, ,,
६७.	आह्निकप्रकाशः	आ० प्र०	,, ,,
६८.	स्मृतिमुक्ताफलम्	स्मृ० मु०	वैद्यनाथ दीक्षितः
६९.	सांख्यसूत्रम्	सां० सू०	विज्ञान भिक्षुभाष्यम्
७०.	स्मृतितत्त्वम्	स्मृ० त०	रघुनन्दन भट्टाचार्यः

क्र०सं०	ग्रन्थनाम	सङ्केतः	लेखकः, संपादकः, प्रकाशको वा
७१.	ब्रह्मपुराणम्	ब्रह्म०	मोर प्रकाशन, कलकत्ता
७२.	शिवपुराणम्	शिव०	पण्डितपुस्तकालय, वाराणसी
७३.	शारदातिलकम्		
७४.	शतपथब्राह्मणम्	शत०	सायणभाष्यसहितम्
७५.	रामायण-मीमांसा	रा० मी०	स्वामी करपात्री जी
७६.	वाल्मीकिरामायणम्	वा० रा०	गीता प्रेस, गोरखपुर
७७.	चतुर्वर्गचिन्तामणिः	च० वर्ग०	हेमाद्रिः
७८.	कल्याण हिन्दू संस्कृति अंक	हि० सं० अ०	गीता प्रेस, गोरखपुर
७९.	पुराणम् (पत्रिका)	पुराणम्	काशिराज ट्रस्ट, वाराणसी
८०.	शब्दकल्पद्रुमः	शब्द०	चौखम्बा प्रकाशन, वाराणसी
८१.	शङ्खस्मृतिः	शङ्ख०	मोर प्रकाशन, कलकत्ता
८२.	सिद्धान्तकौमुदी	सि० कौ०	भट्टोजिदीक्षितः
८३.	भारतीयदर्शन	भा० द०	बलदेवोपाध्यायः
८४.	सनातनधर्मोद्धारः	स० ध०	नकछेदराम द्विवेदी
८५.	सौन्दर्यलहरी	सौ० ल०	
८६.	धर्मशास्त्र का इतिहास भाग १, ३	धर्म० इति०	पी० वी० काणे-अनु० अर्जुनचौबे काश्यपः
८७.	हरिवंशपुराणम्	हरि०	गीता प्रेस, गोरखपुर
८८.	तैत्तिरीयारण्यकम्	तै० आ०	
८९.	बृहद्धर्मपुराणम्	बृहद्धर्म०	
९०.	बृहदारण्यकम्	बृह० आ०	
९१.	त्रिस्थलीसेतुः	त्रिस्थली०	नारायणभट्टः
९२.	स्टडीज इन दि उपपुराणाज (दो भाग)		आर० सी० हाजरा

क्र०सं०	ग्रन्थनाम	सङ्केतः	लेखकः, संपादकः, प्रकाशको वा
९३.	स्टडीज इन दि पुरानिक रिकार्ड आफ हिन्दू राइट् एण्ड कस्टम्		आर० सी० हाजरा
९४.	इन्ट्रोडक्शन टू दि इंगलिश ट्रांसलेशन आफ दि विष्णुपुराण		एच० एच० विलसन
९५.	डिस्क्रिप्टिव कैटलाग आफ मैनुस्क्रिप्ट ऐट दि एशियाटिक सोसायटी आफ बंगाल		हर प्रसाद शास्त्री
९६.	वामन पुराण ए स्टडी		वासुदेव शरण अग्रवाल
९७.	स्टडीज इन एपिक्स एण्ड पुरानॉज आफ इण्डिया		बी० वी० पुसालकर
९८.	वैष्णविज्म शैविज्म एण्ड माइनर सेक्ट्स		भण्डारकर, पूना
९९.	मत्स्य पुराण ए स्टडी		वासुदेव शरण अग्रवाल
१००.	सैक्रेड बुक आफ दि ईस्ट		

शुद्धिपत्रम्

(१) भूमिकादिभागः

पृष्ठसंख्या	पंक्तिः	अशुद्धम्	शुद्धम्
१५	८	बह्वो	बहुशः
१९	२५	लेखोऽति	लेखोऽस्ति
२०	२५	श्रेष्टत्वश्च	श्रेष्ठत्वश्च
२१	२८	पुराणति	पुराणानि
२२	६	कालिकम्	कापिलम्
२३	१	पुराणासारेण	पुराणानुसारेण
३१	३	इदमुयपुराणं	इदमुपपुराणं
३३	२६	आराध्माः	आराध्याः
,,	२८	ब्रुनन्ति	ब्रुवन्ति
,,	३०	साधात्	साक्षात्
३५	८	श्रोत्रिया	श्रोत्रियाः
,,	९	देवगान्धर्वाः	देवगन्धर्वाः
,,	२२	रुक्रुष्टं	रुत्क्रुष्टं
३६	१६	माङ्गत्यं	माङ्गल्यं
,,	२६	वर्णात्रम	वर्णाश्रम
३७	१८	वर्ण	कर्ण
३८	१५	रक्षणीया	रक्षणीयाः
,,	९१	तुल्यल्यस्तु	तुल्यवस्तु
,,	३१	नत्र्येत	मुच्येत
४०	२२	पुत्रकीव	पुत्रजीव
,,	,,	कुशन्थि	कुशग्रन्थि
४६	२५	निरञ्जजनतः	निरञ्जनः

पृष्ठसंख्या	पंक्तिः	अशुद्धम्	शुद्धम्
४६	२६	अतोऽनिष्पन्नेन	अतो निष्पन्नेन
४९	१५	पुर्ण्य	पुण्य
५०	१४	ददमि	ददामि
८३	२१	दधाति	दधति
८६	१०	वेदोतरो	वेदेतरो
८७	२८	अह्निक	आह्निक
१०३	७	कुनाखि	कुनखि
१०६	२७	याज्ञवत्क्य	याज्ञवल्क्य
,,	३१	व्याख्यामं	व्याख्यानं

(२) ग्रन्थभागः

१	१३	पूजितो भवद	पूजितोऽभवद
२	५	स्वयंद्याय	स्वयंवेद्याय
,,	१२	रूद्र	रुद्र
,,	१३	सत्वादि	सत्त्वादि
३	९	विच्छेष्ठाः	विच्छ्रेष्ठाः
४	१५	लङ्ग्यसंज्ञं	लैङ्गसंज्ञं
५	४	व्रह्म	ब्रह्म
,,	१०	सत्वजं	सत्त्वजं
७	१२	दिग्वास्वादित्य	दिग्वाय्वादित्य
,,	१५	कालाभिरुद्रो	कालाग्निरुद्रो
८	१	रूद्रेण	रुद्रेण
१७	११	बिपुण्ड्रं	त्रिपुण्ड्रं
३२	१०	श्रौतनित्यं	श्रौतं नित्यं
३६	३	सूर्यश्देत्यादि	सूर्यश्चेत्यादि
४०	४	अङ्गल्या	अङ्गुल्या

पृष्ठसंख्या	पंक्तिः	अशुद्धम्	शुद्धम्
४२	६	जमनः	जन्मनः
५१	१३	कोकटेष्वपि	कीकटेष्वपि
५८	१०	प्रीर्ण	प्रकीर्ण
६६	२	प्रारब्धाफल	प्रारब्धफल
६८	८	रूप	रूपं
७२	१६	वन्धनात्	बन्धनात्
८२	२५	सनानतः	सनातनः
८२	,,	भावान्या	भवान्या
८५	२२	रुढचा	रूढचा
८६	१	,,	,,
,,	२	,,	,,
९५	२२	जीवनमुक्त	जीवन्मुक्त
९७	५	नेकस्य	अनेकस्य
९८	११	दुधः	बुधः

—:●:—

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय